मिथिलाविद्यापीठग्रन्थमाला प्राचीनग्रन्थावलौ षड्विंशतितमं पुष्पम्

महामहोपाध्यायगोकुलनाथप्रणीतम्

मुदितमदालसानाटकम्

...रभङ्गास्थचन्द्रधारीमिथिलामहाविद्यालयसंस्कृतविभागीयाध्यापकेन
...कोपाह्व (डाक्टर) त्रिलोकनाथशर्मणा
सम्पादितम्

015,2/219

मिथिलाविद्यापीठप्रधानेन प्रकाशितम्

9023

R- 13.26/-

THE
MUDITAMADĀLASANĀṬAKA

Of

MM. GOKULANĀTHA OF MITHILĀ

Critically Edited By

TRILOKANĀTHA JHĀ
PH. D.

Department of Sanskrit,
Chandradhari Mithila College, Darbhanga

RGCSLIB
09023

DARBHANGA
1973

Copies of this Volume, postage paid, can be had of the Director, Mithila Institute, Darbhanga on receipt of the price by M. O. or Postal Order or Cash.

Copyright : Publisher

Price : Rs. 13.26 only

Printed at the Hindustan Press, Laheriasarai and published by Acharya Shobhakant Jayadeva Jha, Director, Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning, Darbhanga.

मुदितमदालसनाटकम्

(मैथिलमहामहोपाध्यायगोकुलनाथप्रणीतम्)

दरभंगास्थचन्द्रधारिमिथिलामहाविद्यालयसंस्कृतविभागीयाध्यापकेन

झोपाह्व (डाक्टर) त्रिलोकनाथशर्मणा

सम्पादितम्

१९७३ तमे खृष्टाब्दे दरभङ्गानगर्यां प्रकाशितम्

प्रकाशकः :—

दरभङ्गास्थमिथिलासंस्कृतविद्यापीठस्य निदेशकः

मूल्यम्—१३ रूप्यकाणि २६ पणाः

प्रकाशनाधिकारः प्रकाशकेन स्वायत्तीकृतः

मुद्रकः :—

हिन्दुस्तानयन्त्रालयः, दरभङ्गा।

The Government of Bihar established the *Mithila Institute* of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga in 1951 with the object, *inter-alia*, to promote advanced studies and research in Sanskrit learning, to bring together the traditional Pandits with their profound learning and modern scholars with their technique of research and investigations, to publish works of permanent value to scholars. This Institute is one of the five others planned by this Government as a token of their homage to the tradition of learning and scholarship for which ancient Bihar was noted. Apart from the Mithila Institute, three others have been established and have been doing useful work—Nalanda Institute of Research and Post-Graduate Studies in Buddhist Learning and Pali at Nalanda, K. P. Jayaswal Research Institute at Patna, and the Bihar Rashtra Bhasha Parishad for research and advanced studies in Hindi at Patna. In the establishment of the Mithila Institute the State Government received a generous donation from the Maharajadhiraj of Darbhanga for construction of the building on a plot of land also donated by him.

As part of this programme of rehabilitating and re-orientation of ancient learning and scholarship, the editing and publication of this volume has been undertaken with co-operation of scholars in Bihar and outside. The Government of Bihar hopes to continue to sponsor such project and trusts that this humble service to the world of scholarship and learning would bear fruit in the fullness of time.

CONTENTS

Preface	...	p. p. ...	1—3
Introduction	..	p. p. ...	I—XII
Corrigenda	..	p. p. ...	(i)—(iv)
Text		p. p.	१ १३६
An alphabetical index of verses found in the *Muditamadālasanāṭaka*		p. p.	(I)—(IX)

PREFACE

In 1962 the University Grants' Commission, New Delhi, awarded a Senior Research Fellowship to me and allowed me to work on 'The contribution of Mithilā to Sanskrit Kāvya-Sāhitya' for three consecutive years. In the course of my researches I came across many hitherto unpublished and valuable manuscripts of works composed by litterateurs of Mithilā. In January 1964 I contributed a paper on "Some forgotten litterateurs of Mithilā"[1] and edited the unpublished *Alasamodinī* of Kavīndra Gaṅgānanda[2]. In 1965 I published the *Śṛṅgārasāriṇī* and *Vīrataraṅgiṇī* of MM. Citradhara of Mithilā for the first time with the financial assistance from the Ministry of Education, Govt of India.

Earlier, in May 1959, I contributed a paper on "The special features of the *Kāvyaprakāśavivaraṇa* : a rare

---

1 Read at the xxvith International Congress of Orientalists held in New Delhi in January 1964 and published in the Journal of the Bihar Research Society, Patna, vol. xlviii parts i-iv p p. 54-60 January-December 1962 issue.

2 Published by Vishveshvaranand Vedic Research Institute, Hoshiarpur 1964.

commentary on the *Kāvyaprakāśa*'[1] in which, *inter alia*, I cited the full text of the three verses quoted by the commentator as verses culled from *Madālasā*, an unknown drama of his. The verses were quoted by me "so that art-connoisseurs may get an extremely faint outline of the nature of this undiscovered drama and those interested may get some material for their further researches."[2]

In April 1963 by the good offices of Prof. P. Thirugnanasambandhan, M. A.,L. T., Chief Professor of Sanskrit, Presidency College, in charge of Curator, Government Oriental Manuscripts' Library, Madras I procured a transcript copy of the manuscript of the drama[3]. For years together I made a search for another copy of the drama but I regret to note that although I discovered one in the house of the Late Pandit Gaurikanta Jha of Village Rahika, District Madhubani inspite of my repeated requests his son did not allow me to go through it with the result that I had to base the present edition, which happens to be the very first edition, of this drama on the only transcript from Madras. I have given the Sanskrit rendering of the Prakrit passages and added notes also, wherever necessary.

In the mean time I approached Dr S. Bagchi, M. A. LL. B., D. Litt., Director, Mithila Research Insti-

---

1 Published in the Calcutta Review, May 1959

2 vide p. 146 of my paper.

3 Described in A Descriptive Catalogue of Sanskrit Manuscripts in the Government Oriental Manuscripts' Library, Madras–vol. xxi—No. 12578 (p.p. 8444—5).

tute, Darbhanga and he was kind enough to include the present work in the publication programme of his Institute. I express my deepest sense of gratitude to him for the same. I am also grateful to Shri Gajendranarayan Singh, B. A., B. L., Proprietor, Hindustan Press, Darbhanga and Shri Shashinath Mishra, Publication Superintendent, Mithila Research Institute, Darbhanga but for whose co-operation the printing would have been much delayed.

JANUARY 26, 1973 TRILOKANATHA JHA

INTRODUCTION

jānakījananabhūmir īkṣyatām
ambujākṣi ! mithile'yam agrataḥ |
atra vijñavadaneṣu darpitā
nṛtyati pratigṛhaṁ sarasvatī[1] ||

The above eulogistic reference to Mithilā by Kavi Karṇapūra in his *Pārijātaharaṇamahākāvya* may appear to be an example of Hyperbole but it remains an indubitable fact that the land of Mithilā, extending from Himālaya in the north to River Gaṅgā in the south, from River Kośī in the east to River Gaṇḍakī in the west, has all along been a famous seat of Sanskrit learning. The sons of the soil have kept the glow of intellectual luminosity undiminished through the ages and earned an undying fame for Mithilā. To claim that the land has maintained its academic standard uniformly right from the age of Janaka and Yājñavalkya to Dharmadatta and Kaviśekhara Badarīnātha of the present century borders on absurdity. For, no country in the world has ever maintained its standards and values uniformly through thousands of centuries. There have always been ups and downs in every walk of life. The literary history of

---

1 *Pārijātaharaṇamahākāvya*—Canto xvii—verse No. 59

Mithilā has also seen several rounds of periods of glory and decadence and it was in one of the periods of glory that Mahāmahopādhyāya Gokulanātha, one of the brightest stars in the galaxy of Sanskrit scholars of Mithilā, was born,

MM. GOKULANĀTHA

Born in the famous *Phaṇadahā*-family MM.Gokulanātha was an inhabitant of village Mangaraunī[1]. He was the third of the four sons of his parents. MM. Pītāmbara was his father and Umā his mother. The *Pañjī*[2] informs us that MM. Pītāmbara had the honorific title, Vīdyānidhi, prefixed to his name. MM Gokulanātha was the grandson of Sadupādhyāya Rāmacandra, the great-grandson of Sadupādhyāya Harihara *alias* Nīkāra and the great-great-grandson of MM. Rucipati. The brothers of MM. Gokulanātha were also scholars of repute. The eldest, MM.Trilocana, possessed the title Avilambasarasvatī; the second, Dhanañjaya *alias* Daṇḍapāṇi, was also a Mahāmahopādhyāya and so was the youngest, Jagaddhara *alias* Jagannātha. In a verse of his drama entitled *Amṛtodaya* MM. Gokulanātha refers to the high intellectual attainments of his brothers[3]. Even the sons of MM. Gokula-

---

1 Situated at a distance of two miles north-east to Madhubani Railway Station (N. E. Rly,).

2 Genealogical records of the Brahmanas and Kāyasthas of Mithilā.

3 *yo janmataśca guṇataśca mataḥ kaniṣṭhaḥ*
śrimattrilocanakaveśca dhanañjayāc ca |
sa śrījagaddharadharātilakāgrajanmā
nirmāsyati praguṇatattvarasaṁ prabandhaṁ ||
V-24 (NSP 1935 edition).

nātha, both of them, MM. Raghunātha and MM. Lakṣmīnātha, were noted for their scholarship. And so was his grandson MM. Bhavānīdatta, the son of MM. Raghunātha. This MM. Raghunātha was also famous for his munificence. He had a unique distinction of giving away all his belongings to the needy. He is remembered in the *pañjī* as *sarvasvadātā*. Such was the glory of the family.

MM. Gokulanātha acquired proficiency in different Śāstras from his father Pītāmbara Vidyānidhi[1], whom he calls a *parāparabrahmamīmāṁsanamāṁsalavijñānavāsana*[2], a *sakalasārasvatasaṁsārasaraṇivibhāgavid*[3] and a *vāṇīvilāsakavi*[4]. MM. Gokulanātha was an specialist in almost all the branches of Sanskrit learning---a philosopher, a poet, a dramatist, a prose-writer, a rhetorician, an astronomer, a Smṛti-writer and what not. He became a *Śarayantrī* --one possessing a title indicative of an erudition of the highest order. This coveted title was conferred on a scholar only after qualifying in a public test in which any person present could ask any question on any

---

1 *ibid.* p. 85.

2 *ibid.*

3 *ibid.*

4 *ibid.* Compare also the following verse of the *Śūktimuktāvalī* of Gokulanātha.

prakṛtigahane tantre vaiśeṣike vivṛtiṁ vyadhād
akuruta caturvaṛgavyākhyāmṛtāni ca bhārate |
bharatavacasāṁ tattvakhyātyai nibandham abhāṣata
vyatanuta na kās tato vāṇīvilāsakaviḥ kathāḥ ||

branch of learning[1]. That MM. Gokulanātha was one of the greatest intellectual stalwarts of his age is also corroborated by the following verse of his pupil, MM. Rāmeśvara Jhā, author of the *Pretavivāhapaddhati*, a work lost in fire some twenty years back. This verse was composed at the time of the passing away of MM. Gokulanātha.

mātar gokulanāthanāmakaguror vāgdevi ! tubhyaṁ namaḥ
pṛcchāmo bhavatīṁ mahītalam idaṁ tyaktvai'va yad gacchasi |
bhūloke vasatiḥ kṛtā mama gurau svarge tathā giṣpatau
pātāle phaṇināyake bhagavati ! prauḍhiḥ kva labdhā'dhikā ||

HIS AGE

MM. Gokulanātha was a protégé of Phatesāha, king of Garhwal. He dedicated his *Ekāvalī*, a treatise on Prosody, to the king[2]. Besides, he also composed his *Sūktimuktāvalī*, an *ākhyāyikā* containing didactic tales with a view to instructing Crownprince Narendrasāha and prince Gopālasāha In it also MM. Gokulanātha has eulogistically referred to king Phatesāha and his capital, Śrīnagara[3].

According to Maithila tradition, MM. Gokulanātha enjoyed the patronage of king Rāghava Siṁha and not that of Mahārāja Mādhava Siṁha, as the Late Professor Bhattacharya inadvertently remarks[4]. For, the latter

---

1 In this connection the paper 'The declaration of a Śarayantrī' by the late Pandit Ramānātha Jhā published in the Proceedings of the All India Oriental Conference, Benares, 1946 p.p. 309–325 may be consulted.

2 *vṛttasāgararatnānāṁ sāram uddhṛtya nirmitā |*
ekāvalī phatesāha ! tava kaṇṭhe luṭhatv i'sau ||

3 *śrīnagare vāsava iva jayati nṛpaḥ śrīphatepatisāhaḥ |*

4 *vide* History of Navya-Nyāya in Mithilā, p. 195, Mithila Institute, Darbhanga 1958,

occupied the throne of Mithilā during the period 1775—1803 A. D. and not from 1700 A. D. to 1739 A. D., as the learned professor observes[1].

The period during which MM. Gokulanātha flourished is pretty certain. For, in his *Māsamīmāṁsā*[2] he tells us that the year of its composition is 1631 of the Śaka Era[3], which corresponds to 1709 of the Christian Era. And this synchronizes with the date of one of his patrons, King Rāghava Siṁha, who ascended the throne of Mithilā in 1703 A. D. and reigned for a period of 36 years. But MM. Gokulanātha must have adorned the court of king Phate Sāha of Garhwal before this period. For, Phate Sāha 'died in 1699 A. D.'[4], And since the authorship of seven of the works of MM. Gokulanātha is traditionally attributed to the period of his sojourn it does not appear unreasonable to hold, as the Late Prof. Bhattacharya opines, that MM. Gokulanātha was born 'in the decade 1640--50 A. D.'[5].

Similarly, taking into account the volume of his contribution to the advancement of the different branches of Sanskrit learning and his august presence at the court of king Rāghava Siṁha of Mithilā we can safely endorse the traditional view recorded by MM. Mukunda Jhā Bakśi[6] that MM. Gokulanātha died at Vārāṇasī at the age of 90.

---

1 *ibid.*

2 Published, Vyāsa Press, Bhagalpur.

3 '*samprati hi śakābdāḥ ekatriṁśatṣoḍaśaśatī*'—*op. cit.* p 18

4 op. cit.p. 195,

5 *ibid.* p. 193.

6 Introduction to the *Amṛtodaya*, Muzaffarpur 1925.

Thus 'the decade 1730-40A.D.'[1] assigned by the late Prof. Bhattacharya to the death of MM. Gokulanātha appears to be a sound judgment. Dr Miśra records a very short span of life of our author[2] but that does not seem to be reasonable.

HIS WORKS

MM. Gokulanātha was a voluminous writer. "There is",says the Late Prof. Bhattacharya, "hardly any branch of Sanskrit literature which has not adorned by his masterly pen. He wrote learned works, big and small, on Nyāya, Vaiśeṣika, Vedānta, Philosophy of Grammar, Rhetoric, Poetry and Drama, Astronomy and Astrology, Civil laws as well as Rituals."[3] Scholars are unanimous in their opinion that he wrote over a hundred volumes but, unfortunately, a majority of them still awaits discovery. While introducing the *Amṛtodayanāṭaka,* MM. Mukunda Jhā Bakśī[4] puts on record 22 works of MM. Gokulanātha on different subjects, Paṇḍita Nandinātha Miśra[5] enumerates 26 works of our author whereas Kaviśekhara Badarīnātha Jhā[6] in his introduction to the *Kāvyaprakāśavivaraṇa* mentions by name 30 works of MM. Gokulanātha on various branches of Sanskritic Studies.

The works of MM. Gokulanātha have a singular charm in them. They arouse in us an extraordinary reverence for the author's erudition in different disci-

---

1 *Op. cit.*—p. 195.
2 History of Maithili Literature—vol. I—p. 304.
3 *Op. cit.*—p. 193.
4 *Vide* p. 2 (introduction).
5 *Vide* pp. 4-6(introduction) to *Padavākyaratnākara*, Varanasi,1960.
6 *Vide* p. 17 (introduction).

plines. They deserve an unbiased appreciation for the lucid exposition of a commentator, the brilliant arguments of a logician, the poetic imagination of a poet-dramatist and the critical evaluations of a critic. The commentaries written by our author apart from driving home the subtle nuances of thought and delicate niceties of suggested meaning help us even in determining the correct version of the quotations cited.

MUDITAMADĀLASA-NĀṬAKA

Authorship

In the beginning of the drama, *Muditamadālasa-nāṭaka*, the Sūtradhāra calls it '*kumāraśrīnarendrasāhanibaddham*' (composed by Kumāra Narendrasāha) but it is obvious that the present drama was not composed by the said prince rather it was at his instance that MM. Gokulanātha, a scholar of Mithilā patronized by his father, Phatesāha, wrote the drama The *kta*--suffix in the word '*nibaddham*' appears to be an instance of '*antarbhāvitaṇyartha*' (causative sense implied therein) and as such it means '*kāritam*' and not '*kṛtam*'. There is not an iota of doubt regarding the authorship of the present drama. For, first, there is the similarity of technique of self-introduction by the dramatist through Goddess Sarasvatī in the concluding portions of the dramas, the *Amṛtodayanāṭaka* and the *Muditamadālasanāṭaka*. Second, verses from the latter have been quoted by the dramatist in his *Kāvyaprakāśavivaraṇa*[1] with unambiguous remarks '*yathā madīyamadālasāyām*' (as in my work *Madālasā*)

---

1 *Vide* pp. 156–156 and 161, compare *infra* pp 87 and 53.

Story

The present drama, complete in seven acts, presents the story of Madālasā and Kuvalayāśva narrated in the *Mārkaṇḍeyapurāṇa*[1].

The first act opens with the news of abduction of Madālasā, daughter of Viśvāvasu by Pātālaketu reported by her confidante Kuṇḍalā to Sage Gālava. Kuṇḍalā gives a picturesque description of the father's pangs of separation from his daughter. The sage tells her about the whereabouts of Madālasā and gives her a message for Madālasā —"Worship Kāmadhenu in the days of misery". In the meantime Medhātithi returns from king Śatrujit and reports compliance of Gālava's orders to him to make his son Satyadhvaja his crownprince and call him by the name Kuvalayāśva for whose use the sage had himself sent the mighty horse Kuvalaya[2] to him.

The second act is the description of Kuvalayāśva's visit to the hermitage of Gālava. He meets Medhātithi, Māṇḍūkya, Vibhāṇḍaka and Uddālaka and learns the techniques of warfare by the good grace of Sage Gālava. Pātālaketu assumes the form of a wild boar and creates trouble in the hermitage.

The third act begins with the reported encounter of Kuvalayāśva with Pātālaketu and other demons; the demons are vanquished and Kuvalayāśva becomes victorious. Madālasā sees Kuvalayāśva in dream and falls in ecstasy of love with him. She narrates the whole

---

1 Adhyāyas xxi–xxiv; edited by Paṇḍita Jīvānanda Vidyāsāgara, Saraswati Press, 1879.

2 *Vide ibid*, xx—51.

story of her dream to her lady-friend Kuṇḍalā. Kuvalayāśva appears on the scene and talks to them, Tumburu comes and at the instance of Kuvalayāśva tak s the ladies back to their place. Kuvalayāśva proceeds to fight the demons.

The fourth act is a dialogue between Bhairava and Bheruṇḍā. They resent a graphic description of the fierce battle between Kuvalayāśva and Pātālaketu Pātālketu is killed. Viśvāvasu comes and takes his daughter Madālasā back to his abode in Hemakūṭa. He is accompanied by Kuṇḍalā and Tumburu. At the request of Kubera Viśvāvasu has already fixed up the marriage of Madālasā with one Maṇibhadra, an ugly-looking fellow.

The fifth act opens with a talk between Kokilikā and Pramadavatī, two lady-attendants. They inform us that Kāmadhenu has intervened and warned Kubera not to plead for Maṇibhadra. For, she had selected some other bridegroom for Madālasā. Sage Gālava also meets Kubera and recommends the name of Kuvalayāśva for invaluable services rendered by him in killing Pātālaketu and freeing Madālasā. Kuvalayāśva suffering from the pangs of separation from Madālasā appears on the scene accompanied by his friend Sunanda. In the meantime enters another set — Madālasā and her confidante Kuṇḍalā. Madālasā is equally longing to meet her darling. Madālasā ties the gold necklace round the neck of Kuvalayāśva and they marry.

The sixth act starts with a dialogue between Kuvalayāśva and Madālasā. Kuvalayāśva hears a cry

requesting him to protect the sacrifice at the hermitage of Śāṇḍilya from demons. He proceeds and consoles Madālasā not to worry and come to the hermitage along with an ascetic whom he will hand over his gold necklace as an identity. In the meantime, Tālaketu, a demon, appears in the guise of an ascetic and asks for gold and Kuvalayāśva hands over the necklace to him.

In the seventh act Kuvalayāśva is again suffering from the pangs of separation from his beloved Madālasā who has been enticed away by Tālaketu. Sunanda consoles him. Then a dramatic performance is staged. It is named *Muktamadālasa* and directed by Aśvatara. Sarasvatī takes an active part in it. It is reported that Tālaketu is bitten by Aśvatara, a king of snakes, and dead. Madālasā goes to the world of Sarasvatī. Aśvatara then hands over the necklace to Kuvalayāśva but his desire to get the same tied round the neck by Madālasā is expressed by his friend Sunanda. Thereupon Aśvatara meditates and Madālasā accompanied by Sarasvatī appears on the scene. Kuvalayāśva and Madālasā are re-united.

Madālasā-episode through the ages.

The story of Madālasā recorded in the *Mārkaṇḍeyapurāṇa* has provided a fertile source for literary compositions through the ages. Trivikramabhaṭṭa wrote *Madālasācampū*[1]. In Nepal Jagajjyotirmalla composed *Muditakuvalayāśvanāṭaka*[2] and Jayajitāmitramalla wrote

1 Edited by J. B. Modak, Poona, 1882, *vide* PO-*xxvi*—1-2.
2 Ms No 461 preserved in Vīrapustakālaya of Govt of Nepal.

Madālasāharaṇa[1]. In Mithilā Bālakavi Kṛṣṇadatta also composed a drama entitled Kuvalayāśvīyanāṭaka[2]. The *Nāṭakalakṣaṇaratnakośa*[3] of Sāgaranandin discusses one *Māyāmadālasanāṭaka* and gives citations from the work as well. Dr C. Tripathy[4] refers to an anonymous drama styled *Madālasāpariṇaya*, a *Madālasānāṭaka* by Rāmabhaṭṭa[5] and a *Madālasā* by Bhavadeva. The new catalogue of manuscripts in Nepal records two more works on the topic—one *Madālasācaritanāṭaka*[6] and another *Madālasopākhyāna*[7]. In addition to these is the present drama, *Muditamadālasanāṭaka* of MM. Gokulanātha wherein the dramatist's descriptive talent finds expression in the description of the accessories of sacrifice[8], the terrific speed of the horse[9], the palace of the demon[10], the battle[11], the dream-world[12], and the like. Wit and humour find place in Medhātithi's description of the manner of riding a horse[13] as well as

1 Ms No 354 preserved in the same place.

2 Preserved with Paṇḍita Ṛddhinātha Jhā; village Sharadapur, Ujan, Dist Darbhanga.

3 Edited by Myles Dillon, OUP 1937

4 *Vide* p. 105, *Campūkāvyakā ālocanā maka evam aitihāsika adhyayana*—Chowkhamba, 1965.

5 *Vide* also Catalogus Catalogorum I—426.

6 Serial No 4020.

7 Serial No 4022.

8 *Vide infra* p. 25

9 *Vide infra* pp. 19-21

10 *Vide infra* pp. 55-56.

11 *Vide infra* act iv.

12 *Vide infra* p. 52.

13 *Vide infra* p. 8.

his depiction of the courtesan in the city[1]. And nothing can be more pathetic than the description of Viśvāvasu, a bereaved father, kissing the foot-prints of Madālasā, his daughter, with wide-stretched lips and not touching them for fear of their being disfigured[2]. Queer imagination of the dramatist in certain cases is worthy of note[3] and so is verbal jugglery[4]. At intervals there are, in the present drama, certain verses composed in terse style characteristic of śāstric treatises. They remind the reader of the warning given by the author of the *Naiṣadhīyacarita* — *'mā'smin khalaḥ khelatu'*[5].

January 26, 1973 TRILOKANATHA JHA

---

1 *Vide infra* p. 11.

2 *Vide infra* p. 5, verse No 14.

3 *Vide infra* p. 15, verse No 27.

4 *Vide infra* pp. 114-116, 117-119.

5 One is also reminded of the following famous Maithilī saying-

gokulanātha pihāni bhāna |
paṇḍita hothi se bujhathi sujāna ||

अनल्पं कल्पान्तव्यसनमिह मग्ना वसुमती
न कल्पन्ते क्वापि क्रतव इति सीदन्ति विधयः ।
विचिन्त्यैवं येन त्रिजगदुपकारे व्यवसितं
स ते क्रीडाक्रोडः प्रियविरहपीडां शमयतु ॥१॥

(नान्द्यन्ते) सूत्रधारः —

अलमलमियता पूर्वरङ्गाङ्गविस्तरेण । त्वरयन्ति माममी पारिषदाः कुमारश्रीनरेन्द्रसाहनिबद्धं मुदितमदालसं नाम नाटकमभिनेतुम् । (नेपथ्याभिमुखमवलोक्य) मारिष ! मारिष ! कथमद्यापि सङ्गीतकविधिमाधातुमुदासते भरताः ।

(प्रविश्य) पारिपार्श्विकः —

भाव ! बलवदुन्मनायमानमवसीदतीव सकलमपि विबुधश्रवणपेयगीतिविद्याविदामस्माकं कुलमिति नोत्सहन्ते सङ्गीतकं प्रवर्तयितुममी भरताः ।

सूत्र०—

आ (:) कथमस्माकमपि विबुधगायनानामन्वयेऽवसाद इति कथय कीदृशोऽसौ ?

पारि०—

वत्सा प्रमदवती क्रूरग्रहेण केतुना गृहीता चिरमनुभविष्यति व्यसनमिति कुलगुरुरस्माकं कलिप्रियः कथयति ।

सूत्र०—

हा वत्से प्रमदवति ! गायनकुलकेतनपताके ! तवापि केतुग्रहपरिभव इति सर्वतः प्रभवति भगवती नियतिः । मारिष ! मारिष ! पश्य ।

सर्वे ते विबुधाः सुधामधुरया गीत्या समाराधिताः
सर्वेऽस्माभिरुपासिताः सुमनसः सूक्तैरुपश्लोकनैः ।

त्रेधाप्रेक्षणकप्रयोगविधिना प्रीतेऽपि तेषां गणे
नासीन्नास्ति स कोऽपि यो मम सुतां केतुग्रहान्मोचयेत् ॥२॥

(नेपथ्ये)

कुशीलव ! कुशीलव ! प्राज्ञोऽसि, न नियतिमतिवर्तितुं प्रभवन्ति विद्वांसो न वा देवताः । कथमितरथा विश्वावसुनन्दिनीं मदालसामपहरति दानवे पातालकेतौ द्रुतविद्रवपराचीनाननेनापि सहरुनयनेन ।

दयया वदनं मदालसाया भयभूम्ना दनुवंशपांशुलस्य ।
न विलोकयितुमाकुलेन शेके दद्दशे पृष्ठभुवा दृशा तथापि ॥३॥

सूत्र०—

अये ! भगवान् गालवो मुनिर्मन्त्रयते । तदेनमनुसृत्य पृच्छावः केतुग्रह-शान्तिकम् । (इति निष्क्रान्तौ ।)

[प्रस्तावना]

(ततः प्रविशति दीक्षितो गालवः ।)

गालवः —

आक्रदर्थितोऽहमनेन दनुवंशपांसनेन त्रिदशकुलोत्पातकेतुना वज्रकेतुकुल-कलङ्केन पातालकेतुना ।

सायं सायमये मयेन विहितां निर्माय मायामयं
वज्रस्फूर्जथुजर्जरश्रुतिपथं पर्जन्यवद्गर्जति ।
आधारैर्मनुजासृजां शमयति त्रेताहुताशार्चिषः
कर्षत्येष करग्रहश्लथजटाबन्धं मुनीनां शिरः ॥४॥

विशेषतस्तदा मदालसां नाम गन्धर्वसार्वभौमविश्वावसुवंशवर्धनामुदारचरितां दारिकामपहृत्याश्रमोपान्तवर्त्मनि गच्छता पातालकेतुना परिभूतोऽस्मि ।

तद्बालाया विलपितमसौ दानवस्याट्टहासो
यत्सम्भूय श्रवणविषयं व्याप तेनाधुनापि ।
स्त्रीणामासां भयकरुणयोरन्तराले निलीना
भुग्नोत्सङ्गस्थगितशिशुवन्मुह्यति स्वान्तवृत्तिः ॥५॥

(नेपथ्ये)

हा प्रियसखि ! निस्सहास्मि ।

गाल०—

कथमियं कुण्डला नाम बालतापसी प्रियसखी मदालसायाः ? कुण्डले !

(प्रविश्य) कुण्डला—

भगवन्तमापन्नाभ्युपपत्तिधनं विन्ध्यवतस्तनया कुण्डलाभिवादयते ।

गाल०—

वत्से कुण्डले ! स्वागतमायुष्मत्यै ।

कुण्ड० (उपविश्य)—

भगवन् ! अपि तत्रभवता बहिर्विरलविषयग्राहिणा लोकायतेन सर्वत्राप्रतिहत-प्रसरेणान्तरेण वा चक्षुषा परीक्षिता प्रियसख्या मदालसाया गतिः ?

आलोकालोकमालोकितमवनितलं लङ्घिताः सप्तवेला
वेत्रन्तालीवनालीदलवलयमरुद्बन्धवः सिन्धुनाथाः,
न्यञ्चन्मानूनि सानूनि च निचितगुरुग्रावरुग्णोरगेन्द्र-
ग्रीवाग्राणां गिरीणामनिशमवचितान्येषु नासादिता सा ॥६॥

गाल०—

वत्से ! ज्ञास्यसि तमुद्देशं यत्र व्यसनदिनानि गमयति मदालसा । कथय तावत् कथमेष पातालकेतुर्हताशः (प्राभृत्) शशाङ्कत्रिदशकुशीलवकुलपताकामिमामपहर्तुम् ?

अङ्गारपर्णधनुषस्त्रुटिता किमु ज्या
चित्राङ्गदस्य किमभज्यत मण्डलाग्रः ।
विश्वावसोरखिलदुर्ललिता तनूजा
यद्धेमकूटभवनोपवनादहारि ॥७॥

कुण्ड०—

भगवन् ! अखिलनिगमनिधे ! किमेतानमरसदसि तौर्यत्रिकमाजीव्य जीवतो नाट्यवेदविदो गन्धर्वानुपालभसे ?

वर्णोचितासु निपुणं नटवर्णिकासु
शस्त्रं न ते प्रहरणाय वहन्ति, किन्तु ।

लास्येषु विप्रवणिजामिव ताण्डवेषु
क्षत्रस्य वृत्तिमभिनीय विडम्बयन्ति ॥८॥

गाल०—

तिष्ठन्तु नाम गन्धर्वा, ननु त्राता न देवानामेकतमोऽपि तत्राभूत् ?

कुण्ड०—

भगवन् ! आम्नायसागरोपबृंहणतारापते ! कथं नाभूत् ?

यो भारतस्त्रिपुरदाहडिमप्रबन्धः
तस्मिन् कुशीलवजनैरभिनीयमाने ।
आसन्नमासत सदस्सदने तदामी
शक्रादयो दशदिशामनुशासितारः ॥९॥

गाल०—

तत्किममरलोकलक्ष्मीकेशपाशमिव मदालसाकरकुशेशयमाकर्षति दनुवंश-पांशुले कुलिशायुधेन (न) किमपि विक्रान्तम् ?

कुण्ड० (स्मित्वा)—

कथं[1] न विक्रान्तम् ? असति विक्रमे कथमितरे जिताः ?

गाल०—

कथय के जितास्त्रिजगदप्रतिहतशासनेन पाकशासनेन ?

कुण्ड० (विहस्य)—

कैलासोपवने बलान्निपतितः पातालकेतोः कथां
श्रुत्वा सम्भ्रमविद्रवद्रुतगलद्वज्रेण जम्भारिणा ।
वेगे नागरिपुर्निगूढचरणाघातध्वनौ सर्पणे
सर्पेन्द्रः परिखाविलङ्घनविधौ तेनाञ्जनेयो जितः ॥१०॥

गाल० (आकाशे)—

ननु गोतमवनिताविनयविलोपावलेपलुप्तभुजबल ! रे बलारे !

धन्यैरन्यजनैर्विवृत्य वदनं नेत्रे निमील्याथवा
सोल्लुण्ठं परिवादशंसि च मुखं लोकस्य नालोक्यते ।
कन्योपप्लवसाक्षिणः परिभवव्रीडाविलक्षात्मनः
सर्वाङ्गीणनिमेषहीननयनव्यूहस्य ते का गतिः ॥११॥

---

1. The transcript reads 'कथय'

वत्से कुण्डले ! कथय किमितरेणामरगणेनाध्यासितसङ्गीतकसदनसीम्नोपक्रान्तम् ?

कुण्ड०—

किमन्यदखिलेन दैवतवर्गेण सीम्नोपक्रान्तम् ? किं बहुना ?

तं गन्धर्वकुलेन्दुकेतुमतुलं पातालकेतुं बलाद्
वीरश्रीरमरानसोढसमरानुन्मुच्य वव्रे वरम् ।
अच्छिन्नाः प्रतिनेत्रमश्रुपयसां धाराः सृजन्नात्मना
चक्रे तत्र सहस्रधारकलशः शक्रोऽभिषेकक्रियाम् ॥१२॥

गाल०—

अपि वत्से ! जानासि किमिदानीमारभते विश्वावसुः ?

कुण्ड० [सास्रम्]—

यदुचितमतिनृशंसविधानेन विधिना वञ्चितस्य जनस्य ।

गाल०—

कथय कं देशमध्यास्ते ? किमेष निजसदनमधिवसति ?

कुण्ड०—

नहि नहि । तनयारहितस्य तस्य कस्माद्धततातस्य दृशौ न दूषयेयुः सदनानि मदालसाननेन्दुद्युतिमोषप्रसरतमोभराणि ! [निःश्वस्य] ब्रह्मविद्याविश्रामभवन ! भगवन् ! कुतो नाम तातस्य व्यसनदिनमारभ्य स्वजनस्य स्वभवनस्य वा दर्शनम् !

निर्मातिस्म मदालसा सह मया यत्पांशुभिः कौतुका-
न्मालिन्याः पुलिने मरालमिथुनक्रीडासहं केतनम् ।
विश्वासैः परिमृज्य वाष्पपयसा सिञ्चेत विश्वावसुः
तस्यैव प्रतिकर्मणि प्रभवता धात्राधिकारीकृतः ॥१३॥

अपि च

दूरायताधरपुटेन मुखेन चुम्ब-
त्याकुञ्चता स्पृशति पाणिपयोरुहेण ।
तातः पदानि सिकतासु मदालसाया
नालिङ्ग्य पीडयति संस्थितिलोपभीतेः ॥१४॥

गाल०—

ननु मालिनीपुलिनोपकण्ठशिलायामुत्कीर्णा मदालसाप्रतिकृतिरपि सम्पद्यते विश्वावसुमनोविनोदाय ?

कुण्ड०—

कथं न सम्पद्यते ! कदापि महता मोहेन तिरोहिते मनसः प्रतिसन्धाने

वत्से ! किं कुपितासि मातरि, परिश्रान्तासि सङ्गीतके
द्यूते कुण्डलया जितासि, कवितावस्तूनि वा ध्यायसि ?
मौने शंस निमित्तमित्यनुकृतिं मोहान्मुहुर्लालय-
न्नद्यापि क्व मदालसेति स चिराल्लब्धस्मृतिर्मूर्च्छति ॥१५॥

गाल०—

वत्से ! मदालसाव्यसनेन पिता परिभूयत इति किमत्र चित्रम् ? ननु सकलस्यैव बन्धुजनस्य मनसि सङ्कलित एष कङ्कमुखैरनुद्धरणीयः शोक-शल्यशङ्कुः ।

कुण्ड०—

भुवनगुरो ! किमुच्यते बन्धुजन इति, ननु तिर्यञ्चोऽपि परिचयोचितेना-चारेण मदालसाविपदमनुशोचन्तो दूयन्ते ।

तथा हि,

माद्यन्त्यास्वाद्य सद्यो न किल कमलिनीमूलनालामृणालं
ये तस्या लास्यलीलालसगतिगुरवो मालिनीकूलहंसाः ।
तत्काले काकलीनामनुकलनविधौ ते तदन्ते वसन्तो
मन्दोन्मीलन्मरन्दद्रवमवलिहते नारविन्दं मिलिन्दाः ॥१६॥

गाल० [सनिर्वेदम्]—

हा धिगेवमचेतनैरपि प्रतिकर्तुमप्रभुभिरभ्यवहारपरिहारेण परं प्रतिविधीय-मानायां मदालसाविपदि वयमुदास्महे । धिगस्मान् !

परपरिभवः स्वान्ते शान्तिं दहन्निव चेष्टते
स्फुरति सलिलं स्पृष्ट्वा शम्भुं करो मम दक्षिणः ।
वरमुपर(म)त्वन्तःक्षोभावकीर्णमिदं व्रतं
न खलु विषहे दिष्टं दुश्चेष्टितं विबुधद्रुहः ॥१७॥

कुण्ड०—

त्रिभुवनोत्पातशान्तिकदीक्षानिपण्णोऽसि । भगवन् ! प्रसीद । संस्थापय विहितप्रत्यूहमिदमाभ्युदयिकम् । अनन्तरमभ्युपपत्स्यसे मदालसाम् । अभिधेहि तावदापाततः क्व मदालसा ?

किमध्यास्ते दैवव्यसनशिखिनो मध्यमथवा
निरालोके लोके क्वचिदपि सखी मे निवसति ?
यदस्मिच्छायावत्सततसहचर्याव्रतवती
वयस्याऽहं तस्याश्चिरतरवियोगादशरणा ॥१८॥

गाल०—

वत्से ! नातिदूरमस्मादाश्रमादनुयमुनाकूलमवनिविवरवर्त्म प्रविश्य कियदन्तरमतिघनतिमिरसङ्घातमतीत्यासादयिष्यसि पातालपृथिव्योरन्तराले कनकपुरं नाम नगरम् ।

कुण्ड०—

नारदवदनादसकृदाकर्णितवत्यस्मि विप्रचित्तिनिर्मितस्य कनकपुरस्य रामणीयकम् ।

गाल०—

आसीदेव विप्रचित्तिवंशवर्धने वज्रकेतौ शासितरि तत्र नगरे महाजनसमाजः । सम्प्रति तु रासुरमुनिमनुजयन्तानामुद्वासयितरि हताशे प्रभ(व)ति पातालकेतौ तदनुजं तालकेतुमाश्रित्यापसृता जनाः । कनकपुरे स एवैको राजा प्रजा चेति । त्वया पुनरासाद्य शून्यस्य तस्य पुरप्रवरस्य मध्यमं प्रासादं बहुलकलुषितादर्शम्लानापि प्रतिपदोपनीतरुचिः सा शशिकलेव दृश्या रहितालोकेन सहजेन ।

कुण्ड०—

किमप्यस्ति भगवतो वाचिकं पदमभिधास्यामि मदालसाम् ?

गाल० —

वक्ष्यसि वत्से ! सुरभिं गवां मातरमर्चयन्ती गमय व्यसनवासरानिति ।

(नेपथ्ये)

भो भो जडादामसन्दणिअकुसभारभुग्गसीसा भुअजुअलावट्टंभगहिअखंधकूवलंतदोहरिंधणवाहिणो सोक्कपोक्खरणालकंटइल्लेहिं उदग्गरोमसूइदंतुरसिराप(ग)

हेहिं तवोधणा ! भणह कहिं दाणिं वट्टइ उअज्झाओ भअवं भिउवंश-वड्ढणो गालओ ।

[भो भो जटादामसन्दानितकुशभारभुग्नशीर्षा भुजयुगलावष्टम्भगृहीत-स्कन्धकूपलग्नदीर्घेन्धनवाहिनः शुष्कपुष्करनालकण्टकितैरुदग्ररोमसूचि-दन्तुरशिराग्रग्रहैः (बद्धविग्रहाः) तपोधनाः ! भणत कुत्रेदानीं वर्तते भगवानुपाध्यायो भृगुवंशवर्धनो गालवः ।]

गाल०--

अये ! महाराजशत्रुजितः सकाशादसौ वत्सो माण्डूक्यायनो मेधातिथि-रुपगतः । वत्स ! इत इतः ।

[प्रविश्य] मेधातिथिः —

भअवं ! उअज्झाअ ! मंडुक्काअणो मेहाइही अहिवाएइ ।

[भगवन् ! उपाध्याय ! माण्डूक्यायनो मेधातिथिरभिवादयते ।]

गाल०—

स्फुरतु ते बृहतो बृहदणोरणीयः शाश्वतं ब्रह्म । अथ कथय तावदामूलतो वृत्तम् ।

मेधा०—

जाला तुह्माणमाणत्तीए मुणिजणेण उक्किविऊण अस्सस्स कुअलअस्स पुट्ठि-मारोविओह्मि तइआ भाअंतेण मए तस्स दुट्ठहअस्स पुट्ठीअ पोट्टेण पडिऊण दृढं करेहिं गहिआ विउणवेठिआ दीहरा क्कंधवाला, जडासु बद्धा खण-खणन्तखलीणा वग्गारज्जू, घडिआ बलामोडिअ मोडिआ अत्तणो चरणा ।

[यदा युष्माकमाज्ञया मुनिजनेनोत्क्षिप्याश्वस्य कुवलयस्य पृष्ठमारो-पितोऽस्मि तदा बिभ्यता मया तस्य दुष्टहयस्य पृष्ठे उदरेण पतित्वा दृढं कराभ्यां गृहीता द्विगुणवेष्टिता दीर्घाः स्कन्धबालाः, जटासु बद्धा खणखणायमानखलीना वल्गारज्जुः, घटितौ बलात्कृत्य मोटितावात्म-नश्चरणौ ।]

कुण्ड० [स्मित्वा]—

सत्यमितरनरैरनालोचितपूर्वोऽयमूहितः स्वयमार्येण हयारोहणप्रकारः ।

गाल०—

हयदमन ! मातले ! वत्स ! ततः ।

मेधा०—

तदो सो दुट्ठसइंधओ वेएण हिंडिउ पउत्तो धरणिअले मह उण जीओ गअणे उड्डेउं आढत्तो। जइआ चडंचडंति मे उप्पडंतीओ जडाओ, फुट्टइ मे पोट्टो, वहिरा होंति कणा खुरटंकारेहिं, ताला अहकं उप्पडिऊण पुहवीअ पडिओ। उक्खलिआ[1] मे दुवे त्तिणि कक्कसवलणद्धाओ[2] जडाओ। [इति विजटं शिरोदेशं दर्शयति।] [ततः स दुष्टसैन्धवो वेगेन पर्यटितुं प्रवृत्तो धरणितले मम पुनर्जीवो गगने उड्डयितुमारब्धवान्। यदा चटचटायन्ते मे उत्पतन्त्यो जटाः, स्फुटति मे उदरम्, वधिरौ भवतः कर्णौ खुरटङ्कारैः, तदाहमुत्पत्य पृथिव्यां पतितः। उन्मूलिता मे द्वे तिस्रः कर्कशबलनद्धा जटाः।]

गाल०—

वत्स! सुविहितं विहितमायुष्मता। शक्यन्ते जीवता जटाः प्रतिविधातुम्। ततस्ततः?

मेधा०—

तदो वडणभग्गजाणू कहकहवि उट्ठिऊण तं दुट्ठतुरङ्गमं तुट्टतम्मि वग्गापग्गहे जाव गेण्हामि ताव सो फुरफुरन्तकेसरकरालकन्धरो पुरिसबाहुवामदुग्गह-पीअरेण पुरिसिआकुद्दणुद्दामेण लङ्घिअगअणद्धेण गीआदण्डेण वज्जवडण-णिग्घोसभीसणं हेसिउं पअट्टो।

[ततः पतनभग्नजानुः कथंकथमप्युत्थाय तं दुष्टतुरङ्गमं त्रुट्यति वल्गा-प्रग्रहे यावद्गृह्णामि तावत्स स्फुरत्केसरकरालकन्धरः पुरुषबाहुव्यामदुर्ग्रह-पीवरेण पुरुषिकाकूर्दनोद्दामेन लङ्घितगगनार्द्धेन ग्रीवादण्डेन वज्रपतन-निर्घोषभीषणं ह्रेषितुं प्रवृत्तः।]

गाल० (सस्मितम्)—

ततस्ततः?

---

1. The transcript reads 'उक्खणिआ' meaning 'उत्खण्डिता'
2. The transcript reads कक्कसुवग्ग—

मेधा०—

तदो मए भायंतेण मुक्का वग्गा, पच्छा परावट्टिअ गहिओ तस्स तुरआवसदस्स सरअचंदकिरणसलाआविडंवअविलंवंतधवलवालभारो वीरलच्छीवीअणदीहरचामरोव्व दुवेहिं हत्थेहिं पुच्छो ।

[ततो मया बिभ्यता मुक्ता वल्गा, पश्चात्परावृत्य गृहीतस्तस्य तुरगापसदस्य शरच्चन्द्रकिरणशलाकाविडम्बकविलम्बमानधवलबालभारो वीरलक्ष्मीव्यजनदीर्घचामरमिव द्वाभ्यां हस्ताभ्यां पुच्छः ।]

कुण्ड० (सविषादम्)—

दिष्ट्या तेन तुरङ्गमप्रवरेण पश्चिमचरणाभ्यां न हतो ब्राह्मणवराकः ।

गाल०—

अयं खलु पातालकेतुनिधनाय सावित्र्या सवितारमुपतिष्ठमानस्य मम पुरतो मार्तण्डमण्डलादपतदश्वः । स एष भूमिवलयक्रमणजाङ्घिकतया कुवलयो नाम कथमिव देवतासत्त्वसमुत्थो द्विजमाहन्यात् ? वत्स ! माण्डूक्यायन ! ततस्ततः ?

मेधा०—

अह सण्णिहिआ आसि सिआसिअसरिअसंभेअपावणमुही तिलतण्डुलिअचिहुरव्व तावसी पडिट्ठाणणअरी ।

[अथ सन्निहिता आसीत् सितासितसरित्सम्भेदपावनमुखी तिलतण्डुलितचिकुरेव तापसी प्रतिष्ठाननगरी ।]

गाल०—

वत्स मेधातिथे ! नगरमासाद्य किमप्यद्भुतमपश्यः ?

मेधा०—

कीस ण दिट्ठं अच्छेरं । केत्तिआ प्पलअघणघडासामला अञ्जणगिरिसिहरपीअरा थोरमुहकुण्डग्गणिग्गअबीअलंगूलोहओआसपसरिअधवलपिहुलविसाणा सिं(ग)विहूणट्ठिपिंडजुअलविसममत्थआ मन्थरचारिणो मए णिरूइआ महिसा ।

[कथं न दृष्टमाश्चर्यम् । कियन्तः प्रलयघनघटाश्यामला अञ्जनगिरिशिखरपीवरा स्थूलमुखकुण्डाग्रनिर्गतद्वितीयलाङ्गूलोभयावकाशप्रसृतधवल-

पृथुलविषाणाः शृङ्गविहीनास्थिपिण्डयुगलविषममस्तका मन्थरचारिणो मया निरूपिता महिषाः ।]

कुण्ड० (विहस्य)—

गजेषु महिषा इति भ्रा(न्तोऽ)यमारण्यकः ।

मेधा०—

भअवं ! उअज्झाअ ! सप्पणिम्मोअलहुणा वक्कलेण विरइअणिअसणो णित्थलधवलमसिणरुद्दक्खप्पसवणिम्मिआइं अक्खमालाइं ललिअकंठो भमर-सामलजडावन्धवन्धुरसीसो अपुरुव्वाइं सामाइं कोइलविरुअमहुरेण उगीहंतरेण गाअंतो वडुअणो राअउलसहाचच्चरे दिट्ठो । जाणामि ते वडुआ हिअएण गुरूणमिंधणमाहरंति ण उण खंधेण जेण अम्हाणं खंधा विअ ताणं हिअआ च्चिअ उछूणा ।

[भगवन् ! उपाध्याय ! सर्वनिमाकलघुना वल्कलेन विरचितनिवसनो निस्तलधवलमसृणरुद्राक्षप्रसवनिर्मितया अक्षमालया ललितकण्ठो भ्रमर-श्यामलजटाबन्धबन्धुरशीर्षोऽपूर्वाणि सामानि कोकिलविरुतमधुरेणो-द्गीथान्तरेण गायन् वटुजनो राजकुलसभाचत्वरे दृष्टः । जानामि ते वटवो हृदयेन गुरूणामिन्धनमाहरन्ति न पुनः स्कन्धेन येनास्माकं स्कन्धा इव तेषां हृदयान्येवोच्छूनानि ।]

गाल० (स्मित्वा, स्वगतम्)—

कथमसौ गणिकागणं वटुसमाज इति मन्यते ? (प्रकाशम्) भवतु, भवतु । आम्नायप्रतिषिद्धमेषां वटूनां दर्शनममीषां साम्नां श्रवणञ्च । मा स्म पुन-स्तथाविधवटुकं द्राक्षीः ।

मेधा०—

अह उअसप्प उअसप्प एसो राआ ठाइ पेच्छसुत्ति जणिहिं उग्घुसिअं ।
सो उण राआ सच्चं माणुसो होऊण मह पाएसु वडिओ ।

[अथ उपसर्प उपसर्प एष राजा तिष्ठति प्रेक्षस्वेति जनोभिरुद्घोषितम् । स पुना राजा सत्यं मानुषो भूत्वा मम पादयोः पतितः ।]

गाल०—

वत्स ! राजदर्शनात्प्रथममायुष्मतः किमासीन्मनसि किमिदं वस्तु राजेति व्यपदिश्यते ?

मेधा०—

मए मणम्मि कअं आसि कोवि महत्तो कुसूलो कुसूलसरिसो अ(व)रो कोवि जन्तू वा राअत्ति भणइ जस्स पोट्टे सअलाए पुहवीए सस्साणं छट्ठंसो माअइ ।

[मया मनसि कृतमासीत् कोऽपि महान् कुशूलः कुशूलसदृशोऽपरः कोऽपि जन्तुर्वा राजेति भण्यते यस्योदरे सकलायाः पृथिव्याः सस्यानां षष्ठांशो माति ।]

गाल०—

ततस्ततः ?

मेधा०—

तदो मए भणिओ सो राआ भअवं उअज्झाअगालओ तुमं आणवेइ तुह पुत्तो सच्चइओ णम जुअराअत्तणेण कुअलअस्सणामेण अ तुए अहिसेइअव्वो। एसो तस्स वाहणं रइरहभट्टो कुअलओ णम तुरओ गुरुणो दिण्णो त्ति ।

[ततो मया भणितः स राजा भगवानुपाध्यायगालवस्त्वामाज्ञापयति तव पुत्रः सत्यध्वजो नाम युवराजत्वेन कुवलयाश्वनाम्ना च त्वयाभिषेक्तव्यः । एष तस्य वाहनं रविरथभ्रष्टः कुवलयो नाम तुरङ्गो गुरुणा दत्त इति ।]

गाल०—

तत्किमभिषिक्तो यौवराज्येऽभिहितो वा कुवलयाश्वनाम्ना कुमारसत्यध्वजो महाराजेन शत्रुजिता ?

मेधा०—

अह इं ! को णाम (सुरा) सुरणरवईणं भअवन्तस्स सासणं ण पडिवज्जइ ? सो वि जुअराअकुअलअस्सो तुम्हाण पाअवन्दणं काउं णअरादो णिग्गओ तइआ मए जणसंवाहभीएण अग्गे पसरिअत्ति ।

[अथ किम् ! को नाम सुरासुरनरपतीनां भगवतः शासने न प्रतिपद्यते ? सोऽपि युवराजकुवलयाश्वो युष्माकं पादवन्दनं कर्तुं नगरान्निर्गतस्तदा मया जनसम्बाधभीतेनाग्रे प्रसृतमिति ।]

गाल०—

तदेहि मध्यमसवनविधये कालिन्दीमवतरामः। (विलोक्य) कथमयमखिल-दिग्विलासिनीमुखमलिनिममार्जनो भगवानारूढ एव गगनमध्यम् ?

भाभिः सर्वाभिराभिर्युगपदिव करग्राहमाकृष्यमाणः
तुङ्गादुत्तुङ्गमारोहति गगनगिरेर्मध्यमं सानु भानुः।
खेदादारुह्य विश्राम्यति दिवसपतावैकपद्येन सद्यः
पादानादाय संवाहयति बलवतामर्चिषां चक्रवालम् ॥१९॥

अपि च

उन्नम्य बाहुयुगलं मुनयः पवित्रैः
सावित्रमण्डलजपैरुपतिष्ठमानाः।
आरोहतो गगनपादपमध्यशाखा-
मुत्तम्भयन्ति पततो मिहिरस्य पादान् ॥२०॥

मेधा० —

हीमाणहे ! दारुणो सन्दावो। रण्णादो वडुणा गुरुस्स सरणं जन्तेण णं वालुआरेणुक्करपडित्तिं त जउणावत्तो पडितच्चए। वाहूहिं पडितोलिऊण समिहाभारो वि खन्धत्थला मज्झण्हक्कमऊहडहचिउरसीसम्मि ठाविज्झए।

[हा ! दारुणः सन्तापः। अरण्यात् वटुना गुरोः शरणं गच्छता ननु वालुकारेणूत्करप्रदीपितं तद् यमुनावर्त्म परित्यज्यते। बाहुभ्यां परितोल्य समिद्भारोऽपि स्कन्धस्थलान्मध्याह्नार्कमयूखदग्धचिकुरे शीर्षे स्थाप्यते।]

कुण्ड०—

नयति किमुपरिष्टाद्रश्मिभिर्भूतधात्री-
मुत नमयति पादैर्व्योममूर्धानमर्कः।
यदिह गगननाभिं गाहमानो न दूरात्
पतति जनललाटं मण्डलं चण्डरश्मेः ॥२१॥

अपि च

काष्ठाग्राणि घटन्ते सर्वाणि व्योमसद्मनः कूटे।
ज्वलति यथेह विभावसुरथैककाष्ठाश्रितो न तथा ॥२२॥

मेधा०—

छिवइ दिणलच्छिणाहिं परिहरिऊण दिणवई दिसाण मुहं ।
सोहवसवत्तिदंसणमछरिणीओ जलन्ति दिसा ॥२३॥

[स्पृशति दिनलक्ष्मीनाभिं परिहृत्य दिनपतिर्दिशां मुखम् ।
सुभगसपत्नीदर्शनमत्सरिण्यो ज्वलन्ति दिशः ॥]

गाल०—

सम्यगभ्यूहितं वत्सया कुण्डलया ।

काष्ठौघघटितकूटं ज्वलयन्नाकाशवेश्मनो गर्भम् ।
क्रूरो विभावसुरसावशरणमखिलं जनं दहति ॥२४॥

मेधा० (सकोपम्)—

कीस कुण्डलाए कइत्तणं पसंसइ उअज्झाओ । णं सुणाउ मे कव्वं ।

[कथं कुण्डलायाः कवित्वं प्रशंसत्युपाध्यायः ? ननु शृणोतु मे काव्यम् ।]

सोमसुहाघिअपुण्णो पडित्तसत्तस्समण्डलकडाहो ।
मुणिमज्झण्हग्घजलछित्तो जालाहि विज्जलइ ॥२५॥

[सोमसुधाघृतपूर्णः प्रदीप्तसप्ताश्वमण्डलकटाहः ।
मुनिमध्याह्नार्घजलस्पृष्टो ज्वालाभिर्विज्वलति ॥]

गाल०—

साधु, पुत्र माण्डूक्यायन ! साधु । प्रार्थयस्व किमपि सक्तुपूर्णपात्रम् ।

मेधा० (सस्पृहम्)—

भअवं ! उअज्झाअ ! लोणं ति णाम कीए वि णइआए दहिधवला वालुआ राअमहाणसे तेमणे पक्खिविअंता मए दिट्ठा ता ममं पि लोणमिस्सं साअं चक्खावेहि ।

[भगवन् ! उपाध्याय ! लवणमिति नाम कस्या अपि नद्या दधिधवला वालुका राजमहानसे व्यञ्जने प्रक्षिप्यमाणा मया दृष्टा तन्मामपि लवणमिश्रं शाकमास्वादय ।]

गाल०—

कथमीदृशाय वस्तुने स्पृहयसि ? निम्बपत्रद्रवादपि तिक्ततमां लवणवालुकामेमी मायामयगृहीता नागरा भेषजमित्यभ्यवहरन्ति ।

(सर्वे स्नातुं परिक्रामन्ति ।)

गाल०—

अहह ! दुस्सहमिह यमुनाकच्छसैकते रविकरकथनवैशसम् ।
सुरगिरिमेधिं परितो रश्मिप्रोतो भ्रमन्नहर्नाथः[1] ।
नक्षत्रसस्यदमनाद्भुवि (वि)किरति बीजवत्सिकताः ॥२६॥

अपि च

वृत्तं वाद्धुकिराजतर्कुशिखरोन्मृष्टं नभश्चत्वर-
क्रीडाकन्दुकमर्कमण्डलममी ताराघुणाः प्राविशन् ।
यत्काष्ठोदरनिर्गतस्य जनताचक्षुःक्षमत्वद्रुहो
गर्भादस्य पतन्ति तप्तसिकताक्षोदक्षरद्रेणवः ॥२७॥

मेधा०—

भुअणभमणसोक्का रइपाआ सिकआसु दाणिं णिवुड्डा ।
फुटंतफोडअवसाजलेहि दावेत्ति मतण्हं ॥२८॥

[भुवनभ्रमणशुष्का रविपादाः सिकतासु इदानीं निर्मग्नाः ।
स्फुटत्स्फोटकवशाज्जलैर्दर्शयन्ति मृगतृष्णाम् ॥]

गाल०—

साधु, वत्स ! सम्यगुपलक्षितम् !
अश्रान्तविश्वविषयभ्रमणाप्तशोषा-
न्निर्मज्जतो गुरुतया सिकतासु पादान् ।
उद्धर्तुमक्षमतगः किमयं करोतु
मध्ये निपद्य नभसः परितप्यतेऽर्कः ॥२९॥

कुण्ड०—

अहह ! प्रतिबन्धवन्ध्यमध्यन्दिनातपक्वथिता न शक्यते कथमपि प्रतिकर्तु-मियमवकीर्णरेणुमुर्मुरा मरुमेदिनी । मन्ये च

---

1. The transcript reads भूमनावां नाथ (?)
2. The transcript reads वर्धरि (?) between -सस्य- and -दमनाद्

निष्टप्तधन्वधरणीसिकतासु सक्ता
दग्धा न किं किरणमालिकरा भवेयुः ।
एणाङ्गनानयनहारिमरीचिकाम्बु-
पूरप्लवेन यदि न प्रतिपालिताः स्युः ॥३०॥

गाल०—

वरमसती मृगतृष्णा न पुनरसाधारणी प्रभा भानोः ।
मुषिता भानुप्रभया मृगतृष्णा दृष्टिमुपनयति ॥३१॥

(आकाशे)—

तत्ते परोपकारव्रतमनपेक्षितशरीरसद्भावम् ।
स तवैव नयननन्दिनि ! मरीचिके ! विभ्रमो रम्यः ॥३२॥

अपि च

भवतीमसतीं मरीचिकेऽमी
कथमाप्ताः कथयन्ति न त्रपन्ते ।
परिमुह्यति पूष्णि दृष्टिमेगाः
त्वयि निक्षिप्य हि पालयन्ति चक्षुः ॥३३॥

(सर्वे परिक्रम्य सैकतमतिक्रामन्ति ।)

गाल० (निरूप्य)—

इयमसौ कलिन्दपर्वताधित्यकावेणिरिव कज्जलश्यामला भगवती यमुना वहति ।

बहिर्मिहिरकरकथनव्यथया शरीरपरितापम् ।
अन्तस्तुषारसलिला शरणप्राप्तानवति जन्तून् ॥३४॥

अपि च

लालयति स्पृशति करैः सवितरि पितरीव मन्युमभिनयति ।
अन्तःशीता यमुना तनुपरितापं बहिर्वहति ॥३५॥

कुण्ड०—

विचित्र एष माध्याह्निकः प्रकारो यमस्वसुः सरितः । तथाहि

निमज्योन्मज्जन्तो विनमितविषाणाहतपय-
स्तरङ्गैरेकत्वं दधति वनवास्तव्यमहिषाः ।

पतन्तः सन्तापादधियमुनमिन्दीवरवन-
च्छदच्छायं हंसास्तटजलजडिम्नानुमिमते ॥३६॥

गाल०—

निपुणमुपलक्षितमायुष्मता !

यमुनापूरे कथमिव कुवलयमलयो विचित्य परिचिनुयुः ।
यदि न सुषीमच्छायास्पर्शेन तदेतदनुमिनुयुः ॥३७॥

मेधा०—

उअह उअह जउणातरङ्गथोरा णिव्वुड्डुव्वुड्डुआ वि रण्णगआ ऊससिअहत्थ-पोक्खरसीकरधाराहि णज्जन्ति ।

[पश्यत पश्यत यमुनातरङ्गस्थूला निर्मग्नोन्मग्ना अप्यरण्यगजा उच्छ्वसितहस्तपुष्करशीकरधाराभिर्ज्ञायन्ते ।]

कुण्ड०—

दर्शनीयमुपदर्शितमार्येण ।

गण्डस्थलोत्पतदलिव्रजनिर्विशेषा-
नुत्क्षिप्य पुष्करपथेन पृथूदबिन्दून् ।
एतेऽवगाढयमुनापयसो मदाम्बु-
निस्पन्दचन्द्रकशतं रचयन्ति नागाः ॥३८॥

गाल०—

वत्से ! पश्य तावदविच्युतप्रेमोचिताचारमिदं चञ्चरीकचरितम् ।

पक्षच्छदैः कुमुदिनीमपवारयन्ति
प्रौढातपं स्वयममी भ्रमराः सहन्ते ।
निद्राति सम्प्रति नितान्तमियं त्रियामा-
यामेषु जागरमधूत्सवसेवनेन ॥३९॥

मेधा०—

दंसिअमुहामलज्झलजालो सूरेन्द्रजालिओ जलावेइ अण्णजणाणं (पि) णअणं जुत्तं जं कुमुइणी सअं णिमिलेइ ।

[दर्शितमुधामृगतृष्णाजालः सुरेन्द्रजालिको ज्वलयति अन्यजनानामपि नयनं, युक्तं यत्कुमुदिनी स्वयं निमीलयति ।]

कुण्ड० (आकाशे)—

भगवन्नशेषभुवनभवनोद्दीपनानलमार्तण्ड !

तथ्यं किञ्चन वच्मि मा स्म मनसा मन्युं वृथा भन्यथा
मिथ्या चेद् वचनं तदा भगवती गौरी मम क्रुध्यतु ।
धन्या कैरविणी निशा सुकृतिनी याभ्यां कदाचिद् दृशः
सन्तापाय फलाय चण्डचरित ! भ्राम्यन्नदृष्टो भवान् ॥४०॥

गाल०—

वत्से वैन्ध्यवति ! स्थाने खलु चण्डकिरणमुपालभसे ।

पश्यैता विषमां दशामुपगतास्ताम्यन्ति यासां पतिः
विश्वेषां नयनानि लुण्ठति नभःकान्तारपाटच्चरः ।
एषा सूरशिला ज्वलत्यनिमिषं पश्चिन्यसौ ध्यायति
छायेयं तरुमूललीनमलिना लोकात्तनुं निह्नुते ॥४१॥

(नेपथ्ये)

भो भो युवराजकुवलयाश्वनासीरचरा निजबलावलेपनुलितभुवनभारभुज्यमानभुजमूलसन्धयो वसुन्धराधुरन्धराः सहसा न प्रवेष्टव्यमिदमाश्रमपदम् ।

गाल०—

वत्से कुण्डले ! समासन्न एष युवराजकुवलयाश्वः ।

सर्वधन्विजनगर्वहरोऽयं
शत्रुजिद्धरणिनाथकुमारः ।
उद्धरिष्यति सखीं व्यसनात्ते
सागराद्ध्रुवमिवादिवराहः ॥४२॥

(इति निष्क्रान्ताः सर्वे ।)

[प्रथमोऽङ्कः समाप्तः]

[अथ द्वितीयोऽङ्कः]

(ततः प्रविशति कुवलयमारुह्य कुवलयाश्वः ।)

कुवलयाश्वः —

अहह ! मुनिना भगवता गालवेन मेधातिथिमुखेन सन्दिष्टमस्य तुरगप्रवरस्य लोकत्रयाक्रमणप्रागल्भ्यमिदानीं साक्षादिवोपलक्ष्यते ।

धावन्नाविशतीव नागभवनं भूमिं मुखेनोल्लिख-
न्नेतल्लङ्घितुमीहते पुरुषिकाप्रौढोऽर्धकायो नभः ।
हेषाभिर्हसतीव मण्डलिकया बिम्बं विडम्ब्य क्षितेः
धाराभिः सुरसिन्धुवत्कुवलयस्त्रैलोक्यमाक्रामति ॥१॥

अपि च

धाराः पञ्च तुरङ्गजातिसरितामेतेन नीता द्युतिं
प्राप्यैतद्गुणगन्धमेष पवनो वेगाद्दिशो धावति ।
वैमुख्यं न शिलीमुखा मम भजन्त्येतद्वशस्थायिनः
कर्णालङ्करणक्रिया कुवलयेनाकारि वीरश्रियः ॥२॥

किञ्च

सुरसिन्धोर्धारात्रयमतिवर्तितुमेष सैन्धवः सृ(ज)ति ।
मण्डलिनीर्वेगवतीर्धारा दूरायताः पञ्च ॥३॥

(कुवलयस्य प्लुतगतिमभिनीय) कथमहमुदञ्चितादाञ्चितक्रमेण निरवलम्बमिव प्लवमाने कुवलये विलम्बमानासु रविरश्मिशृङ्खलासु हिन्दोलया खेलामि । तज्जानामि

धावन्तः खुरलक्षणेन पदवीमुन्नीय शिक्षां गतेः
काङ्क्षन्तोऽनुसरन्ति धूलिमलिना दूरादमी वायवः ।
तस्माल्लोचनवञ्चनोऽयमवनौ पादं न धत्ते प्लुतैः
बिम्बार्धाङ्कपरम्परामिव लिखत्याकाशमित्तौ हयः ॥४॥

अपि च

निरालम्बं क्रामन्नयमविरलेन प्लुतगति-
क्रमेण द्राघीयो दृशि सृजति गन्धर्वनगरम् ।
अमीभिः कल्लोलैरिव रविरुचीनामुपचयै-
रवक्षिप्योत्क्षिप्तस्तरति गगनाब्धौ कुवलयः ॥५॥

किञ्च

काष्ठान्तसङ्घटितदूरविलम्बमानः
मार्तण्डरश्मिवलयानवलम्बमानः ।
गामस्पृशन्निव दधन्नतिमुन्नतिञ्च
हिन्दोलया कुवलयो रमते प्लुतेषु ॥६॥

(तुरगवेगातिशयं नाटयित्वा) हन्त ! भवनाङ्गनमात्रीकृतधरणिवलयेन धावता कुवलयेन प्रतपत्यपि तपसमयतपने तुहिननिशीथिनीनिशीथेनेव सञ्चरणमाण-निश्शब्दनिभृतमिदं जगदवधारयामहे ।

तथाहि

वाहग्रैवेयदामग्रथितरयरणत्किङ्किणीक्वाणधाराः
कर्णाभ्यर्णं ममामूः प्रतिरवगुरवो यावदभ्युच्चरन्ते ।
तावद्वेगेन धावन्नतिपतति भुवो योजनान्तं हयो मे
हा दूरादन्तिकाद्वा श्रवसि न लभते कोऽपि शब्दः प्रवेशम् ॥७॥

अपि च

विच्छिन्नाममुनैव यावदवनौ भानुः प्रभां पातयेत्
प्रायस्तावदयं रयात्कुवलयो गव्यूतिमुल्लङ्घते ।
ग्रामीणा जनता नितान्तचकिता दूराञ्चिते चक्षुषी
विक्षिप्य क्षणमीक्षते पथि हयच्छायामयीं विद्युतम् ॥८॥

किञ्च

स्थिरमिव हयमेनं स्वं च मन्ये शरीरं
प्रतिमुखवहमानां वेद्मि पार्श्वे वनालीम् ।

Rashtriya Sanskrit Sansthan Deemed Univ. Kalisa-Rajiv Gandhi Campus SRINGERI LIBRARY ACC. NO. 9023

प्रथमतममनेनोल्लङ्घिते व्योम्नि पश्चात्
कुवलयमनुधावत्यस्य हेषानिनादः ॥९॥

अथ च

अमुना हयवेगेन क्षणे तीर्णाध्वविस्तरः ।
समभिव्याहृतं मन्ये नानाजनपदाक्षरम् ॥१०॥

(सविषादम्) हा धिक् ! अस्मिन्निजनयनवेगादप्यधिकं धावति सैन्धवाधिपताके तदीयबालपाश्यामणिशलाकावधिरेव मम चक्षुषोः प्रसरणसीमा ।

तथा हि

पुरो दूरे वस्तु स्थितमभिमुखे वर्त्मनि दृशोः
न पश्यामः पश्चादपि लघु परावृत्य वदनम् ।
तदेवं जानीमो जवजितमनश्चापलममुं
न शक्ता मे दृष्टिः कुवलयमतिक्रम्य पतितुम् ॥९॥

(बलान्नियमनं नाटयित्वा) अये ! प्रसह्य रश्मिसंयमनेन प्रतिहतवेगोऽयमकाण्ड एव मण्डलानि विरचयितुमुपक्रमते कुवलयः । वल्गाग्रहप्रतिहतो घनसेतुरुद्धसिन्धुप्रवाह इव सैन्धवसार्वभौमः निर्दारितावनिरजःकलुषो विलोमधारागतिः प्रभवति भ्रमिभिर्भयाय । (निरूप्य) कथमयं स्वेदशीकरसेकेन जीवयति निजचरणाभिघातमूर्च्छितामवनिम् ।

निरुद्धरश्मिप्रतिबद्धवेगः
तेजोपकर्षं सहते कथञ्चित् ।
दर्पोष्मणा वर्षति वाजिराजो
वारीणि वर्षास्विव चण्डरश्मिः ॥१०॥

(नेपथ्ये)

भो भो जुअराअकुअलअस्स ! ओदरसु इमादो दुट्ठतुरङ्गमादो, भाआमि इमस्स पासमणुसरन्तो ।

[भो भो युवराजकुवलयाश्व ! अवतरास्माद् दुष्टतुरङ्गमाद्, बिभेम्यस्य पार्श्वमनुसरन् ।]

कुव०—

नूनमनेन जटोल्लुण्ठनदिवसावधि[1] कुवलयाद् बिभ्यता मेधातिथिना भवितव्यम्। कः कोऽत्र भोः ?

(प्रविश्य) सूतः —

आयुष्मन् ! अहमस्मि । आज्ञापयतु युवराजः ।

कुव०—

आर्य युगन्धर ! विश्रामय कुवलयम् । (इत्यवतरति ।)

सूतः —

यदाज्ञापयति युवराजः । (इति कुवलयमादाय निष्क्रान्तः ।)

(प्रविश्य) मेधातिथिः -

सोत्थि जुअराअस्स । इमो अग्घो उअज्झाअेण तुह पडिवादिओ । (इति नाट्येनार्घविधिं निर्वर्तयति ।)

[स्वस्ति युवराजाय । अयमर्घ उपाध्यायेन तुभ्यं प्रतिपादितः ।]

कुव० (सबहुमानम्)—

यदि गालवेन भुवनत्रयगुरुणा गौरवेण दत्तोऽर्घः तदहं दीर्घाभ्युदयः साम्प्रतमनघो निरर्घोऽस्मि ।

मेधा०—

इदं तवोवणं पविसअ जुअराओ ।

[इदं तपोवनं प्रविशतु युवराजः ।]

कुव० [विलोक्य]—

आर्य मेधातिथे ! को नामायमुग्रे तपसि वर्तमानो मुनिः ?

आस्कन्धादुलपप्ररोहजटिलां वल्मीकतामागतं
बिभ्राणः शरटावपाटितजटं शीर्षावशेषं वपुः ।
जीवन्नर्कमरीचितो रुचिकणानाचम्य सोमामृत-
स्वादोपज्ञरसज्ञवक्त्रविवरः स्वर्भानुवद् भासते ॥११॥

---

1 The transcript reads "जटोल्लङ्घन—"

मेधा०—

एसो क्खु मम आवुओ मण्डुक्को णाम। जाअमेत्तं मं उअज्झाअहत्थे णिक्खिविऊण सअं दीहरे समाहिणिसण्णो।

[एष खलु मम आवुको माण्डूक्यो नाम। जातमात्रं मामुपाध्यायहस्ते निक्षिप्य स्वयं दीर्घे समाधौ निषण्णः]

कुव० [प्रणिपत्य]—

आथर्वणोपनिषदां ब्रह्मसर्वस्ववेदिने।
अथर्वद्विजशिष्याय माण्डूक्यमुनये नमः ॥१२॥

(अन्यतोऽवलोक्य)—

आर्य मेधातिथे! कथय कथय। स्पृहयामि तावदेकपादिकयोत्थाय नयननिमीलिकया गमितबहुयुगाय महामुनये।

अन्तःसन्धिनिविष्टकीटविचरद्वल्मीकमृ (त्पि) ञ्जरा-
स्वाकृष्टासु जटासु तालफलवत्कीशैर्यदुल्लुञ्चितम्।
कोऽयं यस्य तपस्यतः पुनरिदं स्थाणुप्रकाण्डभ्रमा-
दारूढैः परितः पुराणशरटैर्जातं जटालं शिरः। १३॥

मेधा०—

एसो भअवं विहण्डओ घरमेहसुट्ठिए पुत्ते रिस्ससिङ्गे परमम्मि बम्हाणंअज्झाणं णिसण्णो।

[एष भगवान् विभाण्डको गृहमेधसुस्थिते पुत्रे ऋष्यशृङ्गे परमे ब्रह्मानन्दध्याने निषण्णः।]

कुव० (सबहुमानम्)—

स्तुमो विभाण्डकं यस्य पीत्वा बीजामृतद्रवम्।
हरिणी जनयामास मूर्तिमद् ब्रह्मवर्चसम् ॥१४॥

(इतरतो निरूप्य)—

आर्य! न केवलमस्मन्नयनमेव या (वद)[1] खिलमपि भुवनवलयमयमनेन पुनाति, जरठशैवलानुविद्धहिमसमयकमलनालकशीयसा प्रवृद्धमलिननखशिखरदन्तुराग्रशिराशेषकरतलेन नियमोन्नमितेन बाहुयुगलेन युगविगमेऽप्यविघटितध्यानमुद्रः।

1 The transcript reads "याश्वै?"

तत्कथय

कोऽयं यमी जयति यस्य किलोर्ध्वबाहो-
रुड्डीय जर्जरजटोदररन्ध्रनीडात् ।
दूरोच्छ्रितेषु मखसूचिशिखामुखेषु
स्थित्वा स्खलन्ति विरुवन्ति शकुन्तपोताः ॥१५॥

मेधा०—

एसो क्खु सो णिगमगीअवअणो माआदरिद्दो भअवं उद्दालओ अत्तणो दंसणेण अत्ताणअं विणोदेइ ।

[एष खलु स निगमगीतवचनो मायादरिद्रो भगवान् उद्दालक आत्मनो दर्शनेनात्मानं विनोदयति ।]

कुव०—

जितं मया यस्य दृशोः पथि स्थितं
तदेतदुद्दालकनामकं महः ।
किमप्यचिन्त्यं निहितं गुहान्तरे
यतः परं तत्त्वमपि प्रकाशते ॥१६॥

मेधा०—

जुअराअ ! दिट्ठा तवोवणपेरन्तणिसण्णणिरुद्धणीसासा ओवग्गवहपत्थिआ मुणिणो । उअ दाव इमे वइहाणसव्वदग्गाहणज्जिअसग्गमग्गो तवोहणे ।

[युवराज ! दृष्टास्तपोवनपर्यन्तनिषण्णनिरुद्धनिःश्वासा अपवर्गपथ-प्रस्थिता मुनयः । पश्य तावदिमान् वैखानसव्रतग्रहणजितस्वर्गमार्गान् तपोधनान् ॥]

कुव०—

साधु दर्शनीयोऽयमारण्यकानां समाजः ।
नानाप्रकारविधिविप्रतिषिद्धधर्म-
सिद्धान्तवादगुरवो विदितार्थतत्त्वाः ।
एते त्रयीव्यतिकरा इव मूर्तिमन्तः
त्रेतोपचारपटवः प्रवरा द्विजानाम् ॥१७॥

मेधा०—

इमो अग्गिसरणो उअज्झाअस्स पेच्छउ जुअराओ ।

[इदमग्निशरणमुपाध्यायस्य प्रेक्ष्यतां युवराजः ।]

कुव०—

अये मूर्तिमानिव क्रतुविधिरग्निशरणोद्देशोऽयममुष्य भगवतो गालवस्य ।

शम्याशूर्पजुहूस्रुवोपलदृषत्कृष्णाजिनोलूखलैः
वर्हिर्व्रीहिपयःकपालचमसैर्यज्ञायुधैः सम्भृताः ।
स्फीतस्फ्याः समिदग्निहोत्रहवनोह्याः स्फुरद्वेदयः
चात्वालैरपि पावयन्ति नयनं त्रेतापवित्रा गृहाः ॥१८॥

मेधा०—

एसो उअज्झाओ तह आगमणं पडिवालेइ । णं उअसप्पउ जुअराओ ।

[एष उपाध्यायस्तवागमनं प्रतिपालयति । ननु उपसर्पतु युवराजः ।]

कुव० (निरूप्य)—

किमपि चिन्तयति भगवान् । तथा ह्यस्य

उदञ्चिता चुम्बति तापसस्य
जटोपकण्ठं[1] पलितोज्ज्वला भ्रूः ।
सन्ध्याघनं चन्द्रकलेव सेयं

मेधा०—

ता जाणे बह्मतत्तं चिंतेइ ।

[तज्जाने ब्रह्मतत्त्वं चिन्तयति ।]

कुव०—

न ब्रह्मचिन्तामलिना मुखश्रीः ॥१९॥

(ततः प्रविशति बृसीनिषण्णो गालवः ।)

1 While citing the present verse in his *Kāvyaprakāśaviva-ṛaṇa* the author reads जटाकलापं for जटोपकण्ठं *vide* KPVN—p. 143

गालवः (स्वगतम्)—

मम हि साम्प्रतमन्तर्मुखप्रवृत्तचिन्ताभिभूतभौतिकेन्द्रियकदम्बपारिप्लवनिरुपप्लवा-मपरिमितपरमाह्लादपूरस्रावोचितामनन्तचेतनासन्ततिमन्तरयति चिन्ताज्वरः ।

तथा हि

शत्रोर्देवहतस्य दानवपतेः पातालकेतोर्वशा-
दिन्द्रश्रीश्च मदालसा च न निजे नीता प्रतिष्ठां पदे ।
पुत्रः शत्रुजितः पुराणनृपतेर्मित्रस्य नेत्रप्रियः
प्राप्तः कार्तिकलत्रयोरधिगमाभावान्न सम्भावनाम् । २०॥

(विमृश्य) मया पुनरेकमेव कार्यबीजमखिलाय फलायोपक्षिपता सुविहितं विहितं यदेष पातालकेतुवधाय धरणिमवतीर्णस्तरणेः किरणप्रसूतस्तुरङ्गमः कुवलयाश्ववाहनतामुपनीतः । एवं हि कृते मदालसाविपदुद्धारे विश्वावसुः कृतज्ञः प्रत्युपकारे कथं विलम्बेत ? प्रतिपादयेदवश्यं मदालसां कुवलयाश्वाय । (साशंसम्) अपि नाम वत्सयोर्मदालसाकुवलयाश्वयोरितरेतरदर्शनादनुरागः ?

(उपसृत्य) मेधातिथिः

उअज्झाअ ! एसो सो उअत्थिओ ।

[उपाध्याय ! एष स उपस्थितः ।]

गाल० (स्वगतम्)—

शकुनमामनन्ति शिशूनां वटूनाञ्च चिन्त्यमानसव्यपेक्षं वचनम् । (प्रकाशम्) वत्स ! कः ?

मेधा०—

णं भणामि एसो सो उअत्थिओ तुए सइ चिन्तिज्जन्तो ।

[ननु भणामि एष स उपस्थितस्त्वया सदा चिन्त्यमानः ।]

गाल०—

वत्स ! प्रियमप्यपरिस्फुटमभिदधासि ।

मेधा०—

णं भणामि एसो सो उअत्थिओ तुए सइ चिन्तिज्जन्तो जुअराअकुअलअस्सो ।

[ननु भणामि एष स उपस्थितस्त्वया सदा चिन्त्यमानो युवराज-कुवलयाश्वः ।

कुव० (उपसृत्य) —

एष शात्रुजितः कुवलयाश्वोऽभिवादयते ।

गाल०—

आयुष्मन् !

लोकालोकोपशल्यप्रतिहतिमुखरक्षीरपाथोधिवेला-
व्यावल्गन्मेखलाया भव पतिरवनेर्धर्मपत्नीसपत्न्याः ।
प्रत्यावृत्य प्रवासात्तव विपुलभुजाभोगदत्तावलम्बा
निःश्रेणीश्रेणिभि(स्त्वां पुन)रमरतुरासाहमारोहतु श्रीः ॥२१॥

मेधा० —

उअज्झाअ ! उज्जुअं च्चिअ कीस ण भणइ कंपि कणअं लहेसुत्ति ।

[उपाध्याय ! ऋजुकमेव किं न भण्यते कामपि कन्यकां लभस्वेति ।]

गाल०—

आयुष्मन् ! आसनपरिग्रहं करोतु युवराजः ।

(कुवलयाश्वः भूमावुपविशति ।)

गाल०—

अपि नाम सुखमेधते निरर्गलगुणशक्तिसिद्धिरप्रतिहताज्ञा राजलक्ष्मीः युवराजस्य ?

कुव०—

विशेषतोऽद्य संसारविप्लवानुपप्लुतब्रह्मवर्चसेन वचसा चिन्तयति शान्तिकमस्माकमस्मिंस्तत्र भवति भगवति भार्गवप्रवरे ।

गाल० -

अपि नाम प्रति(हत)ममङ्गलमायुष्मतः ?

कुव०—

भगवन् ! एकसुरसुरारिविग्रहावग्रहग्राहगृहीतजगदुद्धरणकरुणभाव ! भृगुकुलाकूपारपारिजात !

सरला करुणा विशुद्धवर्णा
श्रुतिगर्भादिव निर्गता पवित्रा ।

अशिवं कथमस्तु मे प्रसन्ना
पतिता दृक् तव भारती च यत्र ॥२२।

मेधा०—

जुअराअ ! अच्छेरं किं पि तुह महाभाअत्तणं जेण उप्पुसिअसंसारोपप्पओ अप्पा उअज्झाअेण ज्झाणरसप्पडिऊले परमवच्छलत्तणदोसे पुणो बलमोडिऊण पाडिज्जए।

[युवराज ! आश्चर्यं किमपि तव महाभागत्वं येनोत्प्रोञ्छितसंसारोपप्लव आत्मा उपाध्यायेन ध्यानरसप्रतिकूले परमवत्सलत्वदोषे पुनर्बलात्कृत्य पात्यते।]

कुव०—

आर्य मेधातिथे ! प्रकृतिरियं परमतेजस्विनामेवंविधानाम्। पश्य।

किं नामात्र निमित्तमस्ति यदसो गर्भाण्डभाण्डे मयि
ब्रह्मोप्ठ्प्टकवास्तुचारुचरितस्तोत्रो गुरुस्तुप्यति।
जाड्यं नीचपथानुसारिणि सरित्तीरे कुतः कर्षति
द्राक्प्राक्प्रत्यगपागुदग्दिगगदङ्कारः करो भास्वतः ॥२३॥

गाल०—

आः ! किमुच्यते ? किं नामात्र निमित्तमस्तीति दनुजाबलेपप्लुतक्रतुविधयो विविधबाधया विद्धाः त्वामेव गुरुभुजार्गलविपदि कपाटं वयं विद्मः।

कुव०—

अहो ! शिशुबालिशोपलालनीनामविचारणीयानि गुरुगिरामर्थवादश्रुतीनाञ्च विषयविपर्ययदूषणानि। सरिति ग्रावाणमुन्मज्जयन्त्योऽपि जनयन्त्यमूर्जन-श्रोत्रपावित्र्यम्। (सहासम्) पश्य मेधातिथे ! भुवनत्रयभयतमोभङ्गभास्वतो भगवतो भार्गवस्य क्रतुप्रत्यूहमुपशमयत्यकृतास्त्रः कुवलयाश्व इति। तदा किल कालनेमिविप्लवकाले

केनान्येन भयार्तभूतकरुणाकूपारवीचिच्छटा-
विक्षेपोच्छलदक्षरामृतकणासारेण निर्वापिताः।
प्रभ्रश्यत्पुरुहूतपार्ष्णिकदृशां काणीकरण्यो रणा-
रण्यानीतरुमूलतूलदहनोद्रिक्ता द्विषां हेतयः ॥२४॥

गाल०—

वत्स ! किमतिक्रान्तमस्य जनस्य यौवनावलेपादगणितत(पो)व्ययमुपशमविरुद्धमवदानमुदाहरति ।

विश्राम्यन्त्वधुना निषङ्गशयने शस्त्राणि दैत्यद्विषां
शप्त्वा किं तपसो व्ययेन मुनयः शाम्यन्तु वाचंयमाः ।
त्रैलोक्याभयदक्षिणे शतमखप्रीत्ये शरप्रस्तर-
प्रस्तोर्णे रिपुमेधनामनि भवानस्त्वध्वरे दीक्षितः ॥२५॥

मेधा०—

जुज्जइ । किं उण अकअत्थो जुअराओ ?

[युज्यते । किं पुनरकृतार्थो युवराजः ?]

गाल०—

आः ! कथमकृतास्त्रमकृतार्थं वा शंससि युवराजम् । उपदिशामि तावदखिलाः साम्परायिकीर्विद्या वत्साय । (इति नाट्येन विद्या उपदिशति ।)

मेधा० (विलोक्य सभयम्)

हद्धी ! हद्धी ! एअओ पडित्तविज्जुलाकडारवअणमण्डलाओ मज्झण्हचण्डरस्सिसहस्सप्पचण्डाहि सरीरकिरणच्छडाहि पूरेन्ति णहमण्डलं रक्खसमहिलाओ ता रक्खउ मं उअज्झाओ । (इति गालवाङ्के निलीयते ।)

[हा धिक् ! हा धिक् ! एताः प्रदीप्तविद्युत्कडारवदनमण्डला मध्याह्नचण्डरश्मिसहस्रप्रचण्डाभिः शरीरकिरणच्छटाभिः पूरयन्ति नभोमण्डलं राक्षसमहिलास्तद्रक्षतु मामुपाध्यायः ।]

गाल०—

वत्स ! न भेतव्यम् । एताः खलु शस्त्रविद्या युवराजमुपतिष्ठन्ते । आयुष्मन् कुवलयाश्व ! प्रणम्यतान्तावदमूर्विद्याः ।

सर्पिर्बिन्दुमिवार्णवाम्बु वमितुं लेढुं समर्थास्तथा
ब्रह्मस्तम्बममुं मृदो घटमिव स्रष्टुं प्रमार्ष्टुं क्षमाः ।
ता एताः समये स्मृतास्तव पुरः स्थास्यन्ति यासामसा-
वेकैकाप्यखिलं जगत्प्रमथितुं त्रातुञ्च पर्याप्यते ॥२६॥

मेधा० —

जुअराअ ! बलिअं भाआमि । विसज्जेसु दाणिं दुट्ठदासीओ विज्जाओ ।

[युवराज ! बलवद् बिभेमि । विसर्जयेदानीं दुष्टदासीर्विद्याः ।]

कुव०—

भो भो भगवत्यो विद्याः ! नमो भगवतीभ्यः, साधयत सति समये दर्शनाय ।

गाल०—

वत्स माण्डूक्यायन ! जातं निर्मक्षिकमुन्मीलय चक्षुषी ।

मेधा०—

दाणिं पच्चागअप्पाणो म्हिति पुच्छिहमि किम्पि जुअराअं । जुअराअ ! तुम्हेहिं क्खत्तिएहिं वंको धणुदण्डो किं ति धारिज्जइ ? णं जहा मम परममित्तो रत्तिअडवीविहारणिमित्तो उज्जुओ दण्डो तह च्चेअ धारेसु ।

[इदानीं प्रत्यागतप्राणोऽस्मीति प्रक्ष्यामि किमपि युवराजम् । युवराज ! युष्माभिः क्षत्रियैः वक्रो धनुर्दण्डो किमिति धार्यते ? ननु यथा मम परममित्रं रात्र्यटवीविहारनिमित्तकः ऋजुको दण्डस्तथैव धारय ।]

कुव०—

दूरप्रहारिणो वयमृजुना सविधप्रहारिणा दण्डेन न स्वकर्म साधयितुमीश्महे ।

मेधा०—

ता देसु मे दूरप्पहारिणं धनुअं, इमिणा रुक्खाग्गट्ठिअं इमं वाणरं हणिस्सम् ।

[तद्दत्स्व मे दूरप्रहारिणं धनुः, अनेन वृक्षाग्रस्थितमिमं वानरं हनिष्यामि ।

गाल०—

वत्स ! किमपराद्धमनेन तव वानरवराकेण ?

मेधा०—

मम भिक्खणं घेत्तूण वडाओ रुक्खमारुहइ । पठन्तस्स मम वअणं विविहेहि विआरेहि विडंवेइ । ता जाव ण वडाअइ ताव देसु मे जुअराअ ! धणुअं णं हणिस्सम् ।

[मम भिक्षान्नं गृहीत्वा वराको वृक्षमारोहति । पठतो मम वचनं विविधैर्विकारैर्विडम्बयति । तद्यावन्न पलायते तावद्वत्स्व मे युवराज ! धनुर्ननु हनिष्यामि ।]

कुव०—

किमनेन धनुषा भवत्यार्यस्य ? न खलु स्वयमिदं धनुर्दूरमेत्य हन्तव्यं हन्ति किन्त्वनेन नुन्नः शरः ।

मेधा० (विहस्य)—

ता किं इमिणा धणुणा ? किं सरेण ? एसो मुणिअणणीवारसंविहाअपुट्ठो दुट्ठवाणरो पकट्ठथोरदण्डप्पहारेण वि ण मरइ । तस्स अंगुलिअग्गकिसेण णिवडन्तेण वि सरेण कीस काअव्वम् ?

[तत्किमनेन धनुषा ? किं शरेण ? एष मुनिजननीवारसंविभागपुष्टो दुष्टवानरः प्रकोष्ठस्थूलदण्डप्रहारेणापि न म्रियते । तस्याङ्गुल्यग्रकृशेन निपततापि शरेण किं कर्तव्यम् ।]

कुव०—

आर्य ! शराः शरीरं प्रविश्य प्राणैर्वियोजयन्ति ।

मेधा०—

अलिअं मन्तेसि । केत्तिआइं लआणं पिहुलाइं मूलाइं मुहमग्गेण मह सरीरे पइट्ठाइं ण उण अहं मुओ । जइ ण कुप्पसि ता सअले वि तुह सरे चव्वेमि ।

[अलीकं मन्त्रयसे । कियन्ति लतानां पृथुलानि मूलानि मुखमार्गेण मम शरीरे प्रविष्टानि न पुनरहं मृतः । यदि न कुप्यसि तदा सकलानपि तव शरांश्चर्वयामि ।]

(नेपथ्ये)

शुभाय सायन्तनी सन्ध्या कुमारस्य !

प्रतिपदमवसन्नैर्मुच्यमानं प्रतापैः
मलिनमनुसृतोऽसावुज्झिताशैर्मयूखैः ।
तव रिपुरिह ताम्यन्नस्तमासादयिष्यन्
न तपति नयनानि स्वेन सन्तप्यतेऽर्कः ॥२७॥

मेधा०—

अविद ! अविद ! कहाबन्धप्पसङ्गेण विम्हरिओम्हि । वइआलिअवअणेण मए वि म्हरिअं । पच्चुगामिस्सं दाव रण्णादो पडिणिअतन्तिं होमधेणुं धवलम् । (परिक्रम्य) धवले ! धवले ! (दृष्ट्वा) ही ही भो ! पण्हविअं पिज्जंतं एक्कं मो(क्का) चूसइ अवरम् । पाहुं महइ ण सक्कइ धेणुथणे चारि वछडओ । (सविषादम्) हो रे ! हओम्हि । णहु दोहणीए गब्भे धेणुथणे ण क्खु ण क्खु वच्छमुहे दुद्धाइं घडोद्धीए पुहवीधूलिम्मि णिवडन्ति । होउ एअं दुट्ठवछडअं णिग्गहिऊण हवेमि । (उपसृत्य, वत्सचरणप्रहारं नाटयित्वा) हीमाणहे ! खुडिओ मे गोड्डो इमिणा दुट्ठवछडेण । आ दासीपुत्तवच्छड ! आः कस्सिंपि आगए सोत्तिअपाहुणे तुमं च्चेअ पुढमं आलहिस्सम् ।

[अविद ! अविद ! कथाबन्धप्रसङ्गेन विस्मृतवानस्मि । वैतालिकवचनेन मयापि स्मृतम् । प्रत्युद्गमिष्यामि तावदरण्यात्प्रतिनिवर्तमानां होमधेनुं धवलाम् । धवले ! धवले ! ही ही भो ! प्रस्नुतं पीयमानमेकं मुक्त्वा चूषत्यपरम् । पातुमिच्छति न शक्नोति धेनुस्तनांश्चतुरो वत्सकः ! हो रे ! हतोऽस्मि ! न खलु दोहिन्या गर्भे धेनुस्तने न खलु न खलु वत्समुखे दुग्धानि घटोध्न्याः पृथिवीधूलौ निपतन्ति । भवत्वेनं दुष्टवत्सकं निगृह्य स्थापयामि आः कष्टम् ! खण्डितो मे पादोऽनेन दुष्टवत्सकेन । आः दासीपुत्रवत्स ! आः ! कस्मिन्नप्यागते श्रोत्रियप्राघुणिके त्वामेव प्रथममालप्स्ये ।]

गाल०—

वत्स ! निवर्तस्व, पिबतु वराको यथेष्टमात्मजननीस्तनम् । किममुनोपरुद्धेन ?

मेधा० (रुदन्मुखमागत्योपविशति । निःश्वस्य)

गहि रे दुट्ठवछडआ गहि । कल्लिं खाइहसि तणपूलअम् ।

[तिष्ठ रे दुष्टवत्सक ! तिष्ठ । श्वः खादिष्यसि तृणपूलकम् ।]

कुव०—

आर्य माण्डूक्यायन ! वत्सतरचरणप्रहारमन्युमधुनापि न मुञ्चसि । पश्य तावत् ।

गोगृष्टिमिष्टतरुपल्लवपूलकानां
भारेण रक्तमिव तापसधेनुशालम् ।
गावः प्रकामकपिलाः परिवृत्य दिग्भ्यः
सन्ध्याकडारमरविन्दसखं विशन्ति ॥२८॥

अपि च

द्रष्टव्यमिदमुदीक्षतामस्तगिरिग्रस्ताग्रभागमर्कमण्डलमार्यः ।
दिगन्तविवरान्तरप्रसृमरात्तमिस्रातम-
स्तिमेस्तिरयते भयाच्चरमशैलपृष्ठे मुखम् ।
नुदस्य च चतुर्दिशाकुहरमण्डले निह्नुते
स्वपादकुलमाकुलो गगनसिन्धुकूर्मो रविः ॥२९॥

मेघा० (निःश्वस्य)—

अव्वो ! किं कुणमु मन्दभाओ । एत्थ वणे कोवि भल्लुओ णत्थि सूरव्वअत्थसेलो जो कइलं वछडअं घिसइ ।

[अहो किं करवै मन्दभाग्यः ? इह वने कोऽपि भल्लूको नास्ति सूर्यमिवास्तशैलो यः कपिलं वत्सकं ग्रसति ।]

गाल०—

कथमसूयति वत्सतराय वत्सः । पश्यतु तावदवतमसोदयमलीमसमुद्भिन्नकतिपयबाष्पबिन्दुमुखमिदमदर्शनपथमवतरति भगवति हरित्पतौ हरितवाजिनि सरोजिनीजीवितेश्वरे विरहविधुरबाधितचेतसो वासवाशायाः ।

अहह ! मिहिरबिम्बं पानपात्रं वसूना-
मुपगतमपि पारेपूरमाकाशसिन्धोः ।
तिमिरतिमिरुदग्रग्रीवमुन्मुद्रतारे
क्षणपुटमुपसर्पन्नीक्षते मज्जयिष्यन् ॥३०॥

मेघा०—

अलाहि । किं मन्दावेसि । तमग्गहघिसिअपाओ जह बुड्डइ गअणसाअरे सूरो तह सो भञ्जिअगोडो बुड्डउ जउणाइ वछडओ ।

[अपेहि । किं मां दर्शयसि । तमोग्रहग्रस्तपादो यथा मज्जति गगनसागरे सूर्यस्तथा स भग्नपादो मज्जतु यमुनायां वत्सकः ।]

कुव०—

आर्य माण्डूक्यायन ! निभालय तावदाभिरामिकीमस्याः कलिन्दनन्दनायाः[1] ।

एतस्मिन् सरसि यमस्वसुर्दिनान्ते
रज्यन्तो मिहिरमरीचयः पतन्ति ।
व्याकीर्णा मरकतकुट्टिमे वसन्त-
क्रीडायामिव पटवासपांशुपूराः ॥३१॥

मेधा० (सकोपम्)—

अलाहि जुअराअ ! मुञ्च मिछावाचाडअत्तणं डड्ढउ[2] खेलणकअन्तो वसन्तो । कहिं पाइज्जइ वसन्ते पंसूतेहिं कीडिउम् ?

[अपेहि युवराज ! मुञ्च मिथ्यावाचाटत्वम् । दह्यतां खेलनकृतान्तो वसन्तः । कुत्र प्राप्यते वसन्ते पांशुभिः क्रीडितुम् ?

कुव०—

न खलु निश्चिनोमि किमपराद्धमार्यस्य वसन्तेन ?

गाल० (विहस्य)—

आयुष्मन् ! अवेहि । वसन्तमासोपनीतोऽयमध्ययनसातत्यबाधया विच्छिन्नशिशुक्रीडितः शिशिरान्तं सुखमिति जानाति । (अपवार्य) वत्सतरापराधमन्युना बलवदुत्ताम्यति मे वत्सो मेधातिथिः, तदन्यतः क्षिप तावदेनम् ।

कुव०—

आर्य मेधातिथे ! पश्य ।

एतावतापि भुवनभ्रमणेन यस्य
नासीदसीमतिमिरोद्धरणस्य खेदः ।

---

1. The correct form appears to be कलिन्दनन्दिन्याः and not कलिन्दनन्दनायाः
2. The transcript reads 'डट्टउ'

धिग्वारुणीपरिचयं यदमुत्र रक्तः
त्यक्त्वाम्बरं निपतति श्लथपादमर्कः ॥३२॥

मेधा०—

अहअं उण जाणिमि सव्वदिसो (त्थअक) कसतिक्खेहिं अक्खकक्कडओ कठिणंधआरकट्टणट्ठेहिं पडइ पाएहिं ।

[अहं पुनर्जानामि सर्वदिगवस्तृतकर्कशतीक्ष्णैः अर्ककर्कटकः कठिनान्धकारकर्तनत्रुटितैः पतति पादैः ।]

कुव० (निरूप्य)—

कथमयमस्तमित एव विवस्वान् !

आबद्धः सरसिरुहाञ्जलिर्विमुक्तं
वाष्पाम्भो विगलदलिच्छलात्तथापि ।
तिग्मांशौ गतवति दूनया नलिन्या
सोढव्यान्यहह ! कुमुद्वतीस्मितानि ॥३३॥

गाल०—

आयुष्मन् ! खलानि (?) खलु प्रतप्ता(नि?) खरमयूखेन खलीक्रियन्ते दोषाकरमित्राणि कुमुदानि । पश्य ।

मित्रव्यसनविहस्ते सहभुवि विनिमीलिते कमलषण्डे ।
धिङ् मत्सरं हसन्तो जाग्रति कुमुदाकरा रजनीम् ॥३४॥

मेधा०—

एव्वं णेदं, चक्कवाअजुआणाणं कलकरुणसरेण पडिरुवन्ताणं मुझइ भिसिणीसंडो कइरअसत्थो खलो हसइ ।

[एवमेतत्, चक्रवाकयूनां कलकरुणस्वरेण प्रतिरुदतां मुह्यति बिसिनीषण्डः कैरवसार्थः खलो हसति ।]

गाल०—

वत्स मेधातिथे ! जलमुपनय यमुनाकूलादभिषिच्य निर्वर्तयिष्यामि तृतीयसवनस्वाध्यायम् ।

मेधा०—

वलिअं वीहेमि संधन्तरे वाहिरं गमित्तं, जाणेमि दाणिं पि मआलसं हरन्तो दाणओ इह च्चिअ वट्टइ ।

[बलवद् बिभेमि सन्ध्यान्तरे बहिर्गन्तुं, जानामि इदानीमपि मदालसां हरन् दानव इहैव वर्तते ।]

कुव०—

भगवन् ! अपरिस्फुटमिदं वटुवचनमिच्छामि विविच्य वेदितुम् ।

गाल०—

अस्ति मदालसा नाम गन्धर्ववंशपर्वतोत्थिता लोकलोचनसन्तापशमनकादम्बिनी कन्यका यां किल कालदेशविप्रकर्षेऽप्यप्रतिहतप्रसरेण समाधिमयेन चक्षुषा मुनयो निरीक्षन्ते ।

अपि सागरसीमायाः सपत्नी भाविनी भुवः ।
एकदारव्रतवतः पुंसः पत्नी भविष्यति ॥३५॥ इति ।

कुव०—

किं ततः ?

गाल०—

सा किल कैलासशिखरोपवनसीमनि क्रीडन्ती प्रसह्य पातालकेतुनापहृत्य कनकपुरं प्रापिता ?

कुव०—

तत्किं परिणीतापि ?

गाल०—

नहि नहि । इतः पञ्चमेऽहनि तत्परिणयदिवसोऽध्यवसितः पातालकेतुना ।

कुव०—

तज्जानामि निस्पन्दमानमकरन्दबिन्दुसन्दोहसुन्दरमन्दारदामकोमले बलारिमूर्धनि वर्धमाना नास्य जनस्य विधिलिखितदुर्भगाक्षरगेहे[1] शिरसि पदमर्प-

1 The transcript reads गेरे

यितुमर्हति दुर्घटघटनपटीयसी गुरोराज्ञा यदियन्ति दिनानि 'बान्धवजनविरह-बाधामन्वभूद् वराकी कुलकन्यका ।

मेधा०—

ता उज्जुअं च्चेअ कीस ण भणासि मआलसं पच्चाहरिऊण विआहेमित्ति ।

(उत्तालं हसति ।)

[तदृज्वेव कथं न भणसि मदालसां प्रत्याहृत्य विवाहयामीति ।]

(नेपथ्ये)

(एकतः) अब्रह्मण्यम् ! अब्रह्मण्यम् !

क्रोधक्रूराक्षिचक्रः क्रकचखरखुरश्रेणिरुच्छून्नपुच्छो
मातङ्गोत्तुङ्गपृष्ठो विशति कुलपतेर्गालवस्याग्निशालाम् ।
घूरद्घोणाग्रघूर्णद्घनदशनघृणिर्घर्घरोद्गारिघासं
घट्टोद्घोष(ति) घोरः परिघगुरुचरद्दीर्घजङ्घो वराहः ॥३६॥

(अन्यतः) हा धिक् ! कथमक्षत्रिया वसुमती । परित्रायत रे ! परित्रायत ।

मुस्तास्तम्बानुकारं जटिलवटुशिरो दूरमुन्मूल्य बाला-
नुद्धृत्य भ्रूणकन्दं ग्रसति गुरुमतीगर्भनाडीमृणालम् ।
दंष्ट्राकोट्या कशेरुस्थपुटमिव यतेरुत्खनत्यक्षिमुद्रां
मायाकोलः प्रमथ्नन् मुनिकुलनलिनीमेति पातालकेतुः ॥३७॥

अपि च,

मन्ये पिण्डितमूर्त्तिर्वराहरूपेण कालरात्रिरियम् ।
प्रकृतिश्यामा धत्ते वदनमसृक्सन्ध्यया रक्तम् ॥३८॥

कुव०—

मा भैष्ट तपोधन ! मा भैष्ट । तिष्ठ रे पौत्रिगोत्रपांसनचरित्र ! तिष्ठ ।

प्रतीच्छ तावदर्धेन्दुबाणदंष्ट्रां द्वयाधिकाम् ।
तया संयमिनीसीमनलिनीकन्दमुद्धर ॥३९॥

---

1. The transcript reads घोरद्

(उत्थाय धनुषि शरसन्धानं नाटयति ।)

गाल०—

हा धिक् ! अयमस्मदभिमुखमेव धावति । तथा हि

विद्युत्काण्डकडारलोचनपुटच्छायाछटापाटलो
दंष्ट्रास्वस्तिकमण्डलो वलयितव्यालम्बिघोणाविलः ।
न्यञ्चत्केतुकबन्धनिःकवलितप्रयूषपूषोदर-
क्रूरः शंसति शौकरं त्रिभुवनोत्पाताय मायावपुः ॥४०॥

मेधा०—

हा ! कं पडिवज्जामि मन्दभाओ ? णिवडिओ मे उअज्झाओ इमस्स दुट्ठसूअरस्स पच्चग्गघिसिअमुणिगभिणीगभट्ठिघट्टणकडकडाअन्तविअडदाठा - करालं मुहकन्दरम् । (इति रोदिति ।)

[हा ! कं प्रतिपद्ये मन्दभाग्यः ? निपतितो मे उपाध्यायोऽस्य दुष्ट - शूकरस्य प्रत्यग्रप्रस्तमुनिगर्भिणीगर्भास्थिघट्टनकडकडायमानविकटदंष्ट्रा - करालं मुखकन्दरम् ।]

कुव०—

आर्य ! अलमावेगेन । अयमयं न भवति मायावराहः । (इति शरमोक्षं नाटयति ।

(नेपथ्ये)

विजयतां विजयतां कुमारकुवलयाश्वः ।

राहुर्वमन्निव चिरादतिमात्रमुक्तां
सन्ध्यानुरागकपिलां रविरश्मिधाराम् ।
बाणव्रणेन विसृजन्नसृजां प्रवाहा-
नेष द्रुतं द्रवति दूरतरं वराहः ॥४१॥

गाल०—

आयुष्मन् ! द्रवन्तमेनमनुद्रव कुवलयमारुह्य कनकपुरवसतिमेनं प्राणग्राहं हताशमनिगृह्य अनिवेद्य बान्धवजने मदालसां मा निवर्तिष्ठाः ।

कुव०—

यथाज्ञापयति भगवान् ।

गाल०—

वत्स ! अप्रमत्तः साधयिष्यसि तिमिरसङ्कुलेषु पातालविवरमार्गेषु । वेदैश्चतुर्भिरपि ये सततं चतुराननेन गीयन्ते ते चत्वारः सुरभेः स्तनाश्च पादाश्च पान्तु त्वाम् । (इति निष्क्रान्ताः सर्वे ।)

(इति द्वितीयोऽङ्कः)

Rashtriya Sanskrit Sansthan Deemed University Rajiv Gandhi Campus

अथ तृतीयोऽङ्कः

(ततः प्रविशति किङ्करो नाम दानवः ।)

किङ्करः (निःश्वस्य)—

पश्यत रे विधिविलसितविद्युतामाविर्भवन्ति तिरोभवन्ति च जन्तुषु विस्फुरितानि ।

प्रागेव द्रुमजङ्घदर्दुरदरीगर्भभ्रुकुंसादयो
भर्तुर्दुश्चरितक्रियाभिरथवा देवैर्न निर्वासिताः ।
शिष्टः पौरजनेषु यः परिजनः पातालकेतोरहं
धिग् धातुश्चरितानि सोऽपि न लभे द्वारि प्रवेशं पुरः ॥१॥

तत्कथमद्यापि न परावर्तते कनकपुरात्किङ्करी ?

विचरत्यसौ कुवलयाश्वसायकावलिधूमकेतुसमिधां किमध्वनि ?
अथवा, वधूषु करुणाम्बुधारया ज्वलन्त्योऽपि शान्तिमुपयान्ति हेतयः ॥२॥

तद्भवतु गोपुरं प्रविश्य धनुरास्फालनस्फूर्जथुना विस्फूर्जतो हताशकुवलयाश्वस्य नयनपथमतिक्रम्य पक्षद्वारवर्त्मनि स्थित्वा प्रतिपालयामि प्रेयसीम् ।

(इति परिक्रामति ।)

(नेपथ्ये)

अरे रे नेतारमाक्रोशत न पादपातध्वनिना प्रतिबोधयत नगरलक्ष्मीनिरीक्षणक्षिप्तचक्षुषममुं कुवलयाश्वहताशमिह प्रविशत शनैरनेककल्पसञ्चयघनीभवदन्धतमसपर्वतम् ।

कल्प (?) क्षयव्रततिबीजकुसूलिकेव
गाढान्धकारगिरिगर्भगुहेयमत्र ।
राजन्यपोतशरपातभयान्निलीय
पातालकेतुरतिवाहयति त्रियामाम् ॥३॥

किङ्करः (कर्णौ पिधाय)—

हा धिक् ! हा धिक् ! भयान्निलीय पातालकेतुः कालमतिवाहयतीत्यपि श्रावितमविधेयविधानेन विधिना । (सकोपमाकाशे) अरे निसर्गतुच्छ ! निरस्तमर्याद ! भूताधम ! दुरात्मन् ! आकाशं कथमनेन देवस्य दानवपतेः परिवादशब्देन विगतान्यगुणविशेषमात्मानं गुणवतां पदे प्रतिष्ठापयितुमिच्छन्न बिभेषि । अथवा,

दनुकुलतिलकस्य स्वामिनोऽयं प्रमादो
घटमिव न यदेष त्वामशेषं पिपेष ।
त्वयि गतवति सत्त्वध्वंसमाकाश ! कस्मा-
दतिकटुरभविष्यल्लोकनिर्वादवर्णः ॥४॥

(नेपथ्ये)—

प्राप्तास्ते द्रुमजङ्घदर्दुरदरीगर्भभ्रुकुंसादयः

किङ्करः —

साधु रे ! साधु, यन्निकृतप्रोषिता दनुवंशवर्धनावसानसमये देवमनुसरन्ति ।
भृत्याः सच्चरिताः स्मरन्ति निकृतिं न स्वामिनामापदि ।

(नेपथ्ये)

शत्रोर्निगममार्गमन्धतमसे रुन्धन्त्यमी सायुधाः

किङ्करः —

सुश्लिष्टः शत्रुवधोपायोऽयमितरथा हि,
डिम्भः क्षत्रियबन्धुराजवविधौ साङ्ग्रामिके दुर्जयः ॥५॥

(विमृश्य)—

तदहमप्यमीषामेकतमो भवामि वैरिनिधनाय कूटप्रधने । न पुनरद्यापि परावर्तते किङ्करी । न चेह महति राजविप्लवे तारमाह्वातुमपि शक्यते ।

(प्रविश्य सम्भ्रान्ता) दानवी—

अले ले भश्टके किङ्कले ! एशंह्मि हके । कीश पाशे चिश्ठन्तिं मं ण पशुएशि ।

[अरे रे भर्तः किङ्कर ! एषास्म्यहम् । किमिति पार्श्वे तिष्ठन्तीं मां न पश्यसि ।]

किङ्करः —

अयि प्रियतमे किङ्करि ! सद्योव्रणप्ररोहणमोषधिपाकसंस्कृतमिङ्गुदीतैलमाहर्तु-मासीः प्रेषिता कनकपुरम् । किमिति चिरायमाणया त्वया चिरतरमनुभावितो बाणव्रणवेदनां देवो दनुवंशवर्धनः ।

किङ्करी—

भश्टके ! केश्श पव्वदिते वणप्पलोहणो तेल्ले ? भण्डालघलवाशम्मि भम्मदि शे हदाशे दाणअकडंते क्खत्तिअकुमाले ।

[भर्तः । कुत्र प्राप्यते व्रणप्ररोहणं तैलम् ? भाण्डारगृहपार्श्वे भ्रमति स हताशो दानवकृतान्तः क्षत्रियकुमारः ।]

किङ्करः —

दुरुद्धरा तर्हि देवस्य व्रणवेदना ।

किङ्करी —

कीश वुच्चदि देव्वाह वणविअणत्ति ! णं वंशबुड्ढाइ दणूए हडक्कविअणा दुलुद्धलेति भणाहि । (इति रोदिति ।)

[किमुच्यते देवस्य व्रणवेदनेति ! ननु वंशवृद्धाया दनोर्हृदयवेदना दुरुद्धरेति भण ।]

किङ्करः —

कथमबलास्वभावसुलभोऽयमुन्मूलयति तव धृतिमावेगः ?

वक्षःपीनशिलाभिघातवलितेनोत्सर्पता पार्श्वतो
वीरश्रीकरजक्षतानि लिखता जम्भारिदम्भोलिना ।
भद्राम्भोधरधाम्नि यत्र रुचये न्यस्ताः स्थिरा विद्युतः
तस्यादद्यापि जगत्त्रयं विजयते पातालकेतोर्भुजः ॥६॥

किङ्करी —

भोदु एव्वं देव्वाह पाआलकेदुश्श बाहुबले । हके पुणो जाणे जादं ताह क्खत्तिअडिम्भाह अप्पाण वप्पकेलके कणअपुले जा किल फुट्टन्तपउमपत्त-दीहलाहिं ओट्ठम्भणिमलाहिं डिट्ठीहिं तुलन्तेव्व शअलं णअलवलअं शे क्खत्तिअदालए दिट्ठे ता तक्केमि घिशि एमिणा दइच्चदाणअकुलेत्ति ।

[भवतु एवं देवस्य पातालकेतोर्बाहुबलम्, अहं पुनर्जाने जातं तस्य क्षत्रिय-डिम्भस्यात्मनः पितृस्वं कनकपुरं यत्किल स्फुटत्पद्मपत्रदीर्घाभ्यामवष्टम्भ-

निर्भराभ्यां दृष्टिभ्यामतुलयन्निव सकलं नगरवलयं स क्षत्रियदारको दृष्टस्तत्तर्कयामि ग्रस्तममुना दैत्यदानवकुलमिति ।]

किङ्करः —

अपि क नाम भवत्या स्थितं यतोऽयमवलोकितो दनुकुलकृतान्तः ?

किङ्करी —

भट्टके ! मदालशाणिवाशपाशादम्मि ।

[भर्तः ! मदालसानिवासप्रासादे ।]

किङ्करः —

अयि विदुषि ! दुश्चरितविपद्रुमस्य देवस्य कुलकन्यकाजनापहरणकुहुमे युज्यत एवायं शिलीमुखपातः । फलमचिरादालोकयिष्यसि । तदेहि सकलमपि वृत्तं देवाय निवेदय । (इति निष्क्रान्तौ ।)

(मिश्रविष्कम्भकः)

(ततः प्रविशति मदालसा कुण्डला च ।)

मदा० —

हला कुण्डले ! सच्चअं च्चिअ सो हआसो करस वि सुगहिअणामस्स सरेण विद्धो ?

[सखि कुण्डले ! सत्यमेव स हताशः कस्यापि सुगृहीतनाम्नः शरेण विद्धः ?]

कुण्ड० —

आः ! किमनृतमपि मया कदाचिन्मन्त्रितासि ? कथं च सुरभिमपि गोमातरमनृतवादिनीं मन्यसे यया किल वरि(व)स्यावसाने स्वयमाविर्भूतया वरेण छन्दितासि ?

"मर्त्यलोकमनुप्राप्य य एनं भेत्स्यते शरैः ।
स ते भर्ता महाभागे ! नचिरेण भविष्यसि ॥७॥" इति ।

मदा० (सास्रम)—

होउ णाम सुरही सच्चवाइणी तह वि णत्थि मह मन्दभाइणीए जीविये सलाहेति अणुमणउ मं पिअसही इमे गलिअलज्जे पाणे परिच्चइऊण णिव्वुदा होमि ।

[भवतु नाम सुरभिः सत्यवादिनी तथापि नास्ति मम मन्दभागिन्या जीविते श्लाघेत्यनुमन्यस्व मां प्रियसखी इमान् गलितलज्जान् प्राणान् परित्यज्य निर्वृता भवामि ।]

1 The transcript reads-प्राप्त

कुण्ड०—

शान्तम्,

अमी सोढा गूढव्रणवदविषह्याः परिभवाः
व्यतिक्रान्ता दीर्घव्यसनगुरवस्ते च दिवसाः ।
अवश्यंनश्यत्सु प्रियसखि ! सपत्नेषु सुरभि-
प्रसादादासन्नेऽभ्युदयदिवसे किं प्रलपसि ॥८॥

मदा० —

हला कुण्डले ! ण णिवडिआसी दिसन्तमणहरस्स परिणामदुस्सहस्स किअवस्स विप्पलम्भेन्दजालिआसु, जहिच्छं भणाहि गआ व्वसणवासरा त्ति ।

[सखि कुण्डले ! न निपतितासि दृश्यमानमनोहरस्य, परिणामदुस्सहस्य कितवस्य विप्रलम्भेन्द्रजालिकासु, यथेत्थं भणसि गता व्यसनवासरा इति ।]

कुण्ड० (साकूतम्)—

अपि दर्शनादृते दानवहताशात् केन कितवेन विप्रलब्धासि ?

मदा०—

हला ! सुमर सुमर जस्स विअड्ढवअणसूइअरहस्साए तुए ईसिं हसिऊण अवहीरिअ मे करकिसलयञ्जलिं चिरं परिच्चत्तम्हि ।

[सखि ! स्मर स्मर यस्य विदग्धवचनसूचितरहस्यया त्वया ईषद्धसित्वा अवधीर्य मे करकिसलयाञ्जलिं चिरं परित्यक्तास्मि ।]

कुण्ड०—

नाहमीषदपि स्मरामि ! कथय मया कुत्र कदा परिहासवशादपि निमिषमपि प्रभवन्त्या परित्यक्तासि ?

मदा०—

अलाहि, हला ! ण तुए मन्तिस्सम् । जा तुमं कल्लिं चिअ मालिणीकूल-पमअवणे दुव्विणीअस्स तस्स वअणेण मं परिच्चअन्ति एण्हिं भणासि कइआ मए परिच्चतासिति ।

[अप्रेहि, सखि ! न त्वया मन्त्रयिष्ये । या त्वं ह्य एव मालिनीकूलप्रमद-वने दुर्विनीतस्य तस्य वचनेन मां परित्यजन्ती इदानीं भणसि कदा मया परित्यक्तासीति ।]

कुण्ड०—

अयि ! किमुन्मादस्तव चेतनामन्तरयति ? चिरोषितासि कनकपुरे, क पुन-रिह हेमकूटशिखरोपकण्ठकूलङ्कषा मालिनी ?

मदा० (चिरमनुध्याय)—

ता होज्ज सिविणअदिट्ठो विणअहरो एसो वुत्तन्तो ?

[तद् भवेत्स्वप्नदृष्टो विनयहर एष वृत्तान्तः ।]

कुण्ड०—

कथयाशेषकथाम् । कीदृशः स्वप्नवृत्तान्तः ?

मदा०—

दाणिं पि दीसइ । हला ! डोलइ णअणग्गपुत्तलीलग्गो, णज्जइ गदु(ओ) ण दूरे कहिं पि इह वट्टए किअवो तेण हि कीस भणमु वुच्चन्तं जइ हिअअलहुत्तणं णणेज्ज जणो । अहवा मुसिअहिअओ सो किं हिअअं ण लक्खेइ ।

[इदानीमपि दृश्यते । सखि ! दोलयति नयनाग्रतारिकालग्नः, ज्ञायते गतो न दूरे कुत्राप्यत्रैव वर्तते कितवस्तेन हि कथं भणाम्युच्यमानं यदि हृदयलघुत्वं जानीयाज्जनः । अथवा मुषितहृदयः स किं हृदयं न लक्षयति ।]

कुण्ड०—

हला मदालसे ! बलवदाक्षिप्तचित्ता वर्धयसि मे श्रवणकौतुकम् ।

मदा०—

सुणउ पिअसही । कल्लिं किल सिविणन्तरे तहिं मालिणीकूलपेरन्तपउमराअसिहरसोहावालमिहिराअवेहिं णिरन्तरणिणिद्दणलिणकाणणाए अमुणिअचक्कआअमिहुणविरहविलविअविणाए पमअवणणलिणीए दाहिणपवणजज्जरिज्जन्तसलिलसीकरासारसिसिरफलिहसिलाअलासणम्मि मालदीलआमण्डवे सह तु(ए) कइरअपराअधूलिआइ खेलिउं पउत्ता आसिं ।

[शृणोतु प्रियसखी । ह्यः किल स्वप्नान्तरे तत्र मालिनीकूलपर्यन्तपद्मरागशिखरशोभाबालमिहिरातपैः निरन्तरनिर्निद्रनलिनकाननाया अज्ञातचक्रवाकमिथुनविरहविलपितवेदनायाः प्रमदवनं नलिन्या दक्षिणपवनजर्जरीक्रियमाणसलिलशीकरासारशिशिरस्फटिकशिलातलासने मालतीलतामण्डपे सह त्वया कैरवपरागधूलिकाभिः क्रीडितुं प्रवृत्ता आसम् ।]

कुण्ड०—

हला मदालसे ! धन्यासि यया त्वया कमलकाननधूलिसंविभागकलहमुखरयोरावयोरविरतेषु पांशुक्रीडितेषु साक्षी स्वप्नचक्षुषापि साक्षादकारि दैवव्यसनदूरान्तरितो मालतीलतामण्डपः । (सास्रं निःश्वस्य) अयि मेधाविनि !

किं नाम विस्मरसि जातलताविताने
तत्रोपनीय नलिनीकलहंसपोतम् ।
तातेन ते कृतकमन्युरकाण्डचण्डि !
निर्द्धूतलालनशतोऽपि विनोदितोऽभूत् ॥९॥

मदा०—

हला ! कीस मं मन्दभाइणिं मम्मच्छेअविहलविहुलंखलं करेसि ? कइआ वि ण सुमरेमि णिसंसाअट्ठाणवडणणिप्पलाइं आवुअवच्छलाइं जा आवुएण एत्तिआइं दिणाइं विरहिआ वि धरेमि (इति रोदिति ।)

[सखि ! कथं मां मन्दभागिनीं मर्मच्छेदविह्वलविशृङ्खलां करोषि ? कदापि न स्मरामि नृशंसस्थानपतननिष्फलानावुकवत्सलान् यदावुकेनैतावन्ति दिनानि विरहितापि ध्रिये ।]

कुण्ड०—

सखि ! समाश्वसिहि । सन्ति खलु निरवसानदीर्घे संसारवर्त्मनि व्यसन-कान्ताराः ।

मदा० (समाश्वस्य)—

णं भणामि णहि आवुअस्स, ण मे आवुओ । मा क्खु ममम्मि वद्धवेरो विही मम मग्गेण आवुए व्वसणं संकामेज्ज ।

[ननु भणामि नहि आवुकस्य, न मे आवुकः । मा खलु मयि बद्धवैरो विधिर्मम मार्गेणावुके व्यसनं संक्रामेत् ।]

कुण्ड०—

अलमसाम्प्रतोचितया चिन्तया । कथय स्वप्नवृत्तान्तमुपक्रान्तम् ।

मदा०—

सुणउ पिअसही । तदो णिभरकीलारसविच्छेअसमअपसरंतदिट्ठिआइ मए कोइ दिट्ठो लआमण्डअं पविसन्तो दरदलन्तकंदोट्टदामसामलसरीरसिरी विसमसरसरासणगुणत्थणिअवित्थरवलाहओ लिहिअलोहिअरेहाविचित्तपेरंत-णेत्तपुण्डरीअतणू चित्तलिअजणमणंगणो अगणेअगुणगणो माणुसजुआणो ।

[शृणोतु प्रियसखी । ततो निर्भरक्रीडारसविच्छेदसमयप्रसरद्दृष्टया मया कोऽपि दृष्टो लतामण्डपं प्रविशन् दरदलन्नीलोत्पलदामश्यामलशरीरश्रीर्विषमशरशरासनगुणस्तनितविस्तरबलाहको लिखितलोहितरेखाविचित्रपर्यन्तनेत्रपुण्डरीकतनुश्चित्रितजनमनोगणोऽगणेयगुणगणो मनुष्ययुवा ।]

कुण्ड०—

अपि नाम जातिममुष्य निरचैषीः ?

मदा०—

हुँ सखि ! सो उण वलामोडिअ गहिअरिउलच्छीधम्मिल्लउव्वेट्ठ(ण)-वखलिअकुन्तललआहिं वइरिकुलडहणपडित्तपआवपावअधूमसलाआहिं धणुग्गुण-घट्टणकिणपरंपराहिं चित्तलिअपओट्ठो वखत्तिओ त्ति मए लविखओ ।

[हुँ सखि ! स पुनर्बलात्कृत्य गृहीतरिपुलक्ष्मीधम्मिल्लोद्वेष्टनस्खलितकुन्तल-लताभिः वैरिकुलदहनप्रदीप्तप्रतापपावकधूमशलाकाभिः धनुर्गुणघट्टनकिण-परम्पराभिश्चित्रितप्रकोष्ठः क्षत्रिय इति मया लक्षितः ।]

कुण्ड०—

ततस्ततः ?

मदा०—

तदो तं पलुअंतीए मम ण कइआ वि दिट्ठो ण पठिओ ण सिक्खिओ ण तुए ण केण वि पिएण जणेण उअदिट्ठो ण जाणामि कुदो केण मग्गेण हिअअं पइट्ठो पुढमो विआरो जेण पासट्ठिअं तुमं पि ण लक्खीअं केत्तो अत्ताणअम् ।

[ततस्तं प्रलोकयन्त्या मम न कदापि दृष्टो न पठितो न शिक्षितो न त्वया न केनापि प्रियेण जनेनोपदिष्टो न जानामि कुतः केन मार्गेण हृदयं प्रविष्टः प्रथमो विकारो येन पार्श्वस्थितां त्वामपि नालक्षयम् कुत आत्मानम् ।

कुण्ड०

हला मदालसे ! हरति चेतनामासन्नः प्रियजन इति गृहिण्यः कथयन्ति । ततस्ततः ?

मदा०—

तदो तस्स वि ममम्मि णिवडिआ मम्महविआरभारगरुइओ दीहसदिट्ठीओ, जाहि फलिहसिलापट्टमंसलाहिं उवहोआसणिभरणिअन्तिआ पझरंतसेअ-सलिलणिज्झरा जोण्हामङ्कवुड्ढाचन्दमणिपुत्तलिआ विअ फंदिउ ण शक्कीअम् ।

(ततस्तस्यापि मयि निपतिते मन्मथविकारभारगुर्व्यौ दीर्घे दृष्टी, याभ्यां स्फटिकशिलापट्टमांसलाभ्यामुभयावकाशनिर्भरनियन्त्रिता प्रस्विद्यमान-

स्वेदसलिलनिर्झरा ज्योत्स्नाचमत्कारमग्ना चन्द्रमणिपुत्रिकेव स्पन्दितुं नाश-क्नुवम्)

कुण्ड०—

इदमिह वितर्कयामि ।

स्नेहाम्बुनः परिवहः प्रमदाजनस्य
स्वेदस्रवो वहति यद् दयितावलोके ।
कामातपेन तपता द्रवतामुपेत्य
स्थैर्यं तदुज्झति दृढापि मनोहिमानी ।।१०।।

मदा०—

तदो सो चिरणिरूढप्पणओव्व मह पासं पसरिउमाढत्तो ।

[ततस्स चिरनिरूढप्रणयइव मम पार्श्वं प्रसर्तुमारब्धवान् ।]

कुण्ड०—

ततस्ततः ?

मदा०—

तदो तस्सिं केण वि अदिट्ठपारपेरंते अणु (रा)असाअरे उक्कलिआगब्भलुक्का वि ईसि मुहं दावीअ लज्जाकच्छई जेण तस्स सुहअस्स मुहचन्दजोसिणी-पंकखुप्पिअं कहकहवि लोअणहरिणं उक्खिविऊण परावट्टिउं वलिआ आसिम् ।

[ततस्तस्मिन् केनाप्यदृष्टपारपर्यन्तेऽनुरागसागरे उत्कलिकागर्भलीनापि ईष-न्मुखं दर्शयन्ती लज्जाकच्छपी येन तस्य सुभगस्य मुखचन्द्रज्योत्स्नापङ्क-मग्नं कथंकथमपि लोचनहरिणमुत्क्षिप्य परावर्तितुं वलिता आसम्]

कुण्ड०—(सविस्मयम्)—

कथमियमसितधवलाप्यनुरागं प्रसूते दृष्टिः । अथवा, स्वभाव एवायमस्या यदनुराग इति नाम ।

प्रिये जने वैरिणि वा निविष्टा
पयोऽभिषिक्ता रजसाभिभूता ।
मैरेयरूढप्रमदार्द्र निद्रा—

मूढा च रागं न जहाति दृष्टिः ॥११॥

मदा०—

तदो सविभमं वलिऊण परम्मुहेण मुहेण जा(व) अण्णादो प्पसरामि ता(व) णिरुद्धा मे चरणा तेण दीहाउणा णेउरकोडिलग्गेण कलहंसच्छावएण ।

[ततः सविभ्रमं वलित्वा पराङ्मुखेन मुखेन यावदन्यतः प्रसरामि तावन्निरुद्धौ मे चरणौ तेन दीर्घायुषा नूपुरकोटिलग्नेन कलहंसशावकेन ।]

कुण्ड०—

हला मदालसे ! दलयति मम हृदयमिदमद्यापि यदसौ तव क्रीडनक-कलहंसशिशुरचेष्टत त्वदपहरणदिवसावसानक्षणेषु ।

मामालोक्य सबाष्पदीनवदनामेकाकिनीमागता-
मभ्युद्गन्तुमसौ जगाम भवतीमारामसीमावधि ।
प्राचीनासु भवद्गतागतपदश्रेणीषु पर्यायतो
गत्वागत्य निनाय वासरदलं मुग्धो मरालार्भकः ॥१२॥

मदा०—

हा जाद ! तुमं च्चिअ सोचेमि, मए विणा को वच्छं लालइस्सइ । तुं कस्स हंसच्छाव अवेक्खावेंतस्स पउमपत्ताइं रतुप्पलदलमुद्धो अंगुलिअग्गं पि डंसिहसि ।

[हा जात ! त्वामेव शोचामि, मया विना को वत्सं लालयिष्यति ? त्वं कस्य हंसशावक ! अवेक्षमाणस्य पद्मपत्राणि रक्तोत्पलदलमुग्धाङ्गुल्यग्राण्यपि दक्ष्यसि ?]

कुण्ड०—

सत्यमस्मि स्मारिता तस्मिन् पतङ्गपोते तव वत्सलविलसितानि ।

मुग्धो हंसशिशुस्तव प्रियसखि ! व्याकोशरक्तोत्पल-
भ्रान्त्या पाणिमशोककोरकरुचा चञ्चूपुटेनादशत् ।
नाक्षिप्तो न करं विधूय विधृतः सीत्कृत्य न त्रासितो
वत्से(ा) वत्सलया त्वयाङ्गुलिदलैरुन्नीय कण्ठे कृतः ॥१३॥

मदा०—

हा वच्छ हंसच्छावअ ! होहिइ दिअहो जस्सिं फुरंतपक्खंकुरो कुरकुरंतो मह मन्दभाइणीए कंठे उडिऊण लग्गिहसि ।

[हा वत्स हंसशावक ! भविष्यति दिवसो यस्मिन् स्फुरत्पक्षाङ्कुरः शब्दायमानः मम मन्दभागिन्याः कण्ठे उड्डीय लगिष्यसि ।]

कुण्ड०—

किमप्रकृतमाशंससि ? कथय किमचेष्टत त्वयि मरालबालावरुद्धगमनायामसौ सुभगजनः ?

मदा०—

हुँ सहि ! विसुमरिआ मए रसंतरेण सा कहा । सुणाहि । तदो तेण ईसि हसिऊण तुं सि भणिआ—"सहि कुण्डले ! ण जुज्जइ जं तुह सही विसमेसु मिहिराअवेसु जूरइ ता तुमं च्चिअ लआगुम्मंतरे चिणेहि कुसुमाइं" ति ।

[हुँ सखि ! विस्मृता मया रसान्तरेण सा कथा । शृणोतु । तदा तेनेषद्धसित्वा त्वमसि भणिता—"सखि कुण्डले ! न युज्यते यत्तव सखी विषमेषु मिहिरातपेषु खिद्यते तत्त्वमेव लतागुल्मान्तरे चिनु कुसुमानि" इति ।]

कुण्ड०—

अहो सुश्लिष्टवचनो राजन्यदारकः । ततस्ततः ?

मदा०—

तदो तस्स दुव्विणअसाहसव्ववसाइणो वअणेण ईसिविहसिअमुहीए कुसुमावचअव्ववएसपसरिआए तुए ओहीरिया मह कइया वि अणवहीरिअपुव्वा णिअत्तणपरा पणामंजलिणो अन्तरिआसि कठिणहिअआ लआविआणेहिं ।

[ततस्तस्य दुर्विनयसाहसव्यवसायिनो वचनेनेषद्विहसितमुख्या कुसुमावचयव्यपदेशप्रसृतया त्वयावधीरिता मम कदाप्यनवधीरितपूर्वा निवर्तनपराः प्रणामाञ्जलयोऽन्तरितासि कठिनहृदया लतावितानैः ।]

कुण्ड०—

अहह नृशंसमतिदुःश्रवमिदं श्रूयते ।

आ स्तन्यत्यजनदिनादभूतपूर्वं

यत्पूर्वं दनुकुलपांशुलेन सृष्टम् ।
विश्लिष्टा क्षणमसुया मदालसेति
स्वप्नस्तत्प्रथयति लक्ष्म कुण्डलायाः ॥१४॥

मदा०—

हला मह मन्दभाइणीए पडिऊलेण देव्वेंदआलिएण किंव्व अच्छेरं ण दाविअं ? को क्खु संभावेंतो आसि सिविणए वि मदालसं कुण्डला परिहरिस्सइ त्ति ?

[सखि ! मम मन्दभागिन्याः प्रतिकूलेन दैवेन्द्रजालिकेन किमिवाश्चर्यं न दर्शितम् ? कः खलु सम्भावयन्नासीत् स्वप्नेऽपि मदालसां कुण्डला परिहरिष्यतीति ?]

कुण्ड०—

भवतु, सोढमिदमपि । कथयाग्रतः ।

मदा०—

तदो मम तेण हंससिसुणा गमणस्स गग्गदेण वअणस्स अ विप्पडीवत्तणे प्पडिसिद्धे अप्पडिहअदुव्विणअव्ववसाओ सो धुत्तो हंसअकोडिप्पडिलग्ग-हंसमुहविहडणमिसेण पाए सणिअ उड्डिऊण मह हिअअमारुहंतस्स तस्स गाहणव्ववएसेण णीविगुणे परामुसंतो आसि ।

[ततो मम तेन हंसशिशुना गमनस्य गद्गदेन वचनस्य च विप्रतीपत्वे प्रतिषिद्धे अप्रतिहतदुर्विनयव्यवसायः स धूर्तो हंसककोटिप्रतिलग्नहंसमुख-विघटनमिषेण पादे शनैरुड्डीय मम हृदयमारोहतस्तस्य ग्रहणव्यपदेशेन नीविगुणं परामृशन्नासीत् ।]

कुण्ड०—

अहो अनार्यमनार्यं । ततस्ततः ?

मदा०—

तदो जाव विउणवाहुदंडवेट्ठणपरवसमिमं जणं सो जणो पच्चग्गसोहग्गलच्छी-विआहवेदिमंसले चोद्दहभुअणसिरीसीहासणे अत्तणो उरम्मि आरोवेइ ताव णअरपेरंतवड्ढंतघणंधआरपव्वअपइट्ठदुट्ठदाणअमाआवराहमुत्तिमुहट्ठिएण वज्जवडणीसणेण घोणंतघोरघोणगग्घरघुरीणिग्घाअेण पडिवुझंतीए मह केण वि तिरोहिओ अमअपं(क)पिंडेहि णिम्मिओ आणंदमिट्टिआ(हि) गहिओ

मणोरहफलरसेहि दढीकओ णिव्वुदिकाणणदारुहि णिचिओ म(ह) विसओ व्वसणस्स दूरअरो विअणाए परोक्खो चिंतादुक्खस्स दरिद्दो दारुणदाए सो सिविणअसंसारो। णिलुक्को मह भाअधेअचरिमगिरिम्मि तस्स सुहअस्स मुहचंदो। उअचिओ एसो व्वसणंधारधारामंइलो अणुहविज्जंतदुरालोओ लोओ। (इति रोदिति)

[ततो यावद् द्विगुणबाहुदण्डवेष्टनपरवशमिमं जनं स जनः प्रत्यग्रसौभाग्यलक्ष्मीविवाहवेदिमांसले चतुर्दशभुवनश्रीसिंहासने आत्मनउरसि आरोपयति तावन्नगरपर्यन्तवर्धमानघनान्धकारपर्वतप्रविष्टदुष्टदानवमायावराहमूर्ति-मुखस्थितेन वज्रपतनभीषणेन घूर्णद्घोरघोणाघुर्घुरघुरीनिर्घातेन प्रतिबुध्यमानाया मम केनापि तिरोहितोऽमृतपङ्कपिण्डैरिव निर्मित आनन्दमृत्तिकाभिरिव घटितो मनोरथफलरसैरिव दृढीकृतो निर्वृतिकाननदारुभिरिव निचितो मे विषयो व्यसनस्य दूरतरो वेदनायाः परोक्षः चिन्तादुःखस्य दरिद्रो दारुणतायाः स स्वप्नसंसारः। निलीनो मम भागधेयचरमगिरौ तस्य सुभगस्य मुखचन्द्रः। उपचित एष व्यसनान्धकारधारामलिनोऽनुभूयमानदुरालोको लोकः।]

कुण्ड०—

तदलमावेगेन। सुरभिवरतरुकुसुमफलमयं महाभागस्त्वया स्वप्नमायोपनीतेन चक्षुषा साक्षादकारि।

मदा०—

हला कीस मं आसासेसि? ण हु माणुसमेत्तेण इमो दाणअहआसो सरेण विधिउं तोरिज्जइ। ता जाव इमो विअणामअमहाभूअसंभरिओ व्वसणसंवेअणेक्कचेअणो सरीरहदओ इअरस्स केरओ ण होइ तावच्चिअ इमं परिच्चइस्सं त्ति मे णिच्चओ। ता अणुमणउ मं आजम्मणो मम मणोणुऊला पिअसही। आसंसउ मं जम्मंतरे वि तेण सिविणअलद्धेण विणअहरेण जणेण परिअणेसु गणिज्जंतिति।

[सखि! कथं मामाश्वासयसि? न खलु मानुषमात्रेणायं दानवहताशः शरेण वेद्धुं शक्यते। तद् यावदिदं वेदनामयमहाभूतसम्भृतं व्यसनसंवेदनैकचेतनं शरीरहतकमितरस्य कृते न भवति तावदेवैनत्परित्यक्ष्यामीति मे निश्चयः। तदनुमन्यतां मामाजन्मनो मम मनोऽनुकूला प्रियसखी। आशंसतु मां जन्मान्तरेऽपि तेन स्वप्नलब्धेन विनयहरेण जनेन परिजनेषु गण्यमानामिति।]

(नेपथ्ये)

अरे रे कुलकन्यकाजनदर्शनैकवीर ! मुनिगर्भिणीभ्रूणकवलनकलङ्कितदनुवंश-वधूगर्भ ! किमिति भुवनगर्भे निर्भरं तिरोभवसि ? त्वमधुना नारायण-नाभिनलिननालमूलविवरे निलीयापि न प्रभवसि परित्रातुमात्मानं किममुत्र गरुडत्रोटिपुटाकृष्टपातालभुजगभोगभज्यमाने भुवः प्रदरे ?

अस्त्रज्वालानिरस्तोदरतिमिरभरस्पष्टपातालगर्भ-
प्रभ्रश्यत्काद्रवेयद्रवणपथचरद्बाणधारान्धकारः ।
गीर्वाणारातिगर्वग्रसनगुरुमदो द्वन्द्वसङ्ग्रामकण्डू-
दृप्यद्दो काण्डचण्डो दनुकुलनलिनीकन्दमूलङ्कषो[1]ऽस्मि ॥१५॥

मदा० (सहर्षसम्भ्रमम्)—

हला कुण्डले संवदइ सरसंजोओ सिविणअसुदस्स सद्दस्स । सुहावेइ मं रत्ति-सिविणंतरणिसमिआदो मअणविआरमउअमम्मणवअणादो वि इमो अमरिस-रसभारगहिरभीसणो वअणोद्धअप्पवंधो ।

[सखि कुण्डले ! संवदति स्वरसंयोगः स्वप्नश्रुतस्य शब्दस्य । सुखयति मां रात्रिस्वप्नान्तरनिशमितान्मदनविकारमृदुकमन्मनोवचनादप्यय ममर्ष-रसभारगम्भीरभीषणो वचनोद्धतप्रबन्धः ।]

(पुननपथ्ये)—

अरे दनुवंशकरीर !

आक्रन्दत्कुलकन्यकाजनभुजाभङ्गप्रगल्भे गृह-
द्वाराभ्यर्णविकत्थमानमनुजत्रासान्निलीने त्वयि ।
स्मेरायामदितौ त्रपानतमुखी तप्ताभिरस्राम्भसां
सूचीभिः कदपत्यकन्दमुदरं देवी दनुर्विध्यति ॥१६॥[2]

---

1 The word मूलङ्कष in the present case as well as in subsequent cases appears to be an ungrammatical formation on the basis of analogy of words like सर्वङ्कष, कूलङ्कष etc. formed regularly in conformity with Pāṇini's Sūtra—सर्वकूलाभ्रकरीषेषु कष : (3-II-42)

2 MM. G kulanātha cites this verse in his *Kāvyprakāśavivaraṇa* to illustrate *Vriḍā*, a *vyabhicāribhāva op-cit.* p. 161 (inserts one रे in between अरे and दनुवंश—)

मदा०—

सहि को इमो दणुणअणवाहुप्पीडणिज्झरसेलो अमअविंदुसंदोहेणव्व मह कण्णविवरं वूरेइ ।

[सखि ! कोऽयं दनुनयनबाष्पोत्पीडनिर्झरशैलोऽमृतबिन्दुसन्दोहेनेव मम कर्णविवरं पूरयति ।]

(पुनर्नेपथ्ये)—

आः दुरात्मन् पातालकेतो ! तवैकस्य कृते विपद्यते निखिलमपि पातालम् ।

अश्यद्भोगीशभोगावलिनलिनवनाभोगमामूललून-
व्यालश्रेणीमृणालाङ्कुरकुलविकलोत्खातकूर्मेन्द्रकन्दम् ।
धूतध्वान्तद्विरेफं वलिसदनसरोवाणदंष्ट्राभिरामि-
र्मृद्नन् मायावराहप्रतिभटमधुना हन्ति भूदारसूनुः ॥१७॥

मदा०—

हला ! सउहपुट्ठीदो ओदरिऊण पलुएसु दाव को इमो अमरिसभारमंदरावइद्धधीरत्तणदुद्धणिहिणिग्घोसगहिरमुग्घोसंतो मह कण्णामअं जणेइ ।

[सखि ! सौधपृष्ठादवतीर्य पश्य तावत्कोऽयममर्षभारमन्दरापविद्धधीरत्वदुग्धनिधिनिर्घोषगम्भीरमुद्घोषयन् मम कर्णामृतं जनयति ।]

कुण्ड०—तथा । (इति सौधावतरणं नाटयति ।)

(ततः प्रविशति कुपितः कुवलयाश्वः ।)

कुवलयाश्वः—

आः शिक्षितोऽहमनेन दुरात्मना पातालबिले निलीयात्मानं गोपायता पातालकेतुना पूजनीयजनव्यतिक्रमदुर्विनयमारोपितञ्च कर्तव्यसंशयदोलाम् । तथा हि

पातालं यदि पूरयामि विशिखैर्निर्भिद्यमानस्तदा
क्ष्माभारोद्धरणः क्षमानिधिरसौ नागाधिपः खिद्यते ।
ध्वान्तञ्चेदधुना ददामि तदहो दूयेत शस्त्रानल-
ज्वालानिःक्वथनोत्थधूमपटलैराध्मायमानो बलिः ॥१८॥

कुण्ड०—

स्वागतमतिथये ।

कुव०—(कुवलयादवतीर्य)—

सुस्थितमातिथेयपरमाय जनाय ।

कुण्ड०—

महाभाग ! भवदीयरामणीयकगुणप्रकर्षनिर्वर्णनसमुत्थो हृदयविस्रम्भ एव बलादिव योजयति मां नियोगवैयात्ये ।

कुव०—

सर्वात्मना विधेयस्तावदयं जनः सज्जननियोगेषु ।

कुण्ड०—

तदभिमतव्यवसायविप्रतीपेऽपि कर्मणि नियुज्यते महाभागः ।

एषा दीर्घविलोचनाञ्जलिपुटोपात्तैर्निजैरश्रुभिः
पाद्यं वारि मदालसा मम सखी त्वत्पादयोर्दित्सति ।
मा लङ्घिष्ट विदूरबन्धुजनया दत्तां सपर्यामिमा-
मापन्नाभ्युपपत्तिसाधनधनो धन्योऽध्वनीनो जनः ॥१९॥

कुव० (स्वगतम्)—

अभ्युपपत्तव्या मदालसेति भगवतो गालवस्यादेशः । (प्रकाशम्) क्व पुनस्तत्रभवती विश्वावसुवंशवर्धना ?

कुण्ड० —

इममस्य मणिप्रासादस्य मध्यमं कूटमधितिष्ठति ।

(उभौ सोपानारोहणं नाटयतः ।)

कुव०—

अहो कनकपुरमध्यमस्य दानवेन्द्रवास्तव्यसौधशिखरस्य विश्वातिशायिनी विभूतिः । तथा हि,

ऐक्यं गतासु नभसा स्फटिकाश्मखण्ड-
सोपानपङ्क्तिषु विलोचनवञ्चिकासु ।
व्योम्नि व्रजाम्यहमधोमुखलम्बमान-
छायामनुष्यचरणेषु पदानि दत्त्वा ॥२०॥

अपि च,

अग्रे चलत्यभिमुखं सहचारि पार्श्वे
पश्चात्पराङ्मुखमधश्च विलम्बमाने ।
एकस्य मे दनुजराजनिशान्तरत्न-
सोपानभित्तिषु वपुर्बहुतामुपैति ॥२१॥

कुण्ड०—

इदमिदमुपरिवलभीप्रवेशद्वारमिह प्रविशतु महाभागः ।

कुव० (निर्वर्ण्य)—

अलमिह भवत्या द्वारप्रवेशपथोपदर्शनश्रमेण ।

वज्राश्मतोरणतटोत्थितदीर्घरश्मि-
धारातिरोहितसितोपलभित्तिभागम् ।
शाखाद्वयार्पिततनू प्रतिहारभूतौ
द्वारं ममोपदिशतः प्रतिमापुमांसौ ॥२२॥

कुण्ड०—

अयमसौ मदालसाव्यसनवैशससाक्षी दनुजराजप्रासादमध्यमकूटः ।

कुव०—

अहो इदमनेकतालतुङ्गमागाराग्रमधिरूढेन मया समन्ताद् दूरमपि दृश्यते ।

कूटाग्रव्यतिषक्तवासुकिशिरोमाणिक्यकुम्भद्युति-
प्रत्यूषातपपीयमानगगनाभोगस्य तुङ्गात्मनः ।
सौधस्यास्य मिषेण लोहितकरामुत्क्षिप्य दीर्घां भुजा-
मुत्तम्भ्नाति पतन्तमन्धतमसग्रावाणमेषां पुरी ॥२३॥

कुण्ड०—

इयमसौ मदालसा । पश्यतु महाभागः ।

कुव० (निर्वर्ण्य, स्वगतम्)—

अहो विधातुरक्षयो लावण्यकोषः यदयमनेकविधरमणीयवस्तुनिर्माणपरिसमाप्ति-
परिणतोऽपि पुनरस्या विश्वावसुकुलपर्वतोत्थिताया लोकलोचनसन्तापशमन-

कादम्बिन्याः सर्गे प्रत्यग्र इवाभूत् । किञ्च लवणिमप्रकर्षभूमिमिमामवलोकयतो मम

यदभजत नवं नवं तदेषा
विषयमनेकमपास्य पूर्वपूर्वम् ।
वरुणनिलयमापगेव सीमा-
मलभत सम्प्रति तस्य चापलस्य ॥२४॥

किञ्च

पक्ष्मावलीकण्टकसंवृते यत्
चैतन्यबीजं विधिनोप्तमासीत् ।
प्रियामुखालोकमिषेण नेत्र-
क्षेत्रे तदीयं फलमाविरस्ति ॥२५॥

मदा० (विलोक्य, स्वगतम्)—

किअव ! हिअअचोर ! चिरालद्धोऽसि । (उत्थाय प्रकाशम्)—जअइ कोइ जणो । (इति लज्जते)

[कितव ! हृदयचोर ! चिराल्लब्धोऽसि । जयति कोऽपि जनः ।]
(सर्वे उपविशन्ति ।)

कुव०—

अपि नाम वपुरनामयमायतबन्धुविग्रहबाधाविधुरचेतसो भवत्याः ?

मदा०—

विसेसदो अज्ज । [इति वाक्स्तम्भं नाटयति ।]
[विशेषतोऽद्य]

कुण्ड०—

महाभाग ! अपनीतमामयमतिथिविशेषेण जानीमः ।

मदा० (अपवार्य)—

हला ! इमं जणं अइहिति भणंती केण सक्कारेण उअचरीहिसि ।
[सखि ! इमं जनमतिथिमिति भणन्ती केन सत्कारेणोपचरिष्यसि ।]

कुव०—

भवत्योः निभृतमपवारितमन्त्रितं वचनमतिथेरनेकविधां शङ्कां जनयति ।

मदा० (स्वगतम्)—

मुसिअहिअअ ! धुत्त ! तुइतो वि किं ओवारिअं होइ ।

[मुषितहृदय ! धूर्त्त ! त्वत्तोऽपि किमपवारितं भवति ?]

कुण्ड०—

महाभाग ! किमन्यथा विकल्पितेन । नन्वेवं निरवधानप्रतिकारदारुणे निराशबन्धुजनोपेक्षिते व्यसने निःकारणया करुणयैव केवलमभ्युपपद्यमानं महाभागमतिथिमेषा मदालसा विज्ञापयति ।

आत्मैव प्रियदर्शने त्वयि तृणीकृत्यार्पितः, श्रेयसः
स्त्वं भूमिः, प्रमदोदकं मम दृशोः पाद्याम्बु ते कल्पितम् ।
वाचो मे मुषिता भवद्गुणगणैः किं ब्रूमहे यत्सता-
मातिथ्याय तृणानि भूमिरुदकं वाक्चेति पर्याप्यते ॥२६॥

कुव०—

कथमात्थ बन्धुभिरुपेक्षितं व्यसनमिति ? किं न कोऽप्यभ्युपापद्यत गन्धर्व-लोकस्तत्रभवतीम् ?

कुण्ड०—

किमुपालभ्यते वराको गन्धर्वलोको, ननु वशीकृततिरस्करणविद्येन सुरासुर-दुर्द्धर्षब्रह्मवर्चसेन कुलगुरुणा तुम्बुरुणाप्यवधीरिताः स्मः ।

(प्रविश्य पटाक्षेपेण) तुम्बुरुः —

त्वरतां त्वरतामायुष्मानुपरुद्धममीभिर्भवन्निष्क्रमणान्धकारवर्त्म सन्नद्धसैन्यैर्माया-विभिर्दानवैः ।

कुव०—

भगवन् ! अभिवादये । विस्रब्धमिमे कन्यके मदनुमार्गेण निर्गत्य प्रापय बान्धवसमाजमहमिमानुद्धरामि मार्गकण्टकान् ।

मदा० (सावेगम्)—

भअवं ! पलुएहि मं पि अणाहं मंदभाइणिं । भणहि पिअदंसणं महाभाअं अप्पमत्तो परिक्कमसु, दुद्धरिसा हआसा दाणआ ति ।

[भगवन् ! पश्य मामप्यनाथां मन्दभागिनीम् । भण प्रियदर्शनं महाभागमप्रमत्तः परिक्रामस्व, दुर्धर्षा हताशा दानवा इति ।]

कुव०—

भीरु ! अलमावेगेन ।

व्रज सुतनु ! समाजं बान्धवानां कदाचिद्
वयमपि च कथानामन्तरे चिन्तनीयाः ।
पृथुतरतरुमूलोद्धारिणां सिन्धुराणां
नलिनविपिननालोन्मूलने कः प्रमादः ॥२७॥

(इति साटोपं परिक्रामति ।)

मदा० (स्वगतम्)—

हा कहं एत्तिअमेत्तदंसणो मदालसाए पिअदंसणो-इमो जणो । को कस्सेति विमरिसइ । जा अद्धुम्मीलिआ कुमुअवाली उज्जंतो चिअ चन्दा ता अंतरिओ घणघडाए ।

[हा कथमेतावन्मात्रदर्शनो मदालसायाः प्रियदर्शनोऽयं जनः । कः कस्येति विमृश्यते ? यावदर्धोन्मीलिता कुमुदपाली उद्यन्नेव चन्द्रस्तावदन्तरितो घनघटनया ।]

(इति निष्क्रान्ताः सर्वे ।)

[इति तृतीयोऽङ्कः]

अथ चतुर्थोऽङ्कः

(ततः प्रविशति प्रमथमिथुनं भैरवो भेरुण्डा च ।)

भैर०—

अयमहं भोः !

निर्ध्वान्तस्वान्तशान्तोपधिविधिभिरुपध्मानमुद्राभिरन्त-
र्धाय ध्यायामि धूमायितनयनतटं धाम सोमोत्तमाङ्गम् ।
यस्य ब्रह्माण्डपिण्डग्रसनगजपतेस्ताण्डवाटोपदृप्यद्-
दंष्ट्रादण्डाग्रचक्रग्रथनपरवशा घूर्णते कालरात्रिः ॥१॥

(खड्गधारया गगनगतिमभिनीय)—

अरे रे गगनचराः ! कथमस्मदुद्धतक्रमणोद्दण्डभुजदण्डवेगविहतप्रवहवाताप-वर्तितव्योमगोलविप्लुतावलितवक्त्रं पतन्ति भवन्तः । स्तम्भयत रे ! स्तम्भयतात्मानम् (सहासम्) अहो निस्सत्त्वाः ।

पश्चाद्धैः प्रेरयन्तो रथममुमपथे सप्तयः सप्तसप्तेः
खट्वाङ्गोत्तुङ्गशृङ्गग्रथितनरशिरोराहुभीता द्रवन्ति ।
दैवाद् दूरं पतन्तः पुनरपि करटित्वक्पुटास्फोटवात
व्यस्तानुत्तभ्य दोर्भिः कपय इव तरूनुच्चरन्ते विमानान् ॥२॥

भेरुण्डा —

अरे भट्टआ भइरआ । कंठविअरपइट्ठपवहवाअभरिअणारमुंडकिंकिणिआक्कणण-मुहरा महुरं रडइ मे मेहला ।

[अरे भर्तभरव ! कण्ठविवरप्रतिष्ठप्रवहवातभरितनरमुण्डकिङ्किणिकाक्वणनमुखरा मधुरं रटति मे मेखला ।]

भैर०—

प्रिये भेरुण्डे ! सत्यं परिपुष्णाति तव रामणीयकमसो गगनचङ्क्रमणावेगः ।
कण्ठान्तर्विवरैः प्रविश्य रसनास्रङ्मुण्डकुण्डोदरे
भ्राम्यन्तोऽनुचरन्ति पुष्करघनध्वानाध्वना वायवः ।
भ्रश्यच्चर्मपटावगुण्ठनतटादुत्थाय चक्रक्रमात्
क्रामन्त्यः प्रकटं नटन्ति विकटा विस्रस्तजूटा जटाः ॥३॥

भेरु० (साट्टहासम्)—

ता अहं पि तुह णअणं विणोदेंती इह वित्थिणे गअणंगणे णच्चिस्सम् ।
(इति विकटं नृत्यति) [तदहमपि तव नयनं विनोदयन्ती इह विस्तीर्णे गगनाङ्गने नर्तिष्यामि ।]

भैर०—

अहो लास्यस्य माधुर्यम् ।
उत्तम्भितायतजटापटलाग्रसूचि-
विद्धोड्डचक्रकुसुमस्तवकैः स्खलद्भिः ।
दोर्मण्डलभ्रमणभग्नविमानजाल-
तालैर्मनो हरति चङ्क्रमणं प्रियायाः ॥४॥

भेरु० (सविषादम्)—

अरे रे भट्टआ भइरआ णिभरकीलारसोम्मत्ताइ मए विछिणवडिआ सोहणा हारलइआ वि ण लक्खिआ । ता कीस करिस्सं, सुणहिअआ जाअह्मि ।
[अरे रे भर्तर्भैरव ! निर्भरक्रीडारसोन्मत्तया मया विच्छिन्नपतिता शोभना हारलतिकापि न लक्षिता । तत् किं करिष्ये, शून्यहृदया जातास्मि ।]

भैर०—

अलं विषादेन । मनुजपतीनां सङ्गरेषु पुनरपि घटयितुं शक्यते हारावली ।

भेरु०—

अव्वो ! कहिं पव्वंति तारिसा गअसिरथोरा णरमुंडमणिणो जेहिं हारावली गढिदव्वा । हा सोहणे हारावलिए ! सुंभासुरसमरे णिअहत्थलूणदइच्चसिरेहिं विरइऊण भअवइए कच्चाइणीए मह कंठे दिण्णा आसि तुमं ।

[अहा ! कुत्र प्राप्यन्ते तादृशा गजशिरःस्थूला नरमुण्डमणयो यैर्हारावली घटयितव्या ? हा शोभने हारावलि ! शुम्भासुरसमरे निजहस्तलूनदैत्य-शिरोभिर्विरचय्य भगवत्या कात्यायन्या मम कण्ठे दत्तासीस्त्वम् ।]

भैर०—

तदलमावेगेन । अद्य खलु कनकपुरोपकण्ठसीमनि कुमारकुवलयाश्वेन पातनीयानि मत्तङ्गजोत्तमाङ्गस्थूलानि दानवशिरांसि ।

भैरु०—

ही ही भो । उअलद्धो आहारो । चिरबुहुक्खिअ (म्हि) भट्टआ ! पोट्टो णं पलुअसु पुट्ठिए पइट्ठो, आआसं घिसइ व पंजरट्ठिभारो, णीखुप्पागहिरविलं-तरम्मि दिट्ठीओ ओट्ठा मे गिरिदरिपत्थराव्व सोक्खा ।

[अहो ! उपलब्ध आहारः । चिरबुभुक्षितास्मि भर्तः ! उदरं ननु पश्य पृष्ठे प्रविष्टम्, आकाशं ग्रसतीव पञ्जरास्थिभारः, निर्मग्ना गम्भीरबिला-न्तरे दृष्टिः, ओष्ठौ मे गिरिदरीप्रस्तराविव शुष्कौ ।]

भैर०—

सत्यम् । चिरादुपरतासु सङ्गरकथासु बलवद्बाधिता भवती क्षुधया । तथा हि रसनाग्रेण सृक्कणी लिहत्या भवत्याः

धूमोद्गारनिरुद्धकोटरदरीद्वन्द्वोदरोदित्वरी
निर्वाणाक्षिरुदीक्ष्यतेऽक्षिदहनाङ्गारे स्फुलिङ्गी तडित् ।
स्थूलैर्निम्नकपोलकूपविवरव्यालम्बमानैः शिरा-
सूत्रैरुद्ध्रियते गभीरनिनदोद्गारी रसज्ञापटः ॥५॥

तदेहि पातालमेव प्रविशावः ।

(इति विवरप्रवेशं नाटयतः ।)

(नेपथ्ये)

अरे रे पराङ्मुखप्रस्थितसुरसेनामानविघातदक्षिणाः सकलदिग्वशीकरणसिद्ध-मान्त्रिकाः पृतनानायका द्रुमजङ्घदर्दुरादयोऽवधत्तावधत्त । नगरान्निर्गतोऽयं दुरात्मा क्षत्रियडिम्भः ।

भैर०—

कथममी दुरात्मानो दानवास्तमसि निलीय कूटप्रधनविधिना कुमारमभिसन्धातु-मिच्छन्ति ।

श्रोत्रे शत्रुजितस्य न प्रतिपतेदित्याशया दानवैः
कर्णाकर्णि शनैर्निशम्य घुषितं प्राणेशि ! जानीमहे
आरोहत्युदयं सुपर्वपरिषत्पद्मावलीपूषणी—
त्रासाद् गद्गदया गिरा घनतमस्तोमोऽयमाक्रोशति ॥६॥

भेरु० (सहासम्)—

जा इमे दाणअहआसा इमस्सिं अंधारकंदरे णिलुक्का ता जाणामि णिवडिआ मह पाआलविलवित्थरे पोट्टे ।

[यावदिमे दानवहताशा अस्मिन्नन्धकारकन्दरे निलीनास्तज्जानामि निपतिता मम पातालबिलविस्तरे उदरे ।]

(नेपथ्ये)

हं हो सुरासुरसमरनाटकसूत्रधाराः सुनासीरसाम्राज्यलक्ष्मीकचग्रहव्रतदीक्षिता दनुवंशवर्धनाः ! किमिति प्रमाद्यथ ? अयमिहान्धकारगर्भं सृजत्यपरं मूर्तमन्धकारमनया बाणधारया दुरात्मा कुवलयाश्वः । अथवा किमन्यैः ? अरे दर्दुरकसेनापते ! स एव त्वमसि ।

ऐरावणस्य करटोपतटे नखाय
प्रासं व्यधायिषत संयति पञ्चदन्ताः ।
कच्चित्त्वयैव मलिनस्य मदोदकस्य
स्थानेऽभ्यषेचिषत रक्तपयःप्रवाहाः ॥७॥

भेरु०—

अहह ! चारिसुंतो दिसामुहाहिंतो उअसप्पन्ति कुमाराहिमुहं परोप्परसंघट्टुप्पडंतफुलिंगविज्जुलाहि जलन्तीओ अंधारतिरक्खअदाणअहत्थावइद्धा सत्तितोमरप्पासवाणप्पमुहाओ अत्थपरंपराओ ।

[अहह ! चतुर्भ्यो दिङ्मुखेभ्य उपसर्पन्ति कुमाराभिमुखं परस्परसंघट्टोत्पतत्स्फुलिङ्गविद्युद्भिर्ज्वलन्त्योऽन्धकारतिरस्कृतदानवहस्तापविद्धा शक्तितोमरप्रासबाणप्रमुखा अस्त्रपरम्पराः ।]

भैर०—

अयि प्रिये ! प्रतिबलप्रमाथोद्यतप्रमथवरूथिनीकथाप्रथमसाक्षिणि ! कथय कथं कथ्येतेदमविकत्थनमनोरममस्मद्भर्तृदारककुमारातिशायि मानवकुमारचरितम् ?

अन्योन्य(न्य)तिघट्टनानलकणक्रूराः करेभ्यो द्विषां
संहत्यैकपदे पतन्ति परितो याः स्मायुधश्रेणयः ।
बाणैस्तास्त्रसरेणुपुञ्जपदवीमानीय भूपार्भको
रक्षामण्डलमात्मनो रचयति क्ष्मामण्डले पांसुभिः ॥८॥

(निरूप्य, सश्लाघम्)--

अहो हयप्रवरकुवलयभ्रमणिकालाघवमनुकरोति कुवलयाश्वस्य सर्वतोमुखशरविक्षेपशिक्षाकौशलम् !

भूमौ तुरङ्गममयं गगने मुखेन्दु-
ज्योत्स्नामयं नतधनुर्मयमन्तराले ।
आशासु सायकमयं तदिति क्रमेण
चत्वारि चक्षुषि चकासति मण्डलानि ॥९॥

भैरु०—

ही ही भो ! निवडंति इमे तिमिरगिरिगंडपत्थरा विअ कुमारकरक्खित्तक्खुरप्पक्खुडिअदूरोप्पडिआ दाणअमुंडा, कत्ति कत्ति हारावलीओ गुंपिस्सम् ।

[अहो ! निपतन्तीमे तिमिरगिरिगण्डप्रस्तरा इव कुमारकरक्षिप्तक्षुरप्रखण्डितदूरोत्पतिता दानवमुण्डाः, कति कति हारावलीर्गुम्फिष्यामि ।]

भैर०—

आम्, निष्टप्तकन्दुसिकताभृज्यमानलाजपटत्कारपरिबृंहिता कान्दविककरमार्जनीमणत्कारधारेवान्धकारगर्भादुच्चरति दानवशिरस्सहस्रपतनध्वनिपरम्परानुविद्धा कन्धराशिराच्छिदाच्छाङ्कारघोरणिः । तज्जानामि,

कुमारबाणावलिसन्निपात-
निर्भिद्यमानाखिलमर्मसन्धिः ।
अनारतं कुन्थति कम्पभग्न-
सीत्कारधारामुखरोऽ(न्ध)कारः ॥१०॥

भेरु०—

होमाणहे ! इमे हआसा दाणआ सत्थेहिं ण सक्कवन्ति जुझिउं ता थोरे थोरे पत्थरपिंडे पक्खिवन्ति ।

[अहो ! इमे हताशा दानवाः शस्त्रैर्न शक्नुवन्ति योद्धुम्, तत् स्थूलान् स्थूलान् प्रस्तरपिण्डान् प्रक्षिपन्ति ।]

भैर० (सश्लाघम्) —

प्रिये ! पश्य पुरुषाकारप्रकर्षममुष्य कुमारस्य ।

गर्भप्रविष्टदनुजव्रजबाणभार—
रुग्णोच्चयो वमति यानयमश्मपिण्डान् ।
भूभर्तृदारकशिलीमुखदण्डविद्धा-
स्ते तोमरा इव पुनस्तिमिरं विशन्ति ॥११॥

भेरु०—

भट्टए ! अहअं तक्केमि जुअराअवाहुखंभो दाणअकूवाणं सारमुद्धरइ पत्थरपिंडवरंडअगरुईहिं वाणलट्ठीहिं ।

[भर्तः । अहं तर्कयामि युवराजबाहुस्तम्भो दानवकूपानां सारमुद्धरति प्रस्तरपिण्डवरण्डकगुर्वीभिः बाणयष्टिभिः ।]

भैर०—

युज्यते, दृढप्रगुणाः खलु कुमारबाणयष्टयः ।

भेरु०—

अरे रे भट्टआ ! कीस ण पलुअसि अंधारणिचआदो वहइ इमा खडखडंतदाणअमत्थपत्थरपिंडक्खडंतगई लोहिअणई ।

[अरे रे भर्तः ! कथं न पश्यस्यन्धकारनिचयाद् वहतीयं खटखटायमानदानवमस्तकप्रस्तरपिण्डस्खलद्गतिर्लोहितनदी ।]

भैर०—

आ(:) सुभगे ! आम्, अन्धकारनिचयान्तरोत्थिता लोहितोदकवहा सरस्वती वक्त्रकज्जलगिरेर्विनिर्गता कालरात्रिरसनेव दृश्यते ।

भेरु०—

ही ही भो ! लद्धो मए तण्हाप्पडिआरो । णं ओगाहिस्सम् । (इत्यवगाहनं नाटयित्वा) अरे रे भइरआ ! पिवाहि रे ! पिवाहि अमअसारमहुरं रुहिरणईसोतपाणिअम् । (उभौ पानं नाटयतः ।)

[अहो ! लब्धो मया तृष्णाप्रतिकारः । नन्ववगाहयिष्ये । अरे रे भैरव ! पिब रे ! पिब अमृतसागरमधुरं रुधिरनदीस्रोतःपानीयम् ।]

(भेरुण्डा साट्टहासं तृप्तिमभिनीयोद्गिरति ।]

भैर०—

अहहैकस्य पातालकेतोरपराधेन वनमपि विपद्यते !

मूर्च्छत्पातालकुञ्जप्रतिरवचकितव्यालहालाहलाग्नि-
ज्वालामालाकरालाननपुटपवनध्मातकालानलार्चिः ।
ब्रह्मस्तम्बाण्डपिण्डग्रसनगुरुरसौ भग्नभूगोलसन्धि-
र्भेरुण्डाचण्डहासो जरयति जगतो जीवितं जृम्भते च ॥१२॥

भेरु० (अवगाहादुत्तीर्य)—

अरे भट्टआ ! णररुहिरणिज्झरंगराअलिप्पमुही केरिसी सोहणा तुह पडिहामि ।

[अरे भर्तः ! नररुधिरनिर्झराङ्गरागलिप्तमुखी कीदृशी शोभना तव प्रतिभामि ।]

भैर०—

अयि निसर्गसुन्दरि ! वर्णयामि तव वर्णकपरिग्रहम् ।

हर्षादुत्तभ्यमानोद्धतविततजटास्तम्बरोमाग्रसूची-
निश्च्योतदानवासृक्पृषतविरचितापूर्वनीहारवर्षम् ।
सद्यःस्नातोत्थितायास्तव रणसरिति प्रौढसंवर्तसन्ध्या-
रक्तायाः कालरात्रेरिव मुखमधुना मानसं मे धिनोति ॥१३॥

(नेपथ्ये)

अरे रे चिरसञ्चितभुजबलद्रविणा दानवाः ! किमिति विद्रवत ? अयमहमैरावणचतुर्दन्तिकाश्रृङ्गाटकोद्धरणराजहंसः पुरन्दरनयनपुण्डरीकवननिमीलन-

मृगाङ्को यममहिषविषाणमृणालमूललवनरथाङ्गयुवा जयलक्ष्मीस्वयंवरणसुभग-मूर्तिराह्लादनो भवतां न तु भीषणः ।

भेरु०—

अरे भट्टआ ! केण वि दइच्चेण दाणएण वा पज्जवट्ठवेऊण विद्दअंतिं सेणं पअट्टिओ सरधारावरिसो ।

[अरे भर्तः ! केनापि दैत्येन दानवेन वा पर्यवष्टभ्य विद्रवन्तीं सेनां प्रवर्तितः शरधारावर्षः ।]

भैर०—

स एष दनुनन्दनकालनेमिवंशवर्धनो दर्दुरकः स्वरेण लक्ष्यते ।

सङ्ग्रामसीम्नि प्रहृतं मघोना
पिपेष यः पाणिपुटेन वज्रम् ।
विकीर्य तं कार्मणचूर्णमुष्टि-
माशाकिशोरीर्वशयाम्बभूव ॥१४॥

भेरु० —

हीमाणहे ! अंधारणीलमणिप्पासाअकवोअवालिआमुहासुंतो णिक्कमंति पारावअ-चंचुचवला वाणग्गपरंपराओ ता जाणे विक्कमइ ददुरओ ।

[अहो ! अन्धकारनीलमणिप्रासादकपोतपालिकामुखेभ्यो निष्क्रामन्ति पारावतचञ्चुचपला बाणाग्रपरम्परास्तज्जाने विक्रामति दर्दुरकः ।]

भैर०—

पश्य कृतप्रतिकृतेषुलाघवममुष्य मनुष्यकुमारस्य ।

प्रकाशन्ते ध्वान्ते त्रिदशपतिपाषाणवलभी-
विटङ्केभ्यः पारावतमुखशिताग्राः परशराः ।
कुमारेणान्योन्यव्यतिकरवशाच्च स्तिमितया
निरुध्यन्ते बाणावलिमयवलीकग्रथनया ॥१५॥

भेरु०—

अम्महे ! तिउरडाहडंवरुड्डारमिडलिलडलोअणविज्जुलाकडारं किंपि मडु-क्किअम् । जाणे आविक्कआ कुमारेण हुआसणदेवइअविज्जा ।

[आश्चर्यम् ! त्रिपुरदाहडम्बरोड्डामरमृडललाटलोचनविद्युत्कडारं किमपि चमत्कृतम् । जाने आविष्कृता कुमारेण हुताशनदैवतिकविद्या ।]

भैर०—

प्रिये ! पश्य ।

आग्नेयास्त्रं नृपतिशिशुना प्रेरितं जाज्वलीति
प्लुप्यन्ते ते वलिगृहदरीद्वारि गाढान्धकाराः ।
विश्वे विश्वभ्रमणलघुताजाङ्घिकास्तिग्मभानो-
र्भग्ना येषु प्रलयरजनीवल्लिकन्देषु पादाः ॥१६॥

भेरु०—

अविद ! अविद ! कुमारस्स हुअवहसिहाहिं णीसेसिऊण घोटिए अंधारे फुडं पआसइ इमा दाणअसेणा ।

[अविद ! अविद ! कुमारस्य हुतवहशिखाभिः निःशिष्य पीतेऽन्धकारे स्फुटं प्रकाशते इयं दानवसेना ।]

भैर०—

प्रिये ! पश्य, पश्य ।

शस्त्राग्निर्दिनखण्डचण्डरुचिवन्मध्येनभोमण्डलं
पिण्डीभूय मयूखदण्डनलकैरापीय पीनं तमः ।
ध्वान्तेन्दीवरवृन्दकन्दकठिनग्रन्थे प्ररोहभ्रमा-
न्निर्दग्धुं द्रुमजङ्घदर्दुरदरीजङ्घानधो धावति ॥१७॥

भेरु०—

अम्महे ! फुडंति इमादो सत्थाणलपिंडादो तिणि आलाअखंडाणि वडंति अ सेणवईणं सरीरेसु ।

[आश्चर्यम् ! स्फुटन्त्यस्माच्छस्त्रानलपिण्डात् त्रीण्यलातखण्डानि पतन्ति च सेनापतीनां शरीरेषु ।]

भैर०—

प्रिये ! मयपुरत्रितयदहनसंरम्भभीषणस्य भगवतो भूतभर्तुर्विश्वम्भरमयः शर

इव युवराजबाणानलो दहति दनुजसेनापतित्रयम्। पश्यास्य विप्लोपलाघव-प्रकर्षम्। तथा हि,

विदल(द)ञ्जनपुञ्जनिभं वपु-
र्हुतवहस्य शिखाभसितोच्चयः।
इति शराग्निसमित्त्रितयं त्रिधा
युगपदेव दृशौ मम पश्यतः ॥१८॥

भेरु०—

ही ही भो! डड्ढा[1] इमे तिणि दुमजंघददुरदरीजंघा दाणअसेणावइणो, जाओ मे भसिअंगराअसंभारसंवलो।

[अहो! दग्धा इमे त्रयो द्रुमजङ्घदर्दुरदरीजङ्घा दानवसेनापतयो, जातो मे भसिताङ्गरागसम्भारसम्बलः।]

भैर०—

अयमपरः प्रभूततरो भूतिराशिरुद्भवति। तथा हि,

एषा कज्जलशैलसानुमलिनैरुन्मीलदिन्दीवर-
च्छायातस्करमण्डलाग्रवलयैरुल्लोलिता दानवैः।
लीनायाः सवितुर्निजप्रसवितुः क्रोडे कृतान्तस्वसु-
र्गृह्णाति श्रियमस्त्रपावकशिखाजालावलीढा चमूः ॥१९॥

भेरु० (सनिर्वेदम्)—

दइच्चसेणाजउणा क्खणेण जालावहा वेअरिणिव्व जाआ णिमीलिउम्मीलिअ-णेत्तपत्ता पेछामि दाणिं भसिमं वहेइ।

[दैत्यसेनायमुना क्षणेन ज्वालावहा वैतरणीव जाता निमीलितोन्मीलित-नेत्रपत्रा पश्यामीदानीं भस्म वहति।]

भैर०—

हन्त! ज्वलिता भ्रुकुंसादयो दानवाः।

(नेपथ्ये)

अयमहं भोः!

---

1 The transcript reads डड्ढा

विद्राणत्रिदशवधूमुखेन्दुचान्द्री-
चार्चिक्या[1]चमनचमत्क्रियाचकोरः ।
उद्भूतं दनुकुलशत्रुशस्त्रगर्भा-
दाग्नेयं कणमसिजिह्वया लिहामि[2] ॥२०॥

भैरु०—

को एसो पलअघणघडावोरगग्घरोग्घोसभरिअपाआलविअरगब्भादो उभविऊण कप्पावसाणवड्ढंतकालरत्तिणिसीहंधारधारामंसलाहिं सरीररूओग्गारच्छडाहिं मइलिज्जंपि अग्गिअत्थडहणसिहाकलावं विज्जलंतविज्जुलापुंजकडारेण भरिअगअणंगणेण अट्टहासेण वड्ढेतो वट्टइ णअणवहे दाणओ ।

[क एष प्रलयघनघटावोरघर्घरोद्घोषभरितपातालविवरगर्भादुद्भूय कल्पावसानवर्द्धमानकालरात्रिनिशीथान्धकारधारामांसलाभिः शरीररूपोद्गारच्छटाभिः मलिनीक्रियमाणमपि आग्नेयास्त्रदहनशिखाकलापं विज्वलद्विद्युत्पुञ्जकडारेण भरितगगनाङ्गनेनाट्टहासेन वर्द्धयन् वर्तते नयनपथे दानवः ।]

भैरु०—

स एवैष पातालकेतुः,

येनातिक्रमसाहसव्यसनिना कंसारिनेत्राम्बुज-
क्रीडाधामनि वेणिदामनि बलादामूलमुल्लुञ्चिते ।
मन्थायस्तकठोरमन्दरशिलामूढप्रहारार्जिता
लक्ष्म्या मूर्धनि निह्नुते परिभवं दीर्घा किणश्यामिका ॥२१॥

भैरु०—

हीमाणहे ! विउलपाआलविअरविअंभमाणा गहिरणित्थणिआ विज्झाअसत्थहुअवहइंगालसामलिअसव्वकाट्ठाप्पलअजलहरा वरिसंति गअकरपीअराओ ता जाणेमि आविक्कआ पाआलकेउणा पज्जण्णविज्जा ।

---

1 The transcript reads चारचिम्बा-
2 The expression लिहामि appears to be ungrammatical.

[अहो ! विपुलपातालविवरविजृम्भमाणा गम्भीरस्तनिता विध्मातशस्त्र-हतवहाङ्गारश्यामलितसर्वकाष्ठाः प्रलयजलधरा वर्षन्ति गजकरपीवराः (जलधाराः), तज्जानाम्याविष्कृता पातालकेतुना पर्जन्यविद्या ।]

भैर०—

हन्त ! हन्त ! विपन्नमशरणेन संसारेण ।

पर्जन्यास्त्रप्रसूतैः प्रलयजलधरैर्धारया पूर्यमाणः
पर्यस्यन्नेष धीरध्वनिभिरविरतं रौति पातालकुम्भः ।
वन्यापूरप्लुतावप्लुतकमु(प)यति[1] क्षोभदुःस्थामवस्था-
मापन्नाः पन्नगानामधिपतय इमे निःश्वसन्तः प्लवन्ते ॥२२॥

भैरु०—

विहडिआ मेहा कुमाराहिमंतिअसरणिग्गएण पवणेण ।

[विघटिता मेघाः कुमाराभिमन्त्रितशरनिर्गतेन पवनेन ।]

भैर०—

प्रिये ! प्रतिकृतः पवनोऽपि पातालकेतुना ।

वायव्यास्त्रसमुत्थितेन मरुता वारि क्षरन्नुन्मदः
सिंहेनेव बलाद्बलाहकघटादन्तावलो दारितः ।
वर्षासंप्लवविप्लुतालयविलादेतैश्चिरप्रोषितै-
स्तत्काले दनुजास्त्रतामुपगतैः पीतो मरुत्पन्नगैः ॥२३॥

भैर०—

हा ! णिलुक्को इमो दाणअहआसो पुणो वि अंधारे ।

[हा ! निलीनोऽयं दानवहताशः पुनरप्यन्धकारे ।]

भैरु०—

इदमिदमाविर्भवति युवराजकरापविद्धशरमुखोदयशिखरात्कनकपुरोपवनचकोर-चञ्चुपुटाचान्तचटुलचन्द्रिकाविचित्रगगनचार्चिक्यचमत्कारमनवधिपातालपथ-पोप्लूयमानघनतिमिरोपदिष्टनित्यमुद्राविताभिरननुभूतचरानुभूयमानमौनावसानमुख-निर्वृताभिरधोभुवनपावनभोगवतीपूरकुमुदिनीभिरनिमिषमुन्मिषन्तीभिर्विमृष्यमाण-

1 The transcript reads–मयति

माशाकिशोरीमुखविशेषकमृगमादीयमानतमस्तोमतस्करवितायमानकरचक्रमा-
क्रान्तजननयनवृन्दमैन्दवमस्त्रम् ।

कौमुदीपरिणामेन पलितेनेव नीयते ।
पातालमुखधम्मिल्लो धावल्यं ध्वान्तसञ्चयः ॥२४॥

भेरु०—

दाणिं जोण्हाहि कवलिए अंधारे दीसइ एसो जुअराअकरधचंदव्वणरेहा-
चित्तलिओ संवत्तकालरुद्दोव्व पाआलकेदू ।

[इदानीं ज्योत्स्नाभिः कवलितेऽन्धकारे दृश्यते एष युवराजकरार्द्धचन्द्र-
व्रणरेखाचित्रितः संवर्तकालरुद्र इव पातालकेतुः ।]

भैर०—

आम्, प्रिये ! दृश्यते ।

अर्द्धचन्द्रविशिखव्रणार्द्रया[1]
विद्युता समिति लोकलोचनम् ।
लोचनानलपिशङ्गशेखरः
कालरुद्र इव लेढि दानवः ॥२५॥

भेरु० —

दुवे वि मे परोप्पराहिमुहा संरंभगहिरं किंपि मंतेति, सुणेमो दाव ।

[द्वावपीमौ परस्पराभिमुखौ संरम्भगभीरं किमपि मन्त्रयेते, शृणुवस्ता-
वत् ।]

भैर०—

प्रिये ! स्मितमधुरमुल्लुण्ठमानः किमपि रमणीयमाभाषते कुमारकुवलयाश्वः
—"महाभाग ! दानवपते ! न चिरादुपक्षीणविग्रहश्चिरतरं विश्राम्य,

अयमविरतनिद्रां द्राघयत्यातपत्र-
व्यजनधुवनवातैर्वीजितो गृध्रपङ्क्त्या ।
भुवमविगतरागां गाढमालिङ्ग्य दोर्भ्या-
मधिरणमधिशेषे निर्भरं वीरशय्याम् ॥२६॥"

---

1 The transcript reads-द्रेता

भेरु० —

इमो माणुसदारओ गहिरसोल्लुण्ठं वअणं मंतेइ ।

[अयं मानुषदारको गभीरसोल्लुण्ठं वचनं मन्त्रयते ।]

भैर० —

अट्टहासधूमानुपतदनलकणावलिखद्योतकिर्मीरितव्योमवर्त्मा प्रतिवदति दानवेन्द्रः—"अरे वाचाट ! सामन्तवटो !

आमूलाद्भस्मराशीकृतसुरतरवो ग्रस्तकाष्ठान्तराल-
ज्वालाविप्लुष्टदुष्टक्षितिचरसकलक्षत्रियक्षुद्रकीटाः ।
दग्धव्यानामभावात् कतिचनदिवसानन्तरा म्लानिमापु-
स्तेन त्वामाज्यधारामृदुतनुमधुना हेतयो मे लिहन्तु ॥२७॥"

भेरु०—

ही ही भो ! असमत्तवअणो च्चि(अ) दानअहआसस्स सिरो क्खुरप्पखुडिआ णिवडिऊण वि गिरिगंडवडणघग्घरग्घोसभीसणं गुलगुलाअइ ता इमो होहिइ मह हारावलीए मेरुमणी ।

[अहो ! असमाप्तवचनमेव दानवहताशस्य शिरः क्षुरप्रखण्डितं निपत्यापि गिरिगण्डपतनघर्घरोद्घोषभीषणं गुलगुलायते तदिदं भविष्यति मम हारावल्या मेरुमणिः ।]

भैर० —

(आकाशे) भगवत्यपत्यवत्सले देवि दनो ! सा तवेदानीं पातालकेतु-सेतुर्यामरुणत्तनयशोकजन्मानं तमपि विधौ विघटितवति केन छिद्येत बाष्पनदी ?

भेरु० —

भट्टआ भइरआ ! कीस एसो क्खत्तिअकुमारो अणोहरिऊण चंदाअवं पाआलगब्भादो महिअलं पसरिओ ।

[भर्तर्भैरव ! कथमेष क्षत्रियकुमारोऽनुपहृत्य चन्द्रातपं पातालगर्भान्महीतलं प्रसृतः ।]

भैर०—

अयि प्रिये ! पातालमार्गकण्टकतिमिरोद्धरणेन सञ्चिता कीर्तिः शस्त्रज्योत्स्नाकपटादाकल्पं स्थापिता कुमारेण ।

भैरु०—

कहं अंतरिओ एसो चवलहअणिमिसलंघिअमग्गवित्थरो णअणवहादो कुअलअस्सो । भद्दमिमिणो दाणअकअंतस्स ।

[कथमन्तरितः एषः चपलहयनिमिषलङ्घितमार्गविस्तरो नयनपथात् कुवलयाश्वः । भद्रमस्य दानवकृतान्तस्य ।]

(नेपथ्ये)

आवुअ ! परिस्सअसु मं जा इमए तुह लालणचडुआरचडुलवअणं वअणचंदमपलुअंतीए विएत्तिआइं दिअहाइं, धरिओ सव्वपरिहअसहो अत्ता, तं कीस सोअसि मन्दभाइणिं ।

[आवुक ! परिष्वजस्व मां यदनया तव लालनचटुकारचटुलवचनं वदनचन्द्रमपश्यन्त्या व्यतीतानि दिनानि, धृतः सर्वपरिभवसहः आत्मा, तत् किं शोचसि मन्दभागिनीम् ।]

भैर० (विलोक्य)—

एषा मदालसा पातालकेतुनिधनानुपदमागतेन विश्वावसुना हेमकूटमुपनीयते । तामनुगच्छतः कुण्डलातुम्बुरू ।

भैरु०—

कीस एसा कुमाराउहजोण्हारुलजुलं प्पविशंती दावाणलवेढिआ हरिणिव्व विप्पुरइ ।

[कथमेषा कुमारायुधज्योत्स्नाचाकचिक्यं प्रविशन्ती दावानलवेष्टिता हरिणीव विस्फुरति ।]

भैर (निरूप्य)०—

कस्मिन्नप्यभिलषितदुर्लभे यूनि दृढनिरूढमनुरागमस्या वितर्कयामि । तथा हि,

धुतकरतलामङ्गेनाङ्गे निलीय मदालसां
न सखि न सखीत्युक्त्या साचीकृताननपङ्कजाम् ।
विमृदितबिसक्षामे बाहौ निपीड्य सखीजनः
कथमपि शरज्ज्योत्स्नाचन्द्रातपं प्रतिकर्षति ॥२८॥

भेरु०—

ता कीस इमं दारिअं अणजणवद्धहिअअं मणिभद्दो णाम जक्खो परिणेउं महइ ?

[तत्कथमिमां दारिकामन्यजनबद्धहृदयां मणिभद्रो नाम यक्षः परिणेतुमिच्छति ?]

भैर०—

न युज्यते स्वभावसुभगा मदालसा प्रकृतिदुर्दर्शनं मणिभद्रमाश्रयितुम् । पश्य ।

ग्रहपरिभवलुप्तमण्डले
भगवति कैरवपालिवल्लभे ।
वरमुपरतिमेति कौमुदी
न तु घटते मलिनेन केतुना ॥२९॥

भेरु०—

जुज्जउ ण जुज्जउ पुढमं च्चिअ पडिवणा मदालसा णिहिणाहकुएराणुरुंधिएण विस्सावसुणा मणिभद्दस्स ।

[युज्यतां न युज्यतां, प्रथममेव प्रतिपन्ना मदालसा निधिनाथकुबेरानुरुद्धेन विश्वावसुना मणिभद्राय ।]

भैर०—

अयि दैवतस्वभावे ! नानुपज्ञासि विप्रलम्भचरितानाम् । कैतवसर्वस्वा गन्धर्वजातिरस्या न विश्वसनीयानि वचांसि ।

(नेपथ्ये)

हा ! वञ्चितोऽस्म्यनेन चपलमतिक्रामता कुमारकुवलयाश्वेन । अरे नागाः ! मधुपर्कवसनभूषणपादोदकपाणयो निवर्तध्वम् । एकोऽहं प्रियसुहृदे चामीकरकण्ठिकामुपनयामि ।

भैर०—

सोऽयमश्वतरनागनन्दनः सुनन्दो नाम सदनागतप्रतिगतं प्रियसुहृदमतिथिं कुवलयाश्वमनुसरति ।

भैरु०—

को वि कं पि अणुसरउ अह ण कहिं पि वच्चिहिमि । आउहसुहाअरसुहा-संजाविअथंभिअं रुहिरसोत्तं कइ वि ण उण चइस्सं णच्चिस्सं णवरि रत्तिदिणम् । [कोऽपि कमप्यनुसरतु अहं न क्वापि व्रजिष्यामि । आयुधसुधाकर-सुधासंयापितस्तम्भितं रुधिरस्रोतः कदापि न पुनस्त्यक्ष्यामि नर्तिष्यामि केवलं रात्रिन्दिवम् ।] (इति निष्क्रान्तौ ।)

(इति चतुर्थोऽङ्कः)

अथ पञ्चमोऽङ्कः

(ततः प्रविशति चेटी ।)

चेटी—

आणत्तह्मि देईए वेसत्तिआए "हञ्जे पमदिए सुणसु दाव कधं चिराअदि चइत्तरधवणविहरणचिरणिग्गदा वच्छा मदालसे"ति । ता कहिं वट्टदि वित्थिणे चइत्तरधे गंधव्वराअधूदेति ? कं पुच्छेमि ? वेवदि तए क्खण-विरहिआणं पि अह्माणं दाणअपरिहवदिणादो पहुदि उक्खंडिदमूलबंधणं हिअअम् । (निरूप्य) एसा कुएरसिरिणो चेडिआ कोइलिआ णाएसरकुसुमाइं अव-चिणेदि ता इमं पुच्छिस्सम् । "हला कोइलिए ! को वि वलवन्तो तुह हिअअविक्खेवो जा पासट्ठिअं पि सहिं ण पेक्खसि ।"

[आज्ञप्तास्मि देव्या चेशन्तिकया—"हञ्जे प्रमदिके ! श्रृणु तावत्कथं चिरायते चैत्ररथवनविहरणचिरनिर्गता वत्सा मदालसे" ति । तत्कुत्र वर्तते विस्तीर्णे चैत्ररथे गन्धर्वराजदुहितेति ? कं पृच्छामि ? वेपते तया क्षणविरहितानामप्यस्माकं दानवपरिभवदिनात्प्रभृति उत्खण्डित-मूलबन्धनं हृदयम् । एषा श्रीकुबेरस्य चेटिका कोकिलिका नागकेसर-कुसुमान्यवचिनोति तदेनां प्रक्ष्यामि—"सखि कोकिलिके ! कोऽपि बलवान् तव हृदयविक्षेपो यत्पार्श्वस्थितामपि सखीं न पश्यसि ।"]

(प्रविश्य कुसुमावचयं नाटयन्ती) कोकिलिका—

हला ! पसिअ पसिअ तुवराविसेसेण लिहिदो इमस्सिं जणे सहीजणोवालंभ-वअणलंछणो ।

[सखि ! प्रसीद प्रसीद त्वराविशेषेण लिखितोऽस्मिन् जने सखीजनो-पालम्भवचनलाञ्छनम् ।]

प्रमदिका—

जाअदि ओवणिज्जं ण होज्ज ता अहं पि सुणेदुं महेमि तुवराकारणं।

[यदि गोपनीयं न भवेत् तदहमपि श्रोतुमिच्छामि त्वराकारणम्।]

कोकि०—

विसेसेण उआलद्धह्मि पिअसहीए। अइ रोसणे! अत्थि किंपि[1] हिअआदो वि गोवणि(ज्जं)? सुणाहि, तस्स पाहुणस्स क्खत्तिअदारअस्स कंठाहरण-मालिअं विरएदुं भट्टिणा कुएरसिरिणा णाएसरकुसुमाइं ओच्चिणेदुं णिउत्तह्मि।

[विशेषेणोपालब्धास्मि प्रियसख्या। अयि रोषणे! अस्ति किमपि हृदयादपि गोपनीयम्? शृणु, तस्य प्राघुणस्य क्षत्रियकुमारस्य कण्ठा-भरणमालिकां विरचयितुं भर्त्रा श्रीकुबेरेण नागकेसरकुसुमान्यवचेतुं नियुक्तास्मि।]

प्रम०—

हला! को एसो खत्तिअकुमारो?

[हे सखि! कोऽसौ क्षत्रियकुमारः?]

कोकि०—

जो किर पाआलकेदुग्गहमुहवडिदं वच्छं मदालसं अब्भुववण्णो।

[यः किल पातालकेतुग्रहमुखपतितां वत्सां मदालसामभ्युपपन्नः।]

प्रम०—

सहि! दिट्ठो तुए केरिसो रूअसीलेहीं गंधव्वलोअजीविदप्पच्चाणअणगरु-असुकअभाअणो जणो?

[सखि! दृष्टस्त्वया कीदृशो रूपशीलाभ्यां गन्धर्वलोकजीवितप्रत्यानयन-गुरुकसुकृतभाजनं जनः?]

कोकि०—

सहि! मा जाण तारिसदुट्ठदाणअदमणदुद्धरमुअभारप्पअंडचरिओ त्ति कडुअकक्कसो भीसणसहावो इमो ति। णं उब्भिज्जमाणमउलपंहलरोमंकुरे

1 The transcript reads अछदि कहिं पि

ईसिसामलिज्जन्तकवोलअरभाओ मुद्धमहुरमुहचंदलच्छीणिब्भच्छिअकुमारीजणहिअ(अ)धीरत्तणो विणअभारगरुअगहिरत्थपरिमिअवअणललहविहसिअसुहासु(हि)दजणणअणचओरो हिअअचोरो वच्छाए मदालसाए कए केण वि घडिदो ति तक्के मि।

[सखि ! मा ज्ञासीः तादृशदुष्टदानवदमनदुर्द्धरभुजभारप्रचण्डचरित इति कृत्वा कर्कशो भीषणस्वभावोऽयमिति। ननूद्भिद्यमानमृदुलपक्ष्मलरोमाङ्कुरेषच्छयामलायमानकपोलपरभागो मुग्धमधुरमुखचन्द्रलक्ष्मीनिर्भर्त्सितकुमारीजनहृदयधीरत्वो विनयभारगुरुकगभीरार्थपरिमितवचनसुन्दरविहसितसुधासुहितजननयनचकोरो हृदयचोरो वत्साया मदालसायाः कृते केनापि घटित इति तर्कयामि।]

प्रम० (सास्रम्)—

सहि ! णिक्करुणेण दिसापालेण कुएरसिरिणा हदा अह्मे जेण वलामोडिअ पडिवादिदा भट्टिणो विस्सावसुणो मुहेण दुद्दंसणे मणिभद्दे वराई मदालसा।

[सखि ! निष्करुणेन श्रीकुबेरेण हता वयं येन वलात्कृत्य प्रतिपादिता भर्तुर्विश्वावसोः मुखेन दुर्दर्शने मणिभद्रे वराकी मदालसा।]

कोकि०—

अलाहि। ण तुए मंतिस्सं। गंधव्वकण्णआणं मादरपिदरा वंधुणो वा पहुव्वंति ति अमुव्वो तुए पवट्टिदो कुलधम्मो।

[अपेहि ! न त्वया मन्त्रयिष्ये। गन्धर्वकन्यकानां मातापितरौ बन्धवो वा प्रभवन्तीत्यपूर्वस्त्वया प्रवर्तितः कुलधर्मः।]

प्रम०—

हला ! सोहणं मंतेसि, जइ मदालसाइ तेण राअकुमारेण वा णिव्वत्तिअ[1]-सअंगाहसाहसे भअवं अह्माणसामिओ णिहिणाहो ण कुप्पदि।

---

1. The transcript adds तए after this.

[सखि ! शोभनं मन्त्रयसि, यदि मदालसया तेन राजकुमारेण वा निर्वर्तितस्वयंग्राहसाहसे भगवानस्माकं स्वामी निधिनाथो न कुप्यति ।]

कोकि०—

पमुद्धासि । गन्धव्वजणा तुह्मे पहवध सिलोएहिं थुत्थिअ पहसणणट्टएहिं हासाविअ णिहिणाहं पसाएदुं ण उण दुद्दंसणवरसंप्पओअविघडिअं वच्छाए सोहग्गं जीविदं वा पच्चाणेदुं । अण्णं पि सुमरिदं मए ।

[प्रमुग्धासि । गन्धर्वजना यूयं प्रभवथ श्लोकैः स्तुत्वा प्रहसननाटकैर्हासयित्वा निधिनाथं प्रसादयितुं न पुनर्दुर्दर्शनवरसम्प्रयोगविघटितं वत्सायाः सौभाग्यं जीवितं वा प्रत्यानेतुम् । अन्यदपि स्मृतं मया ।]

प्रम०—

कीस तं ?

[किन्तत् ?]

कोकि०—

अज्ज एक्का अमअरसपण्हवन्तचउत्थणा गाइ वद्धंजलिपुडं विणअणमंतकंधरं भट्टिणं कुएरसिरिणं माणु(स)वअणेण भणंती आसि—दिण्णो मए मदालसाए अवरो को वि वरो । मा क्खु तुमं मणिभद्दस्स कए अणुरुंधिससि विस्सावसुं ति पणामिअ विसज्जिदा अ सा धेणू भट्टिणा ।

[अद्यैका अमृतरसप्रस्नवचतुःस्तना गौर्बद्धाञ्जलिपुटं विनयनमत्कन्धरं भर्तारं श्रीकुबेरं मानुषवचनेन भणन्त्यासीत्–दत्तो मया मदालसाया अपरः कोऽपि वरः । मा खलु मणिभद्रस्य कृते अनुरोत्स्यसि विश्वावसुमिति प्रणम्य विसृष्टा च सा धेनुः भर्त्रा ।]

प्रम०—

विसेसदो वेविदह्मि, कोसो अवरो वरोति ।

[विशेषतो वेपितास्मि, कोऽसौ अपरो वर इति ।]

कोकि०—

णं भणामि कुडिलेण बुड्ढवड्ढणा गालएण सो कुमारो भट्टिणा करे समप्पिदो भणिदो अ—"भट्टा इमस्स पाआलकेदुवहोपआरिणो परिणअम्मि बुमं पह-

वसि" त्ति ता तक्केमि तस्स बुड्ढबह्मणस्स थोरलट्ठिआओट्टंभिअखलंतचरणं हासाविदवालमहिलाजणं तवोवणादो दूरमागमणं दीहरणीसासवेअपल्हत्थ-णिद्दसणवअणक्खरं वअणं च मदालसेक्कपरं ति ।

[ननु भणामि कुटिलेन वृद्धवटुना गालवेन स कुमारो भर्तुः करे समर्पितो भणितश्च—"भर्तः ! अस्य पातालकेतुवधोपकारिणः परिणये त्वं प्रभवसी" ति तत् तर्कयामि तस्य वृद्धब्राह्मणस्य स्थूलयष्टिकावष्टम्भित-स्खलच्चरणं हासितबालमहिलाजनं तपोवनाद् दूरमागमनं दीर्घ-निःश्वासवेगपर्यस्तनिर्दशनवदनाक्षरं वचनञ्च मदालसैकपरमिति ।]

प्रम०—

सव्वदा तइआतणम्मि मं आसासेसि । परिणामं उण वच्छाए भाअधेअं णवरि जाणेदिति एहि साहेमो । (इति निष्क्रान्ते ।)

[सर्वदा तदात्वे मामाश्वासयसि । परिणामं पुनर्वत्साया भागधेयं केवलं जानातीत्येहि साधयावः ।]

(प्रवेशकः)

(ततः प्रविशति कुवलयाश्वः सुनन्दश्च ।)

सुनन्दः—

वयस्य ! साधारणमलङ्करणमिदमलकाहेमकूटयोरखिलयक्षगन्धर्वलोकयोर-संविभागोपभोग्यमुन्नमयति कैलासगिरिशिखराणि कुवेरोद्यानं चैत्ररथं नाम ।

परिसरसरःकूले मूले पुराणशमीतरोरिह
निधिपतेः सख्युः प्रीत्या वसत्यनिशं शिवः ।
नयनदहनाङ्गारैर्यस्योदरम्भरयः शिरः-
शशधररुचीराचामन्तश्चरन्ति चकोरकाः ॥१॥

अपि च,

कारुण्यसम्पुटिततललाटचक्षुः
सन्दंशयन्त्रकुटिलात्तिलकेक्षुखण्डात् ।

चण्डीपतिद्रुतसुधानवनीतसार-
मावर्जयत्यनिशमत्र कुमुद्वतीषु ॥२॥

कुव०—

उपपन्नमिदमूहितं प्रियवयस्येन ।

अधिवसति निमील्य क्रूरमाग्नेयमक्षि
प्रियसखनिधिनाथोद्यानमीशो गणानाम् ।
यदि मदनदहन्या तस्य दृश्येत दृष्ट्या
किमिह मदनमित्रं भस्म न स्याद्वसन्तः ॥३॥

सुन०—

प्रियवयस्य ! नूनमिदं कामारिकोपविपदामविषयं विषमलोचनसखपरिग्रहाद-कुतोभयमलकापुरोपवनमनारतमधिवसति मदनदाहदिनावधि निर्विद्य परिहृत-परिभ्रमणचापलः सखिव्यसनशोकगृहीततापसव्रतः पञ्चशरप्रियसुहृन्मधुमासः । पश्य ।

निर्दग्धे सति सायुधे रतिपतौ ये शम्भुकोपार्चिषा-
मङ्गारत्वमुपागताः स्मरवधूबाष्पेण निर्वापिताः ।
तैर्निर्माय शिलीमुखैर्गुणवतीमक्षस्रजं कौसुमै-
र्धूलीभस्मभिरेष भूसुरवपुर्धत्ते व्रतं माधवः ॥४॥

कुव०—

वयस्य ! जनासि क पुन(र)सौ नलिनी यस्यास्तटे दिनान्तातिवाहनमावयो-रुपदिष्टं भगवता यक्षनाथेन ?

सुन०—

ननु पुरत एव दृश्यते ।

कैलाससानुसरसीप्रतिबिम्बितानि
मूलेऽपि सञ्चितवती बिसिनीवनानि ।

छायासमुद्गपुटगर्भनिगूढमम्भो
रक्षत्यधश्चरदिवाकरपृष्ठतापात् ॥५॥

कुव०—

तदेहि नलिनीकूलपद्मरागवेदिकायामिह मुहूर्तमुपविश्य,

पश्येव प्रसरत्तदीयकिरणप्रत्यूषपूषातप-
च्छेदैः शोणसरोजकाननमिव श्वेतारविन्दव्रजम् ।
आशङ्के वहि कोपपाटलवधूनेत्रप्रभामुत्पले
मीमांसेवहि चक्रवाकपरिषच्चक्राङ्गचक्रे चिरम् ॥६॥

(उभौ परिक्रम्योपविशतः ।)

सुन० (निरूप्य)—

कथमुपरतमेवेदमहः ? तथा हि,

पश्यामि ध्रुवधामतोरणसखात्कैलाससानोरितो
ध्वान्तप्रेरितपृष्ठदुःस्थितमधोयान्तं वियत्पूरुषम् ।
यस्मान्निष्पततश्च्युतैरुपगतैः सङ्कोचमापिण्डितै-
रूर्ध्वैः रश्मिभिरर्कताम्रकलशः सिन्धुप्रघौ मज्जति ॥७॥

कुव०—

सत्यम् । अश्मसारकठोरान्धकारकालायसघनाभिहन्यमाना इव क्रमेण तरणिपृष्ठमण्डलं प्रविशन्ति सायन्तनकिरणतप्तसूचयः सूचयन्ति चास्य काल-सूत्रानुसारिणो द्विजराजखलीकरणापराधादधःपतनम् । पश्य ।

मग्नार्धो वरुणालयाम्बुनि धमद्धूतोद्गमो दृश्यते
गोकर्णायतरश्मिसूचिजटिलः पृष्ठावशिष्टो रविः ।
वासश्वभ्रमभिप्रवेष्टुमवनीमर्माविधः श्वाविधो
व्याधास्त्रव्यधशोणिताक्तशललीशालीव पश्चाद्वपुः ॥८॥

सुन०—

हन्त भोः ! अयमिह ज्योतिर्ज्वलन्यतिकरसिमसिभायमानः प्रभानिर्गम-

विवरावलिनिश्चोपपीतसरस्वदम्बुभारगुरुतरोदरो मग्न एव दिवसलक्ष्मीमङ्गलाभिषेकसहस्रधारकलशः कुशेशयवनमकरन्दपङ्कसङ्कटप्रतिवपनदुरुद्धरस्य बलवदाकर्षणोत्खातमूलस्य किरणकेसरकलापस्य वपाजालेन जर्जरो लुञ्चितकदम्बडिम्बानुकारी गगनरङ्गस्थलारामनागरङ्गफलनिस्तरलो निसर्गनिःशिखनिःशेष-(मुण्डित) यवनमुण्डपिण्डमलिनमण्डलो मार्तण्डः । पश्य पश्य ।

धूमायते सिमसिमायितमातनोति[1]
फेनायते विवृतबुद्बुदवारमम्भः ।
मग्नोऽपि पश्चिमसरस्वति दूरमाभि-
र्निह्नूयते न रविरच्छतराभिरद्भिः ॥९॥

(निरूप्य)—

प्रियसख ! तर्कय तावत् किमेतत् ?

आयम्य पादमवलम्ब्य नखेन शाखां
ग्रीवामुदस्य मुखनेत्रपुटान् विवृत्य ।
पक्षौ वितत्य तरुमूर्धसु वर्धयन्ति
चित्रार्पिता इव दृशोः कुतुकं चकोराः ॥१०॥

कुव०—

वयस्य ! किमन्यत् ?

सन्धिं निर्भिद्य निर्गच्छति तिमिरमयं शक्रदिग्भागभित्तेः
निद्रायै पङ्कजानां विकिरति परितश्चन्द्रिकाचूर्णमुष्टीन् ।
तारारत्नापहारे चटुलतरकरः कैरवाभोगमुद्रा-
ग्रन्थिच्छेदप्रगल्भः प्रविशति गगनागारमेणाङ्कचोरः ॥११॥

वयस्य ! विरहिजनवेदनाविटपिकन्देनामुना कोकलोकशोकाकरेण दोषाकरेण न केवलमात्मा किमुत राजपद्मपि कलङ्कितम् । पश्य ।

पद्मा ब्रह्मनिकेतनात्कुमुदिनीमित्रद्रुहं श्रीर्गता
त्रासात्पुण्यजनप्रियो गिरिदरीगर्भेऽन्धकारः स्थितः ।

दूराद्दूरतरं प्रयान्ति ककुभः पाण्डूभवद्भिर्मुखैः
पर्यस्तानि जगन्ति कर्कशकरे दोषाकरे राजनि ॥१२॥

सुन०--

विप्रतोपमुपालब्धो भगवान् विभावरीवल्लभः प्रियवयस्येन। ननु वक्तव्यमक्षीणपाड्गुण्यव्यवहारो द्विजराज इति। तथा हि,

सन्धाय त्यजतः शिलीमुखशतं मित्रोपचारक्रिया-
दक्षादक्षतबीजकोषनिचयान्नित्याम्बुदुर्गाश्रयात्।
अस्मात्कर्कशदण्डसङ्ग्रहदुराधर्षादवाप्तोदयो
राजा राजविरोधिनोऽम्बुजवनादाशु श्रियं कर्षति ॥१३॥

कुव०—

वयस्य! कथमस्य प्रति(कलं) कलङ्कितस्य विरहिजनप्राणविशसनदुश्चरितमपि समर्थयिष्यसे। पश्य।

दृष्ट्वा दुश्चरितं वियोगिषु विधोरुद्यम्य वीचीभुजं
सिन्धुर्वारयति स्मितैः कुमुदिनी साकूतमुल्लुञ्चति।
नैनं पश्यति पद्मिनी गुरुशुचा धत्ते निशा पाण्डुतां
कान्तैतस्य शिला द्रवत्यविरतं गच्छन्ति दूरं दिशः ॥१४॥

सुन०—

अहह! मत्सरोपमयथातथवस्तुवृत्तारोपणे कुमारमपि मुखरयति।

भूभृतां शिरसि पादमण्डलं
न्यस्य राजति स राजपुङ्गवः।
यस्य षोडशतमां कलां वह-
न्नीश्वरत्वमुपयात्यकिञ्चनः ॥१५॥

कुव०—

हा धिक्! अलीकलोकवादविप्रलभ्यमाणः प्रियवयस्योऽपि मरुमरीचिका-

सरिदवगाहनपूतो भवितुमिच्छति यदिहाधुनाप्युपरितनकोटरोदित्वरदव दहनार्चिष मूलङ्कपतटिनीप्रवाहजर्जरितजलस्य पुरजनदृश्यमानदुस्सहस्य दन्दशूकविहार-भूमिभूतस्य जातपूर्वविशाखस्य स्थाणोः शिरसि कान्तारपथिकेन केनापि बद्धं पटद्वरचीवरं राजकलेति व्यपदिशति ।

व्योमकेशस्य केशेषु दृश्यन्ते कुटिलाः कृशाः ।
व्योमारण्यबकग्रीवा निशाकरकलाच्छलात् ॥१६॥

(विहस्य)—

सखे ! दिविपदवलेहनलाञ्छनमिदमकिञ्चने भगवति भूतपतौ न तिलकेन्दु-कलेति सम्भावयितुमर्हसि । पश्य ।

कन्यारत्नं हयपरिवृढं नागराजं मणीनां
श्रेष्ठं दत्त्वा विबुधपरिषत्तोषिता सागरेण ।
धिग्दारिद्र्यं परिभवपदं यस्य दोषात्पुरारे-
र्मूर्ध्नि क्षिप्तस्त्रिदशविघसग्रासपिण्डस्य खण्डः ॥१७॥

सुन०—

परिभवमादरं वा द्योतयतु तथापि आस्वादितगरलस्य ज्वलितललाटास्थिभेदि-दहनस्य जीवातुरोषधिरसावोषधिनाथः शिरसि शम्भोः ।

कुव०—

विप्रतीपदृष्टिरियमवक्षिप्तचन्द्रिकायोगचूर्णेन चन्द्रेन्द्रजालिकेनोपकल्पिता प्रिय-सखस्य । न खलु जीवातुरसौ किमुत जीवितहरो भवति जैवातृकः ।

दृष्टेर्या भयभावनी विषमता कामस्य यद्दीपनं
यत् सामर्थ्यमिदं जगज्ज्वलयितुं कालानले शूलिनः ।
सर्वं चिन्तय षोडशस्य शशिनो भागस्य तज्जृम्भितं
तेषु स्वास्थ्यमुपैतु कः परिचितो येरेष पूर्णो विधुः ॥१८॥

सुन०—

आः कथमिदमुच्यते स एष भगवान् सोमो यदवयवमास्वादयामरत्वमापद्यन्ते विबुधाः ।

कुव०—

ननु सखे ! सोम इति नामसारूप्येण[1] विप्रलब्धोऽसि । इदन्तु निशाविषवल्लिफलमभ्यवहरन्तः सुषितनिमेषा वपुषा विगतच्छायेन परिहृतस्वेदा अमरा यदि सोमभुजो मृत इति कथमुच्यते कुणपः ।

सुन०—

प्रिय वयस्य ! न खलूल्लुञ्चितुमसौ युज्यते हरिणकः ।

कुव०—

कथमात्थ हरिणाङ्क इति । ननु पुराणखदिराङ्गारपिण्डोऽयं

निर्वाति क्रमशोऽर्करश्मिनलकैराध्माय सन्धुक्ष्यते
ध्मातप्रज्वलितश्चकोररसनस्वादून् कणान् वर्षति ।

सुन०—

तदा किमिदमस्यान्तस्तमालदलपेलवमालोक्यते ?

अस्मिन्नाम कुकूलकूटदहने कालायसं हेतये
क्षिप्तं चित्तभुवा तदूहरहिताः सोमाङ्कमाचक्षते ॥१९॥

सुन० (स्वगतम्)—

बलवदसूयति भगवते रोहिणीरमणाय प्रियवयस्यो, न खलु स्तोकेन कारणेन भवितव्यम् । भवत्वेवं तावत् ।

(प्रकाशम्)—

इदमिदं भवद्गुणानुरागतरलितेन तातेन तरलीकृतनागरत्नं चामीकरकण्ठसूत्रमुपायनीकृतं प्रियवयस्याय । (इत्यर्पयति ।)

---

1 The transcript reads सोमवीन्नाम (?)

कुव०—

शिरसा प्रतिगृहीतो भगवतस्तातस्य नागपतेः प्रसादः ।

सुन०—

तदियमलङ्करोतु कामिनीबाहुबन्धनैरनुच्छेषितं प्रियवयस्यकण्ठतटं कण्ठिका ।

कुव०—

सखे ! स्थापय तावदात्मनो वशे तातप्रसादमेनं न मामधुना भूषणपरिग्रहः सुखाकरोति । (इत्युन्मनायते ।)

सुन०—

वयस्य ! कनकपुरात्प्रतिनिवृत्तस्य भवतोऽपहस्तितपूर्वप्रकृतीनि चिन्तयामि चेष्टितानि ।

न भजसि रतिं ज्योत्स्नागौरीमुपास्य विभावरीं
मलयपवनैरुन्मोलन्तीर्न पश्यसि वल्लरीः ।
कथयसि विधौ दोषानासेवसे न च भूषणा-
न्यनुदिनमिदं पाण्डुक्षामं मुखं तव ताम्यति ॥२०॥

कुव० (सलज्जम्)—

कथमिह प्रतिपद्यते प्रियवयस्यः ?

सुन०—

तदिहाहमूहे ।

कस्याश्चिदुत्पलदृशो वदनं हृदये तवाधुना वसति ।
यदपहृतकान्तिमलिनो न रोचते तुभ्यममृतकरः ॥२१॥

कुव०—

सखे ! कथमिह विसंवदन्ति भवादृशामूहदृष्टयः ?

सुन०—

तत्कथय का कुत्र कस्यासौ या तव हृदयमहरत् ?

कुव०—

वयस्य ! मम कनकपुरमध्यमप्रासादशिखरमधिरूढस्य नयनयोरतिथिरासीद् विश्वावसुवंशवर्धना कुमारी ।

सुन०—

युज्यत एवाभ्युपपद्यमानेन जनेनाभ्युपपत्तव्यं वस्तु विलोकयितुम् । ततः किं तया ?

कुव०—

वयस्य ! बलवदुत्तपति शरीरमयमवारितो विभावरीवल्लभातपः । तदेहि नलिनीपरतटलतामण्डपापवारितः कथयिष्यामि ते वृत्तम् । (इत्युभौ उत्थाय परिक्रामतः ।)

(ततः प्रविशति लतामण्डपे मदालसा कुण्डला च ।)

मदा०—

हला कुण्डले ! अवि णाम तुए जाणिओ कस्स को ति सो (सि)विणअविणअहरो णिमिसमेत्तं कणअउरम्मि वि दिट्ठो क्खत्तिअजुआणो ?

[सखि कुण्डले ! अपि नाम त्वया ज्ञातः कस्य क इति स स्वप्नविनयहरो निमिषमात्रं कनकपुरेऽपि दृष्टः क्षत्रिययुवा ?]

कुण्ड०—

अयि गालवमुखादधिगते तस्यान्वयनामनी महाराजशत्रुजितः कुमारः कुवलयाश्वोऽयमिति ।

मदा० (स्वगतम्)—

कहं आहिआओ वि अणज्जवहपउत्तो मुसइ मे मंदभाइणीए हिअअं । होहिइ सो समओ जहिं पुणो चिरपिआसिआ लोअणचओरा तस्स मुहचन्दचंदिआहि थिप्पिहिंति ।

[कथमभिजातोऽप्यनार्यपथप्रवृत्तः मुष्णाति मे मन्दभागिन्या हृदयम् । भविष्यति स समयः येन पुनश्चिरपिपासितौ लोचनचकोरौ तस्य मुखचन्द्रचन्द्रिकाभिः तर्प्स्यतः ।]

कुण्ड०—

अस्यां निशि ।

मदा० (सहर्षम्)—

कीस इमस णिसाइ ?

[किमस्यां निशि ?]

कुण्ड०—

अस्यां निशि बहिरुपेत्य पश्याव कौमुदीविलसितानि ।

मदा० (स्वगतम्)—

असमत्तच्चिअ पिअसहीए मणहर आसि वअणं । (प्रकाशम्) हला पसिअ, पसिअ । ण सक्कणोमि इमासु भमिल्लभमरपिज्जंतमल्लिआपरिमलुप्पीड-पीअरजोण्हामडुक्काअवासु मउमासरअणीसु वाहिरं पसरिउं । कित्ति मं देव्व-दुव्विलसिअहुआसणसिहाडट्ठं पि पुणो चंडाअवे डहिउं महसि ।

[असमाप्तमेव प्रियसख्या मनोहरमासीद् वचनम् । सखि ! प्रसीद, प्रसीद । न शक्नोमि आसु भ्रमद्भ्रमरपीयमानमल्लिकापरिमलोत्पीड-पीवरज्योत्स्ना- मत्कारातपासु मधुमासरजनीषु बहिः सप्रर्तुम् । किमति मां दैवदुर्विलसितहुताशनशिखादग्धामपि पुनश्चन्द्रातपे दग्धुमिच्छसि ।]

कुण्ड०—

अयि चपले ! संस्तम्भय तावदात्मानमदुर्लभस्तव सुरभिप्रसादतः कुमारः ।

मदा०—

ता किं तेण च्चिअ विधिआ सरेण सो दाणअहआसो ?

[तत् किं तेनैव विद्धः शरेण स दानवहताशः ?]

कुण्ड०—

अथ को नाम मदनुकूलकमलिनीवनहिमसमयो हिमयति शतमखविलोचनानि ?

मदा०—

होउ किं पि । ण क्खु मह प्पहवइ सुरही । आवुएण कुएरोअहारी-कआए दुल्लहो मे आसंघो ।

[भवतु किमपि ! न खलु मम प्रभवति सुरभिः । आवुकेन कुबेरो-पहारीकृताया दुर्लभो मे आश्वासः ।]

कुण्ड०—

अयि विशेषविदुषि ! गन्धर्वकुलकन्यकानां युष्माकमात्मा प्रभवति भगवान् मकरकेतनश्चेति धर्मसमयः । को भवत्या(:) पिता ? कतरा माता ? कतमः कुबेरः ?

मदा० —

अलाहि दुव्विणओविणासिणि ण तुए मंतिस्सं ।

[अपेहि दुर्विनयोपन्यासिनि ! न त्वया मन्त्रयिष्ये ।]

(संस्कृतमाश्रित्य)

ज्वलति सुशकं चित्राचन्द्रातपे शलभायितं
दहति सुहवो देहः प्रौढे पुरोपवनानिले ।
सुलभविषये निर्वाणे कः स्वजीवितहेतवे
जनकवचनं नीचैरावर्जयेत्कुलजो जनः ॥२२॥

कुण्ड०—

बाढम् । एवमेतत् । परन्तु प्राणेश्वरप्रणयपाशबद्धा न परिमुच्यन्ते विरहिणा जनेन प्राणाः । तथा हि,

ज्वलति सुलभं चित्राचन्द्रातपे शलभायितं
दहति सुहवो देहः प्रौढे पुरोपवनानिले ।
सुग(म)विषये निर्वाणे का सहेत तथाकथा-
मथ परवशाः प्राणास्तस्य प्रिया इति दुस्त्यजाः ॥२३॥

मदा० —

पिअसहि ! जाणासि आसासिउं मंदभाइणं जणं । जं महिलासहस्स-लोअणपिज्जंतलडहत्तणस्स तस्स जणस्स मआलसाए देव्वदूहवाए प्पाणा प्पिआ त्ति (भणसि) ता डुप्पडिअरव्वाहिवाहिआ संमरिअव्वसेसा पिअसहीए मआ(ल)सा संवुत्ता । जइ ठाइ देइविअणं तइ टुट्टइ झत्ति वुट्टइ जीअं

मह विसमगाढगेंडीकंठे वडिओ पणअपा(सो) । (इति मूर्च्छति ।)

[प्रियसखि ! जानास्याश्वासयितुं मन्दभागिनं जनम् । यन्महिलासहस्र-लोचनपीयमानसुन्दरत्वस्य तस्य जनस्य मदालसाया दैवदुर्भगायाः प्राणाः प्रिया इति भणसि तद् दुष्प्रतिकरव्याधिबाधिता संस्मर्तव्यशेषा प्रियसख्या मदालसा संवृत्ता । यदि तिष्ठति दैवी वेदना तदा त्रुट्यति झटिति कर्षति(च) जीवं मम विषमगाढग्रन्थिकण्ठे पतितः प्रणयपाशः ।]

कुण्ड०— [।

हला मदालसे ! समाश्वसिहि समाश्वसिहि ।

कुव०—

प्रियवयस्य ! रमणीयतमोऽयमविरलमधुकरकुलच्छदनिवारितातपप्रसरः पिण्डित[1]कुसुमपरिमलः शतमखमणिमयपटल इव माधवीकलामण्डपः । इह हि,

अन्तर्दधाति मणिवेदिमयार्कबिम्बं
पृष्ठे बिभर्ति रजनीरमणस्य रोचिः ।
चित्रीयते निरवकाशविकासिसून-
लीनालिदम्पतिकदम्बघनान्धकारः ॥२४॥

मदा०—

हला कुण्डले ! पच्चुज्जीविअह्मि इमिणा तस्स सुहअस्स वअणसंवदंतेण सरेण, ता कुदो कस्स इमा वाआ ।

[सखि कुण्डले ! प्रत्युज्जीवितास्मि अनेन तस्य सुभगस्य वदनं संवद-मानेन स्वरेण, तत्कुतः कस्येयं वाक् ।]

कुण्ड०—

सखि ! शात्रुजितः कुमारः कुबेरमुपासितुमलकायां मुनिना गालवेनोपनीत इति श्रुतमासीन्मया कथयन्त्याः कोकिलकायाः ।

---

1 The transcript reads प्रसरपिण्डेत

मदा० (पुरोऽवलोक्य)—

सहि ! एसो केणवि वअस्सेण सहचरिओ इमं च्चिअ लआमंडवमणुसरइ, ता अम्हे गुम्मंतरिआ ठामो । (इति तथा कुरुतः ।)

[सखि ! एष केनापि वयस्येन सहचरित इममेव लतामण्डपमनुसरति, तदावां गुल्मान्तरिते तिष्ठाव ।]

सुनन्दः (प्रवेशं रूपयित्वा)—

वयस्य ! इयमायतकिरणजालवालातपदलितमण्डपगर्भान्धकारा मणिवेदिरिहोपविशतु कुमारः । (उभावुपविशतः ।)

सुन०—

प्रियवयस्य ! ततः किं तया ?

कुव०—

ततस्तया,

प्रकृतिसरलाः पूर्वं पश्चाद् विवृत्य विभङ्गुराः
तदनु निमिषत्पक्ष्मप्रान्तास्ततो मुकुलीकृताः ।
अथ पिपतिषद्बाष्पस्तम्भे मनाक् परिपाटलाः
पुनरनिमिषस्फीतविस्फारिता मयि दृष्टयः ॥२५॥

मदा० (अपवार्य, सासूयम्)—

हला ! कए दुट्ठमुहीए इमो सुदिट्ठो कओ ?

[सखि ! कया दुष्टमुख्या अयं सुदृष्टः कृतः ?]

सुन०—

अहो बलवदनुरागोपबृंहणपिशुना दृष्टिविभ्रमाः ।

कुव०—

प्रियसख !

प्रथमं [illegible]पात या समग्रा
मयि दृष्टिर्दलितारविन्ददृष्टेः ।

न चचाल विवर्तितोऽपि तस्याः
स्मरबाणैरिव कीलितस्त्रिभागः ॥२६॥

मदा० (अपवार्य)—

हा ! मुसिओ कए वि अणज्जाए दुग्गअस्स मह हिअअस्स एक्को जीअणधणो ।

[हा ! मुषितः कयाप्यनार्यया दुर्गतस्य मम हृदयस्यैकं जीवनधनम् ।]

कुण्ड—

अधीरे ! सम्भवसि त्वमप्यस्यापर्यवसितस्य कुमारवचसो विषयः ।

मदा०—

अवेहि, अज्ज वि मं मंदभाइणिं आसासेसि ।

[अपेहि, अद्यापि मां मन्दभागिनीमाश्वासयसि ।]

सुन०—

ततः किमाचेष्टितं तया ?

कुव०—

किमपरम् ।

प्रान्ताधरस्तबकितेन कपोलपालि-
मूलोन्मिषत्पुलकपल्लवदन्तुरेण ।
आरेचिताननरुचा वलितस्मितेन
व्यक्तस्तया चिरनिगूढ इवानुरागः ॥२७॥

मदा० (अपवार्य)—

सुणाहि कुण्डले ! सुणाहि । चिरणिऊढाणुराआइ वुत्तं पसंसइ किअवो । ता पिअसहि ! पसिअ, अणुजाणसु, परिच्चइस्सं विसेसदो हआसं सरीरं । हा ! हअम्हि मंदभाइणी इमिणा परकलत्तप्पसत्तहिअएण मह विणअहरेण किअवेण । (इति रोदिति ।)

[शृणु कुण्डले ! शृणु । चिरनिगूढानुरागाया वृत्तं प्रशंसति कितवः ।

तत् प्रियसखि ! प्रसीद, अनुजानीहि, परित्यक्ष्यामि विशेषतो हताशं शरीरम्। हा ! हतास्मि मन्दभागिनी अनेन परकलत्रप्रसक्तहृदयेन मम विनयहरेण कितवेन]।]

सुन०—

क पुनरालोकितपूर्वस्तया कुमार इति चिन्तयन्नपि न निश्चिनोमि ।

कुव०—

न खलु कालदेशविप्रकर्षाप्रतिहतचाक्षुपसर्गप्रजापतेर्भगवतः स्वप्नादितरं दर्शनोपायमधिगच्छामि ।

कुण्ड०—

अयि चपले ! स्वाप्निकसङ्गमसन्धितानुरागैव त्वमेनमवलोकयः कनकपुरे ।

मदा०—

अलाहि सहि ! ण तुए मंतिस्सम् । अलिअंपच्चासामअतण्हिआए मरण-निव्वाणसुहं विहडेसि ।

[अपेहि सखि ! न त्वया मन्त्रयिष्ये। अलीकप्रत्याशामृगतृष्णिकया मरणनिर्वाणसुखं विघटयसि ।]

सुन०—

अथ किमचेष्टतेयम् ?

कुव०—

अथ चकितमुदस्थादालिहस्तावलम्ब-
स्खलितवलयपुञ्जीभावभाजा भुजेन ।
कठिनमणिशलाकाशार्करे सौधपृष्ठे
यदुदितपदमेषा[1] मर्म तन्मे छिनत्ति ॥२८॥

मदा०—

हा किअव ! मंदभाइणीए मदालसाए हिअअमम्मगंथिच्छेदअ ! तुह मम्मं

1 The transcript reads मेया

इअरा का वि दुव्विणीआ च्छिदइ। हला कुण्डले! णादो वरं इमस्स दुव्विणीअस्स वअणं सुणिस्सं। परिच्चअसु मं। एत्तिओ मे संसारो। सुदिट्ठं मं कुणसु। (इति प्रतिष्ठते।)

[हा कितव! मन्दभागिन्या मदालसाया हृदयमर्मग्रन्थिच्छेदक! तव मर्म इतरा कापि दुर्विनीता छिनत्ति। सखि कुण्डले! नातः परमस्य दुर्विनीतस्य वचनं श्रोष्यामि। परित्यज माम्। एतावानेव मे संसारः। सुदृष्टां मां कुरु।]

कुण्ड० (बलान्निवर्त्य)—

कोपने! शृणु तावत् निह्नुतविषयं मनुष्यवचनम्।

सुन०—

अपि किमप्यभाषत तव हृदयतस्करी?

कुव०—

कस्यापि कोऽपि जयतीति यदा नताङ्गी
नीचैरुवाच तदवेहि ममाधुनापि।
एणीदृशा शितबुद्धिकुशाङ्कुरेण
विद्धैः पदैर्न हृदयादपयातुमीष्टे ॥२९॥

मदा० (स्वगतम्)—

सच्चअं च्चिअ दुव्विणीआ तिक्खबुद्धी होइ सा दारिआ जा तुह किअवस्स हिअअं विप्पलम्भइ। एक्का मदालसा मंदभाइणी बुद्धिरहिआ जा तुए एव्वं विप्पलद्धा वि धरेइ।

[सत्यमेव दुर्विनीतापि तीक्ष्णबुद्धिर्भवति सा दारिका या तव कितवस्य हृदयं विप्रलभते। एका मदालसा मन्दभागिनी बुद्धिरहिता या त्वया एवं विप्रलब्धापि धरति।]

सुन०—

ततस्ततः?

कुव०—

अथ सा कुलकुमारी किमचेष्टत, किमभाषत, किमहमकरवं, किमवोचमिति सुचिरमनुचिन्तयन्नपि, नाधुना स्मरामि, केवलमेतदीयवदनचन्द्राद्वैतविद्या-गुणनिकया गमयामि निरवसानदीर्घानिमान् वासरान्। तथा हि,

प्रतिदिनमुदयन्ते व्योमवर्त्मोच्चरन्ते
भुवमभिनिविशन्ते पार्श्वतः सञ्चरन्ति।
अभिमुखमुपसृत्यायान्ति धावन्ति पश्चाज्-
जगदिव मदिराक्षीवक्त्रचन्द्राः पिबन्ति ॥३०॥

मदा०—

सहि कुण्डले! णिवडामि तुह पाएसुं णीसहम्हि, ण सुणेमि दाव इमस्स दुव्विणीअस्स आहिजाइप्पडिऊलाणि हिअअडहणाइं वअणाइं। होदु, दुक्करो जम्मम्मि एसो पाविउं अणुमणउ मं पिअसही मरणे जम्मंतरे इमं पावेमि। (इति रोदिति।)

[सखि कुण्डले! निपतामि तव पादयोर्निस्सहास्मि, न शृणोमि तावदस्य दुर्विनीतस्य आभिजात्यप्रतिकूलानि हृदयदहनानि वचनानि। भवतु दुष्करो(ऽस्मिन्) जन्मन्यसौ प्राप्तुम्। अनुमन्यतां मां प्रियसखी मरणे, जन्मान्तरे इमं प्राप्नुयाम्।]

कुव०—

प्रियवयस्य! तदा तदीयवदनदर्शनानन्दनिद्रानिर्भरहृदयोऽहमकाण्ड एव कुतश्चिदाविर्भवता भगवता तुम्बुरुणा प्रतिबोधितोऽस्मि।

कुण्ड० (आकर्ण्य)—

कोपने! कनकपुरवृत्तरहस्यमिदमुदीरयति प्रियसुहृदे कुमारः।

मदा०—

तह वि णाम णत्थि मे आसंघो, चउद्दहभुअ(णचा)री क्खु भअवं तुंवुरु।

[तथापि नाम नास्ति मे आश्वासः, चतुर्दशभुवनचारी खलु भगवान् तुम्बुरुः ।]

कुव०—

प्रियसख !

तन्मर्मशल्यमिव चेतसि वर्तते मे
पातालकेतुसमराय समुद्यतं माम् ।
गन्धर्वराजतनया यदयाचतेयं
साङ्ग्रामिकं विजयवर्धनमप्रमादम् ॥३१॥

कुण्ड—

श्रुतमविस्रम्भस्वभावया त्वया ।

मदा० (कुण्डलामालिङ्ग्य)—

सुदं, सहि ! सुदं । पलुअ, पलुअ, क्खणमेत्तएण च्चिअ सो विअणामओ संसारो परिवट्टिअ पमअमओ जाओ । जेहिं सुव्वंतेहिं आसिं डड्ढा हिमेण भिसिणिव्व णिव्वावअंति ते च्चिअ पिअवअणा मं मरिज्जंता ।

[श्रुतं सखि ! श्रुतम् । पश्य, पश्य, क्षणमात्रेणैव स वेदनामयः संसारः परिवृत्य प्रमदमयो जातः । यैः श्रूयमाणैरासं दग्धा हिमेन बिसिनीव निर्वापयन्ति तान्येव प्रियवचनानि मां स्मर्यमाणानि ।]

कुण्ड०—

अयि दुरभिनिवेशिनि मदालसे ! सञ्चरस्व गन्धर्वकुलोचितेनाचारेण, स्वयं ग्राहय पाणिमनेन मनुजपतिकुमारेण ।

न स्पृशसि न प्रशंससि न शृणोषि कथासु नापि पश्यसि याः ।
ता एव कुमुदबन्धोः सपदि सुषीमा भवन्तु रुचः ॥३२॥

मदा०—

हा कहं कुएरसिरिणा आवुअस्स वइरमूलं हआसा मआलसा पिअसहीए काउमाढत्ता अहवा कआ च्चेअ ।

[हा कथं श्रीकुबेरेणावुकस्य वैरमूलं हताशा मदालसा प्रियसख्या कर्तुमारब्धा अथवा कृतैव ।]

कुव०—

वयस्य ! वयस्य । स्तम्भय माम् । अपहस्तयति मे धीरतामयमनुसन्धीयमानदुस्सहो व्यतिकरः ।

क्रूरे मयि व्रजति गद्गदसन्नवाचा
सान्देशिकं गदितुमक्षमया मृगाक्ष्या ।
उन्मुक्तवक्रिमलवा स्तिमितातिदीना
सास्रा मयि प्रणिहिता सकलापि दृष्टिः ॥३३॥

(इति मूर्च्छति ।)

मदा०—

हला कुण्डले ! परित्ताआहि मह मंदभाइणीए कदे अस्सअंतअं सअललोअलोअणविहाअरीवल्लहं दणुवंसधिसणपडिट्ठाविअपाअसासणसीहासणं महाभाअं ।

[सखि कुण्डले ! परित्रायस्व मम मन्दभागिन्याः कृतेऽस्तमयमानं सकललोकलोचनविभावरीवल्लभं दनुवंशग्रसनप्रतिष्ठापितपाकशासनसिंहासनं महाभागम् ।]

सुन०—

वयस्य ! समाश्वसिहि, समाश्वसिहि । (इति नलिनीदलजलार्द्रया वीजयति ।)

मदा०—

हा कहं अज्ज वि ण पडिवुज्झइ हआसमआलसाचरिअचंडादवमुद्दिओ सुचरिअचंदकइरआअरो । हला कुण्डले ! पडिदाआहि, पडिदाआहि ।

[हा कथमद्यापि न प्रतिबुध्यते हताशमदालसाचरितचण्डातपमुद्रितः सुचरितचन्द्रकरवाकरः । हला कुण्डले ! परित्रायस्व, परित्रायस्व ।]

कुण्ड०—

अये ! कथमयं हताशया कुण्डलया परित्राणीयः ? प्रियजनविरहव्याधिमूर्च्छितस्य को नाम वक्त्रमापाणिपरिमलनादितरो जीवातुः ?

सुन०—

हा ! किमिदमापतितं मम मन्दभागस्य गुरुव्यसनवैशसम् !

(आकाशे)

अयि मदालसे ! महति कुले जातासि, किमपराद्धमनेन तव विपदुद्धारिणा, यदयमीदृशीं दशामुपनीतः ।

मदा० (सहसोपसृत्य)—

महाभाअ ! एसह्मि मंदभाइणी तुह पिअवअस्सव्वसणमूलं मआलसा णाम । (इति कुवलयाश्वललाटे हस्तमर्पयित्वा) सुहअ ! सुहअ ! पडिवुज्झसु, ण जुज्जइ तुह सअलदाणअवीरणिद्दाविअरणवीअणिद्दस्स दीहरा णिद्दा ।

[महाभाग ! एषास्मि मन्दभागिनी तव प्रियवयस्यव्यसनमूलं मदालसा नाम । सुभग ! सुभग ! प्रतिबुध्यस्व, न युज्यते तव सकलदानववीरनिद्रापितरणवीतनिद्रस्य दीर्घा निद्रा ।]

कुव० (आश्वस्य)—

वयस्य ! निद्रासुखतिरोहितप्रियाविरहबाधः केन प्रतिबोधितोऽस्मि ?

सुन०—

न चामुना स्मरबाधानिशावसानशंसिना विश्वावसुनन्दनावचननिस्यन्दमयेन मङ्गलतूर्यनादेन ।

कुव० (निरूप्य)—

स्वागतमतिथिसत्कारकुशलाय जनाय ।

मदा० (साध्वसात्किञ्चिदपसृत्य)—

जअइ जअइ कोइ जणो । (इति लज्जते ।)

[जयति जयति कोऽपि जनः ।]

सुन०—

भवति ! न खलु भीषणमिह किमपि वस्तु, कुतः साध्वसादपसरसि ?

कुण्ड० (उपसृत्य)—

महाभाग ! किमुच्यते न किमपीह भीषणवस्त्विति ?

त्रस्यत्यस्मात्कुमाराद् दनुकुलनलिनीभङ्गमातङ्गमल्लाद्
गन्धर्वग्रामशल्योद्धरणकथासाक्षिणी मे वयस्या ।
यस्यास्त्रज्वालजालाविलविलविलपद्व्यालबालाकरालं
पातालं नाधुनापि त्यजति भयवशात्पाण्डुतामाननस्य ॥३४॥

सुन० (स्वगतम्)—

अहो मदालसासख्याः सुभाषितेषु विषूचीनवैदग्ध्यम् । तथा ह्यनया लेशतः सूचिता तादृग्विपदुद्धरणक्रिया । स्थाने मम वयस्यस्य भुजसारः प्रकाशितः । (प्रकाशम्) भवति ! कथं पुनरत्रभवती विश्वावसुनन्दना प्रियसखप्राणवित्राणाय दैवेन सन्निधापिता ।

कुण्ड०—

पृच्छतु प्रियसखीमेव महाभागस्य वयस्यः ।

कुव०—

अयि गन्धर्वकुलकेतनपताके ! कथयतु भवती ।

मदा०—

अज्जउत्त ! (इत्यर्धोक्ते सवैलक्ष्यम्) अज्ज ! उत्तपंतम्मि मिहिरे अम्हे एत्थ आगआओ ।

[आर्यपुत्र ! आर्य ! उत्तपति मिहिरे वयमत्रागताः ।]

कुव०—

भवति ! भवति असमापितखण्डितं यथैतद्वचनं चारुतरं तथा न पूर्णं सकलम् । न कलङ्किनं शशाङ्कं, प्रतिपच्चन्द्रकलां जना नमन्ति ।

कुण्ड०—

कितव ! राजदारक ! मम वयस्यया यया कयापि नामाभिधयाभिधेयोऽसि, मया पुनः प्रियवयस्य इत्यभिधीयसे ।

मदा०—

सहि ! मुंच वाचाडअत्तणं । (इति कुण्डलां सासूयं पश्यति ।)

[सखि ! मुञ्च वाचाटत्वम् ।]

कुव०—

तर्हि किमाह भवतीं मम प्रियसखी ?

कुण्ड०—

महाभाग ! तव सखी मम सख्युर्वरणकण्ठस्रजमन्वेषयति ।

सुन०—

इयमस्ति नागमणिनायका चामीकरकण्ठिका । (इति मदालसाकरेऽर्पयति ।)

कुण्ड०—

महाभाग ! शीलनिधे ! कुवलयाश्व !

वृतस्त्वमध्वर्युरिवानया स्रजा
प्रसूनधन्वाध्वरकर्म साधय ।
पदाब्जयोस्ते प्रमदाश्रुधौतयोः
स्वयं सखी मे तृणविष्टरायते ॥३५॥

(इति बलादिव मदालसाकरेण कण्ठिकां कुमारकण्ठे बध्नाति ।)

(नेपथ्ये)

भगवानुत्तराशाशासिता देवयोनिगणप्रभविता राजराजस्त्वामादिशति—वत्स कुवलयाश्व ! चिरमनुभावितो भवताहमात्मवदनेन्दुकौमुदीव्यवकलनं मीलितकुमुदाकरभावमिति ।

कुव० (सापत्रपम्)—

वयस्य ! एवमतिवत्सलाय भगवते तातप्रियसखाय गुह्यकपतये कथमिवाहं साहसविलक्षमात्मनो वदनं दर्शयिष्यामीति यत्सत्यमगाधे त्रपोदधौ मज्जामि ।

(नेपथ्ये)

भो भोः पिशाचगुह्यकयक्षगन्धर्वराक्षसविद्याधरसेनापतयो धावत रे ! धावत ।

मूर्च्छच्चण्डाट्टहासप्रतिरवभरितैरुत्पतद्भिः पतद्भि-
र्यक्षप्रासादभङ्गश्लथरजतशिलाकन्दुकैः क्रीडतीव ।
प्राप्तः पातालकेतुर्द्विषमवनिपतेर्दारकं निर्ग्रहीतुं
तञ्चान्विष्यन्नलब्ध्वा हरति धनपतेः पुष्पकं तालकेतुः ॥३६॥

कुव०—

वयस्य ! धनुर्धनुः ।

सुन०—

अयमुपगतः स्वयमेव पार्श्वद्वयावलम्बितधनुरिषुधिना दृढबद्धबन्धुरेण पर्याणेन कुवलयः ।

कुव०—

वयस्य ! त्वमात्मनः सखीं प्रापय साहसोचितत्वरितविविक्तेन वर्त्मना प्रतिष्ठानम् । अयमहमिदानीं मलिनवपुषमुन्मदध्वनिं दनुकुलपांसुलदुःशिलीमुखं प्रपदि विघटयामि पुष्पकादिषुशिखरोत्थितचण्डवायुना । (इति निष्क्रान्ताः सर्वे ।)

[इति पञ्चमोऽङ्कः]

अथ षष्ठोऽङ्कः

(ततः प्रविशतः प्रासादशिखरे कुवलयाश्वो मदालसा च ।)

कुव०—

अहो नैशावसानिकी प्रतिष्ठाननगरलक्ष्मीः । तथा हि,

परिणतनिशाकेशस्तोमे प्रभापलितोन्मुखे
व्रजति तमसश्चक्रे चक्रीवदङ्गपिशङ्गताम् ।
प्रविशति शनैराकाशाङ्कादधश्शमनस्वसा
निभृतमवनीगर्भादुन्मज्जति त्रिदशापगा ॥१॥

मदा०—

अज्जउत्त ! अहअं अंधारगभादो उभवंतिं भअवइं भाईरहिं दट्ठूण तक्केमि रत्तिम्मि आसि गंगा लोणाअरवाहुवेढणीलुक्का सणिअ णिसावसाणे पिअंकवालीअ णिग्गमइ ।

[आर्यपुत्र ! अहमन्धकारगर्भादुद्भवन्तीं भागीरथीं दृष्ट्वा तर्कयामि रात्रावासीद् गङ्गा लवणाकरबाहुवेष्टनलीना शनैर्निशावसाने प्रियाङ्कपाल्या निर्गच्छति ।]

कुव०—

युज्यते । अतएव मानमवर्धयन्निशि भगवती कालिन्दी ।

मदा०—

अज्जउत्त ! पलुअ दाव इमाओ दुवे पुण णइआओ परिहरिअपरोप्परसवत्तविरोहा सहीओव्व मिलंति ।

[आर्यपुत्र ! पश्य तावदिमे द्वे पुण्यनद्यौ परिहृतपरस्परसपत्नविरोधे सख्याविव मिलतः ।]

कुव०—

अयि नयनकौमुदि ! बलादिव त्वद्वदनेन्दुबिम्बादपकर्षति मम नयनमयं सितासितसरित्सम्भेदः ।

प्रतिष्ठाने सर्वाभ्युदयपरिनिष्ठेयमनयोः
सपत्न्योर्यत्सख्यं जयति रविजह्नुप्रभवयोः ।
अतो जाने राजन्वति विरतिवैराखिलजने
पुरेऽमुष्मिन्नेको व्रजति न वटोऽपि क्षयमिति ॥२॥

मदा०—

अज्जउत्त ! पलुअ दाव एसा रअणि विरामप्पडीवसिहाचक्किअकुम्मगीआलअव्वउब्भविऊण लुक्कइ ।

[आर्यपुत्र ! पश्य तावदेषा रजनी विरामप्रदीपशिखाचकितकूर्मग्रीवालतेवोद्भूय लीयते ।]

कुव०—

आ पश्यामि ।

निर्वान्त्यः पुनरुद्भवन्ति रजनिप्रान्तप्रदीपत्विषः
प्राग्भारान्मुहुरन्तरं निविशते निर्यान्ति चान्धन्तमः ।
औदर्यानलमान्द्यदोषशमनोमासेवमानः क्रियां
सौधो धूममिव प्रणालनलकैः पीत्वा मुहुर्मुञ्चति ॥३॥

मदा०—

हंत ! पत्तो गअणपेरंतं भअवं गोहूमचिक्कसपुरोडासमइलो णक्खत्तवई ।

[हन्त ! प्राप्तो गगनपर्यन्तं भगवान् गोधूमचूर्णपुरोडाशमलिनो नक्षत्रपतिः ।]

कुव० (निरूप्य) —

इदमहमपरन्न शङ्के ।

व्याजादनूरुकरचक्रमधूपसेक-
म्लायत्सुधादधिरुचेर्मृगलाञ्छनस्य ।
संयोज्य मेध्यपशुना मधुपर्ककांस्य-
स्थालीं वहत्यतिथये दिवसाय सन्ध्या ॥४॥

(पुरतोऽवलोक्य)—

कथमुदित एवोग्रकिरणकेसरकदम्बदन्तुरबिम्बडम्बः कदम्बकुसुमविडम्बनो विस्फायदम्बरचुम्बितप्रभास्तम्बडम्बरो ज्योतिषां पतिः ।

स्खलितपतितैराशास्कन्धापिं तैर्विततैः करैः
अयमभिनयन्मत्तावस्थामलक्तकपाटलः ।
प्रविशति नभोरङ्गागारं कुशेशयकानन-
प्रहसननटो वस्तुप्रस्तावनानिपुणो रविः ॥५॥

मदा०—

पलुअउ जउणासरे कुसेसअकाणणं अज्जउत्तो ।

[पश्य यमुनासरसि कुशेशयकाननमार्यपुत्रः ।]

कुव०—

प्रिये ! पश्यामि सरसि सरोरुहिण्याः कोकतरुणीसख्या सौहार्दम् ।

प्रियविरहविष(ण्ण)चक्रवाकी-
रुदितशुचा रजनौ निमीलिताऽभूत् ।
अथ सहचरयोः समागमेऽस्मिन्
प्रमदमसौ नलिनी स्मितैर्व्यनक्ति ॥५॥

(मदालसा सास्रमधोमुखी दुर्मनायते ।)

कुव०—

आं, किमेतत् ? विकसति कुशेशयकुले कथं कुशेशयसनाभिनयनायाः ज्ञातेयविरुद्धमिदं निमीलनं नाम नयनस्य ?

मदा०—

चक्काअघरिणीकमलिणीणं सहअरत्तणसिणेहं वण्णत्तेण अज्जउत्तेण घडिओ मे हिअअसल्लो । केच्चिरं पिअसहीए कुण्डलाए विरहविअणं सहाविअम्हि देव्वेण ?

[चक्रवाकगृहिणीकमलिन्योः सहचरत्वस्नेहं वर्णयता आर्यपुत्रेण घटितं मे हृदयशल्यम् । कियच्चिरं प्रियसख्याः कुण्डलायाः विरहवेदनां साहितास्मि दैवेन ?]

(प्रविश्य प्रतीहारीदर्शितेनाध्वना) कुण्डला—

जयति जयति प्रियवयस्यः ।

कुव०—

स्वागतं प्रियसख्यै ।

मदा०—

एहि पिअसहि णिव्वावेहि मे चिरविरहडट्ठाइं अंगाइं । (इत्युभे आलिङ्ग्योपविशतः ।)

[एहि प्रियसखि ! निर्वापय मे विरहदग्धान्यङ्गानि ।]

कुव०—

कथमेवमतिचिरायमाणया प्रियवयस्यया, तिष्ठतु तावदयमेवंविधानां भवदनुस्मरणभागधेयानामभाजनं, चिरविरहकातरा निजवयस्यापि विस्मृता ?

कुण्ड०—

अवितथमात्थ । प्राणावधिः प्रणयप्रकर्षकाष्ठेति प्राणप्रिया सहचरी सीमेयं मे

मदालसा प्रेम्णः। प्राणाधिकं सखे! त्वामारोढुं तस्य का शक्तिः?

मदा० (सासूयम्)—

हला णिक्करुणे! मुंच विअड्ढभंगिभणिएहिं कालहरणं। भणाहि कीस अहअं तुए परिच्चत्ता।

[सखि निष्करुणे! मुञ्च विदग्धभङ्गीभणितैः कालहरणम्। भण कथमहं त्वया परित्यक्ता।]

कुण्ड०—

अयि कोपने! कथयामि। कुवलयमधिरुह्य निमिषादतिक्रान्तेन कुवलयाश्वेन वायव्यशरपातविक्षिप्ते गतवति दिगन्तं दानवे तालकेतौ स्वयमेव दैवतप्रभावोपबृंहितचेतने धनपतिमुपस्थातुं प्रस्थिते पुष्पकविमाने नागराजकुमारमात्रपरिवारयोरावयोरनतिक्रान्तचैत्ररथोपशल्ययोरेव विजययात्रात प्रत्यावृत्य सहचरीभूते कुमारे तिरोहिते नागकुमारे कुवलयमधिष्ठाय धावतोश्च युवयोर्दम्पत्योरेकाहमद्भुततरमिममुदन्तमावेदयितुमगां पित्रोर्विश्वावसुवेशन्तिकयोः सकाशम्।

मदा० (स्वगतम्)—

हा जणणि! हा आवुअ! तुम्हेहिं सुणिअव्वो वज्जवडणभीसणो मआलसादुव्विणओ।

[हा जननि! हा आवुक! युवाभ्यां श्रोतव्यो वज्रपतनभीषणो, मदालसादुर्विनयः।]

कुण्ड०—

ततस्तालकेतुसन्निधानमदालसाविप्रकर्षाभ्यामनेकविधाभिरतिकष्टशङ्काभिर्मूर्च्छितौ पितरौ तव कुमारस्वयंग्राहवृत्तामृतेनोदजीवयम्। इयञ्च ताभ्यामभिलिखिता पत्रिका। (इत्यर्पयति।)

मदा० (वाचयति)—

स्वस्ति हेमकूटादञ्जमञ्जसवरप्रतिपादनेन त्वयि गृहशकुन्तिकाशौनिकवृत्तमभि-

नीतवन्तौ जरत्त्रिदशनटदम्पती स्वमतिवैभवाङ्कुरितकल्याणामायुष्मतीं केवलमिदमेव प्रार्थयावः ,

वत्से ! येन चिरायुषा गुणवता क्रीतासि तैस्तैर्गुणैः
मा तस्मिन् कृतकैतवेऽपि दयिते वामावलिप्ता च भूः ।
मा स्पृश्यस्व नृशंसदुश्चरितयोःपापोदयैरावयोः
भूयासुः श्वशुरस्य वृद्धनृपतेः पुण्यानि ते श्रेयसे ॥६॥

मदा०—

हला ण सक्कणोमि दट्ठुं ण अ वोत्तुं वाहेण वाहत्थंभेण अ णिरुद्धणअणवअणा संदभाइणी अहअं ।

[सखि ! न शक्नोमि द्रष्टुं न च वक्तुं बाष्पेण बाष्पस्तम्भेन च निरुद्धनयनवचना मन्दभागित्यहम् ।]

कुण्ड०—

धृतिमवलम्ब्य वाचय लेखशेषम् ।

मदा० (वाचयति)—

नावां ते पितरौ दुरन्तचरितौ न त्वं सुतास्यावयोः
आरूढः स्मृतिवर्त्म बान्धवजनो मामूमुहत्ते मनः ।[1]
अस्मद्दुर्नियतेरतिक्रमपटुः सोमान्वये चेद् विधिः
बन्धून् पुत्रि ! कुमारधूलिमलिनोत्सङ्गांस्तदा द्रक्ष्यसि ॥७॥

कुव०—

अहो ! निर्वेदनिगूढवत्सलोत्सेकानि तातयोरतिकरुणानि विलपितानि ।

कुण्ड०—

इदं च दुहितृप्रवासविमनसो विश्वावसोर्भयशोकावपनेतुमागतेन भगवता कुबेरेण कुमाराय पत्रमर्पितम् ।

---

1 The transcript reads मामूमुहते जनः ।

कुव० (गृहीत्वा वाचयति)—

स्वस्ति अलकाया भगवानुत्तरदिशः शासिता राजराजः कुमारकुवलयाश्व-मनुशास्ति—वत्स ! प्रियसखस्य शत्रुजितो हृदयानन्दचन्दन !

कोऽहं को विश्वावसुरवशिष्टा नौ मदालसा वत्सा ।
तस्या गुणानुरूपे त्वयि जामातरि कृतार्थौ स्वः ॥८॥

इति ।

मदा०—

हा भअवं ! जेट्ठावुअ । कुएरसिरी ! मरेमि मंदभाइणी तुह वच्छल-लालणाइं । हला ! दिट्ठिया ण मण्णु कओ मह दुव्विणएण कुएरसिरिणो ।

[हा भगवन् ! ज्येष्ठावुक ! श्रीकुबेर ! स्मरामि मन्दभागिनी तव वत्सललालनानि । सखि ! दिष्ट्या न मन्युः कृतो मम दुर्विनयेन श्री कुबेरेण ।]

कुव०—

सम्प्रति प्रसन्ने भगवत्यावुकसखे यक्षपतौ परिहृतखेदे च ताते गन्धर्वसार्व-भौमे सर्वतो निर्वृताः स्मः ।

कुण्ड०—

तदेवमभिमतपतिलाभमुदितमदालसावदनावलोकनिर्वृता प्रियवयस्याभ्यामनु-मताऽहमिच्छामि तपोवने शेषमायुः क्षपयितुम् ।

मदा०—

अव्वो एअं वि सुणाविअं देव्वेण हआसाए मदालसाए जं कुंडलाविरहिआ वि खणं जीविस्ससित्ति ।

[हन्त ! एतदपि श्रावितं दैवेन हताशाया मदालसाया यत्कुण्डला-विरहितापि क्षणं जीविष्यसीति ।]

कुण्ड०—

हला ! भवन्त्येवमेव संसारसरणिपान्थानां नलिनसूत्रभङ्गुराः सम्प्रयोगाः, न पुनरात्मनि निर्विद्यस्व। धन्यासि। पश्य,

कृच्छ्रेणोपचरन्ति दर्शनपथाद् दूरे स्थितं वर्ष्मणा
विच्छायं परलोकभावुकफलं देवं भजन्तो जनाः।
स्वाराधं सुभगं मनोनयनयोस्तत्कालकामप्रदं
प्रत्यक्षं पतिदेवते ! प्रियसखि ! प्राप्तं त्वया दैवतम् ॥९।

तदेष मे हताशाया विन्ध्यवद्दुहितुरिह जन्मनि चरमस्त्वयि प्रार्थनाञ्जलिः।

क्रुद्धं चाटुभिरुद्धतं स्मितमुखैरार्द्रापराधं प्रियैः
आयान्तं प्रवसन्तमायतिशुभैः सावेगमुत्साहनैः।
चिन्तादूनममुच्यमानधृतिभिः कामालसम्मन्मनैः
श्रान्तं तान्तिहरैरुपास्यवचनैः कान्तं समाधास्यति ॥१०॥

मदा०—

हा हअम्हि। तहामहुरवअणा पिअसही केण सिक्खिआ सुव्वंतमम्मविंधअं जंपिउं। (इति मुह्यति।)

[हा हतास्मि। तथामधुरवचना प्रियसखी केन शिक्षिता श्रूयमाणमर्मवेधकं जल्पितुम् ?

कुव०—

प्रिये ! समाश्वसिहि, समाश्वसिहि। (इत्युज्जीवयति।)

कुण्ड०—

प्रियवयस्य ! निसर्गवत्सले त्वयि किमस्ति मम वचनीयम्, एतावदेव सखीप्रणयमुखरा स्मारयामि।

न जानीते किंस्विन्मदविलसितं का पुनरसा-
वसूया किं वाम्यं क इव कलहः का कुटिलता।

सखे ! सा ते धर्माध्वनि सहचरी शान्तमथवा
गुणक्रीता दासी प्रकृतिसरला मे सहचरी ॥११॥

तदलमितरदशास्य दुर्लभाभिनिवेश····जनेन । एतावदेवाशासे,
प्रकृते परिवारदारिकाणामुपसंख्यानविधौ कुतोऽपि हेतोः ।
प्रथमं चरमं तदन्तरा वा गणनीया भवता मदालसापि ॥१२॥

(इति कुमारपादयोः पतितुमिच्छति ।)

(कुमारो वारयन्) –

आः ! कथं निजसखीवत्सलोत्सेकसेतुबन्धो विलोमं प्रवर्तयति स्नेहमयीं मम वयस्याम् !

कुण्ड० (सास्रम्)—

मम वचसा प्रतिजानीष्व तावत् परिजनेषु गणनीया मदालसेति ।

कुव०—

आः ! किमुच्यते ? परिवारेषु गणनीयेति ।

कण्ठपाशपदमेति कण्ठिका-
दाममाल्यविहितस्वयंवरात् ।
त्वत्सखीभुजमृणालतः परो
जीवतो मम न कामिनीभुजः ॥१३॥

कुण्ड०—

अयमहमिदानीमेकपत्नीव्रतविधौ तव संश्रुत्य संविदं निर्वृता विहरिष्यामि हरिणीभिः समं वने ।

मदा०—

णिद्दअहिअए ! जाणेमि, विसुमरिआ तुए अहं ।
[निर्दयहृदये ! जानामि, विस्मृता त्वयाऽहम् ।]

कुण्ड०—

अयि कटुभाषिणि । परमापवर्गपरिणिष्ठितापि कुण्डला मदालसां विस्मरतीति किमेनं जनमपवदसे । उन्मिषत्कुवलयप्रतिमल्लैर्लोचनाञ्चलविभङ्गितरङ्गैः त्वां तपोविपिनवर्त्मनि यावत् स्मारयन्ति हरिणाक्षि ! हरिण्यः, तदेष मया प्रथमेन पदार्पणेन प्रहतः प्रियसखीप्रणयभङ्गकर्कशः कदध्वा, सुखमनेन सञ्चरन्तां पिशाचदाराः । (इति रुदती निष्क्रान्ता ।)

मदा०—

हा ! पिअसहीए कुंडलाए विउत्ताम्हि ण उण णिसंसकक्कसेहिं पाणेहिं ।

[हा ! प्रियसख्याः कुण्डलायाः वियुक्तास्मि न पुनर्नृशंसकर्कशैः प्राणैः ।]

कुव० (स्वगतम्)—

बलवदुन्मनायते सखीविरहबाधया विधुवदना, तत्कथमेनामन्यतः क्षिपेयम् ।

(नेपथ्ये)

अब्रह्मण्यम् ! अब्रह्मण्यम् !

आक्रामन्तो मुनिजनशिरःशोणिताधारधारा-
ध्वस्तत्रेताहुतवहशिखाधूमपिण्डा इव द्याम् ।
जीवत्येव त्रिभुवनभयत्राणशौण्डे कुमारे
शाण्डिल्यस्य क्रतुविधिममी दानवा विस्रवन्ते ॥१४॥

कुव०—

आः ! कथमद्यापि दानवाः । हन्त ! बलवदुपालब्धोऽस्मि ब्राह्मणेन । एष गच्छामि मखपरित्राणाय । (इति प्रतिष्ठते ।)

मदा०—

अज्जउत्त । एरिसो ते मुनिजणपरित्ताणतुवराविक्खेवो जं अहं पि पासट्ठिआ ण आउच्छिआ ।

[आर्यपुत्र ! ईदृशस्ते मुनिजनपरित्राणत्वराविक्षेपो यदहमपि पार्श्वं-स्थिता नापृष्टा ।]

कुव० (परिवृत्य)—

अयि धृतिधने गान्धर्वि !

वृद्धौ मे पितरौ दिनेषु विनयादाराध्य कालं नय

द्वित्राः शीलनिधे ! निलीय गमय प्रासादकुञ्जे निशाः ।

अल्पैरेव दिनैः शपामि भवतीं सम्भावयेयं न चेत्

त्वत्पाणिग्रहकण्ठिका मम तदा कण्ठादपध्वंसताम् ॥१५॥

(प्रविश्य सम्भ्रान्ता) प्रतिहारी—

कुमार ! द्धंसिदा, द्धंसिदा ।

[कुमार ! ध्वंसिता, ध्वंसिता ।]

कुव०[1]—

अयि का ?

प्रती०—

णं भणामि द्धंसिदा अणत्थमूलं हुविस्सदि ।

[ननु भणामि ध्वंसिताऽनर्थमूलं भविष्यति ।]

कुव०—

अयि कट्टूरे ! किमबद्धं प्रलपसि ?

प्रती० —

ण क्खु किं पि अवद्धं भणामि, द्धंसिदा अणत्थमूलं हुविस्सदि मुणीणं जज्ञदिक्खा ता तुवरेदु कुमारो । एसो दुआरे अव्वह्मण्णमुग्घुसदि फुरंत-जडाविदाणओ ।

---

1 The transcript reads कुमा(र)-

[न खलु किमप्यबद्धं भणामि, ध्वंसिताऽनर्थमूलं भविष्यति मुनीनां यज्ञदीक्षा, तत्त्वरतां कुमारः। एष द्वारि अब्रह्मण्यमुदघोषयति स्फुरज्जटावितानकः।]

कुव०—

कथं दानवः!

प्रती०—

णहु णहु फुरंतजडाविदाणओ बह्मणो।

[न खलु न खलु स्फुरज्जटावितानको ब्राह्मणः।]

कुव०—

अयमहमागतस्त्वमेनं पर्यवस्थापय तापसम्।

प्रती०—

तथा। (इति निष्क्रान्ता।)

कुव०—

गान्धर्वि! अनुजानीहि मां मुनिमखत्राणाय।

मदा० –

अज्जउत्त! अहअं पि महेमि तुए सह मुणिघरिणीणं पादा वंदिउं।

[आर्यपुत्र! अहमपीच्छामि त्वया सह मुनिगृहिणीनां पादान् वन्दितुम्।]

कुव०—

अभ्यमित्रयात्रायामसमञ्जसः कलत्रसहभाव इति मुनिभिरनुरुध्य तपोवने विलम्बितो न चिराद्दूतमुखेनाह्वास्यामि भवतीम्।

मदा०—

कहं उण सो मए पच्चहिजाणिअव्वो तुह दूओत्ति!

[कथं पुनः स मया प्रत्यभिज्ञातव्यस्तव दूत इति।]

कुव०—

भवद्भुजावल्लिमृणालनाल-
संश्लेषसौख्यप्रतिभूः प्रवासे ।
त्वत्पाणिबद्धा कलकण्ठकण्ठि !
कण्ठेऽस्ति चामीकरकण्ठिका मे ॥१६॥

मदा०—

कीस तए ?

[किन्तया ?]

कुव०—

तया कण्ठिकया दूतं मम निश्चित्य तापसं तद्दर्शिताध्वना तन्वि ! ममान्तिकमुपैष्यसि ।

मदा० (सहर्षम्)—

ता उआगए तुह दूए मुणिम्मि अणाउछिऊण गुरुअणं परिअणं वा एआइणी तुह पासे पसरिस्सं ।

[तदुपागते तव दूते मुनावनापृच्छ्य गुरुजनं परिजनं वा एकाकिनी तव पार्श्वे प्रसरिष्यामि ।]

कुव०—

युज्यते ! तपोधनगुप्तायास्तव पथि किमनुचरान्तरेण मया परिवारितायास्तपोवने वा किं परिजनेन !

मदा०—

अज्जउत्त ! ण विलंविहसि तापसप्पेसणे । साहेसु मुणिजणपरित्ताणं ।

(इति निष्क्रान्ता ।)

[आर्यपुत्र ! न विलम्बिष्यसे तापसप्रेषणे । साधय मुनिजनपरित्राणम् ।]

कुव० (सोपानावरोहणं नाटयित्वा) --

क नु तत्रभवान् भगवतः शाण्डिल्यस्याश्रमादुपगतो मखपरित्राणेनार्थी तापसः ?

(ततः प्रविशति तापसवेषस्तालकेतुः ।)

तालकेतुः (निरूप्य, स्वगतम्)—

अयमसौ दुरात्मा राजन्यडिम्भः ।
येनामुनैकपुरुषे निजपौरुषेण
लुप्तं तदेकवचनं प्रथमाभिधेयम् ।
नाम्न्येव केवलमुदन्तपदेषु शिष्टे
पातालकेतुरभवन्न च पुमान्न च स्त्री ॥१७॥

अपि च;

यस्य वायव्यविशिखप्रतिक्षिप्तेन वायुना ।
परागवल्लघुरहं पुष्पकादपवाहितः ॥१८॥
तदेनमुपांशु नृशंसमपकर्तुमुपसर्पामि ।

(उपसृत्य प्रकाशम्)

अयमस्मि मुनिमखप्रत्यूहकथाशंसी यन्न कदाचिदागतपूर्वो हन्त दानवः ।

कुव०—

हन्त ! दानव इति शब्दः कथमद्यापि जनश्रवणमुद्वेजयति ।

ताल० (सत्रासम्)—

कुमार ! प्रश्लिष्टेनाकारेण परिसमाप्तेन च वचसा विप्रलब्धोऽसि । ननु कथयामि अहं तदा नव एवागतस्तव नगरमिति ।

कुव०—

भगवन् ! अभिवादये ।

ताल०—

आयुष्मन्! आयुषा वर्धस्व। त्वमसि नोपकारी तपस्विनाम्।

कुव०—

आः! कथमहं वस्तपस्विनामपकारी? लिखितोऽयमपूर्वशिल्पिना त्वया सोमकुले कलङ्कः।

ताल०—

श्लिष्टस्वरविकारगूढार्थव्यवहारिणो वयमभ्यस्तशब्दविद्यास्तापसाः। ननूच्यसे त्वमसि ना तपस्विनामुपकारी भवसीति।

कुव०—

कथय कुत्र विषये मुनेः शाण्डिल्यस्याश्रमो यत्र दानवविप्लुतं मखमभ्युपपत्स्ये?

ताल०—

आयुष्मन्! पुष्करकमलाकरोपकण्ठे।

कुव०—

तदनुमन्यस्व मामसह्यकालक्षेपाय मुनिमखत्राणाय।

ताल०—

आः! कथमपूरयित्वैवार्थिजनमनोरथमन्यतो व्रजन्निन्दुवंशजन्मा शशलक्ष्मणि पुनः कलङ्कमालिखसि?

कुव०—

केन भवानर्थी?

ताल० (स्वगतम्)—

त्वयि जातिवैरिणि प्राणव्ययाधिकदण्डपातनेन। (प्रकाशम्) प्रारिप्सिताध्वरदाक्षिण्येन हिरण्येन।

कुव० —

तदाह्वयामि परिजनमुपपादयतु स भवल्लिप्सिताधिकं धनम् ।

ताल० —

ननु तदात्वोपपन्नभैक्ष्यवृत्तयो न जातूपपाद्यं वसु लिप्सामहे । तदिदमस्ति तवोपसन्नं कण्ठाभरणमिदमेव पर्याप्यते क्रतुसंस्थापनाय ।

कुव० (स्वगतम्)—

पीडयति मामकाण्डस्खलनं कण्ठात् प्रियावरणदाम्नः आकस्मिक इव भिन्दन् मर्माणि मदालसाविरहः ।

ताल०—

त्वयि सुचिरनिरूढोऽसौ ।

कुव०—

अये कः ?

ताल०—

याचकजनातिसन्धानोपायविचारः ।

कुव०—

अहह कटूनि वाचाटस्य वटोरक्षराणि । (इति त्वरितमुद्वेष्ट्य कण्ठिकामर्पयति ।)

ताल०—

कण्ठिकया हतविघ्नं यदि कर्म समाप्यते मदारब्धम् ।
तद्गुरुभिर्निरवधिभिर्न चिरात्पूर्णो भवानर्थैः ॥१९॥

कुव० (वामाक्षिस्पन्दं सूचयित्वा)—

आः ! किमिदमनिमित्तमाशंसति परिस्पन्दमानमदक्षिणं चक्षुः ? अथवा, कण्ठिकाप्रत्यभिज्ञानविश्वसनीयेन तापसेन सह तपोवनमागमिष्यसीति मम प्रतिश्रवे विधिवशाद् विपर्यस्तविषये

त्यक्तप्रसाधनविशुद्धमुदञ्चितभ्रु
बाष्पायमाणनयनं स्फुरिताधराग्रम् ।
द्रक्ष्यामि नूनमुपगत्य ततः प्रवासात्
कोपारुणालिकतटं वदनं प्रियायाः ॥२०॥

ताल० (सहर्षं स्वगतम्)—

हन्त ! उपलब्धमस्मादेवास्य हताशस्य मर्माविदस्त्रम् ।

(आकाशे)—

हताशे मदालसे ! इयमियं न भवसि ।
कण्ठिकया प्रियलुब्धे ! त्वां विश्वसनीयदर्शिताकारः ।
दूरं हरामि हन्तुं बिसेन हंसीमिव व्याधः ॥२१॥

(इति निष्क्रान्तौ ।)

(इति षष्ठोऽङ्कः ।)

अथ सप्तमोऽङ्कः

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—

अहह !

यत्पूर्वं मम मध्यमेन वयसा श्मश्रूद्गमस्य च्छलात्
उत्सेकान्धमनार्यचेष्टितमसीलेपैरुपालिप्यत ।
धिक् तस्मिन् पलितातिरेकधवलीभावेन धौतोन्मुखे
मालिन्यं जननान्तरस्थिरमसौ लोभः पुनर्लिम्पति ॥१॥

(उपसृत्य)

हा ! कथमद्यापि मम 'स्वयं सञ्चरामी'ति नापसरति हृदयाद् व्यामोहः ।
मन्दज्योतिषि लोचने पथि पुरः शास्तीयमुच्चावचं
यष्टिर्मन्थरचारि कर्षति वपुः पाणौ गृहीत्वा मम ।

(खेदमभिनीय स्थित्वा)

धिक् ! किमनेन जराजर्जरस्य जीवितेन ?
आ नाभेरपवर्जितेन चिबुकं यष्टौ श्रमं न्यस्यता
कुब्जेन त्रिपदः पशुः शिशुजनत्रासाय सृष्टो मया ॥२॥

(नेपथ्ये)

आर्य कापिले ! जानासि क्व मे प्रियवयस्यः कुवलयाश्वः ?

कञ्चु०—

वत्स ! नागराजनन्दन ! सुनन्द ! इत इतः ।

(प्रविश्य) सुनन्दः—

आर्य ! अभिवादये ।

कञ्चु०—

वत्स ! वर्धस्वाभ्युदयेन ।

सुन०—

अपि कुशलिनौ नः पितरौ शैव्याशत्रुजितौ ?

कञ्चु०—

वत्स !

अधुनापि कठोरवेदनातुरचित्तौ त्यजतो न चेतनाम् ।
अधुनापि दुरन्तसञ्ज्वरज्वलितौ जीवत एव दम्पती ॥३॥

सुन०—

अहह ! बलवदुपक्षितमार्येण वधूवत्सलयोस्तन्नभवतोर्भुवनपालदम्पत्योर्मदालसा-व्यसनवैशसम् । आर्य ! कथमद्यया देव्या शैव्यया साम्प्रतमतिवाह्यन्ते दिनानि ?

कञ्चु० (सास्रम्)—

विभ्रमोपनीतमदालसाविस्मारितव्यसनवृत्तया देव्या शैव्यया,

कुत्रागत्य मुहुः प्रयासि ? परितो बाले ! कुतो भ्राम्यसि ?
त्वां नूनं चपलेन शास्ति विनयं शुद्धान्तवृद्धो जनः ।
धिग् ! धैर्यावमिदं पुरः श्वशुरयोर्मन्दे ! जहासि त्रपा-
मित्यारोपमयी कुमारमहिषी कोपादुपालभ्यते ॥४॥

सुन०—

तन्न शक्नोमि शोकोद्दीपनाय पितरावभिवादयितुम् । कथय कुत्र मे प्रिय-वयस्यः ? तमात्मसदनं नेतुमागतोऽस्मि ।

कञ्चु०—

बलवता केनापि कारणेन भवितव्यम्, यदेवं वधूव्यसनदुःस्थितयोर्नृपतिवृद्धयो-स्तनयप्रवासवैमनस्यमनुभावयसि ।

सुन०—

आर्य कापिले ! सरस्वतीवरवितीर्णदिव्यसारस्वतविज्ञानेन भगवता तातेन नागपतिना प्रणीतवस्तु मुक्तमदालसं नाम नाटकमद्य वारुणैर्नटैरभिनेष्यते । तदुपप्रेक्षणाय निमन्त्रितस्त्रिदिवात् पुरन्दरः, पातालाद् वरुणो, मध्यलोकात् कुमार इति ।

कञ्चु०—

वत्स ! अपि नाम मदालसानामाङ्कितस्य प्रेक्षणीयकस्य भवानितिवृत्तमुप-जानाति ?

सुन०—

आर्य ! कथमहं जानीयाम् ?

एको वेत्ति सु[धीः सु]धामतिलकः स्वामी गणानां शिवो
जानाति प्रतिपन्नविश्वचरिता देवी हिता या गिराम् ।
यत्तातः प्रवबन्ध दुर्लभमभिप्रेत्य प्रसादं तयो-
स्तस्य प्रेक्षणकस्य वस्तुनि न हि प्राज्ञश्चतुर्थो जनः ॥५॥

कञ्चु०—

तदेहि सितासितसरित्सम्भेदतटवाटबिल्ववाटीमधितिष्ठति वत्सो दानव-कुलान्तकः कुवलयाश्वस्तमुपसर्पावः । (इति निष्क्रान्तौ ।)

(विष्कम्भकः ।)

(ततः प्रविशति कुवलयाश्वः सुनन्दश्च ।)

सुन०—

वयस्य ! सन्निहितमिदं गालवाश्रमोपान्तपादपमूलङ्कषयमुनातटप्रपातपाटनं

कनकपुराभिगामि रसातलविवरवर्त्म । तदिह मुहूर्तमुपविश्य पश्यतु यमस्वसुस्सरांसि शरदागमश्रियं कुमारः । इह हि सकुतुकमाकर्ण्यते ।

निद्रान्तश्लथहरिबाहुबन्धवेल्लत्
केयूरक्वणितविरोधितोत्थितायाः ।
श्रीदेव्याः सरसिजमन्दिरोपकण्ठे
मञ्जीरध्वनिरिव राजहंसनादः ॥६॥

कुव० (उपविश्य)—

वयस्य ! न तथा प्राकृतप्रकृतिवैयात्यवीतापत्रपमात्मानमनुशोचामि यथैनमात्मनः पुराणपुरुषम् । तथा हि

असौ निन्ये वर्षाः कथमपि वधूविप्लवकथा-
सलज्जः पाथोदव्यवधिपटलीनः कुलगुरुः ।
मयूरीनृत्यान्ते घनजवनिकाक्षेपविवृते
नभोरङ्गे स्वाङ्गं शरदि कथमिन्दुः स्थगयतु ॥७॥

सुन० (स्वगतम्)—

बलवदपत्रपमाणमेनमन्यतः क्षिपामि ।

प्रकाशम्)

सखे ! पश्य शशिच्छेदधवले कालिन्दीपुलिने सैकतपिण्डयुगलमिव राजहंसमिथुनमाकर्षति सलोचनं चेतः ।

चञ्चूपुटेन कुटिला समसंविभाग-
भोग्या मृणाललतिका युगपद्गृहीता ।
स्तोकापि हंसमिथुनेन परस्परस्य
सीमव्यतिक्रमभयेन न भुज्यते ऽसौ ॥८॥

कुव०—

हा कुसुमशराम्नायसम्प्रदायसब्रह्मचारिणि !

संसारो हरिणाक्षि ! कोऽपि विधिना सृष्टो हताशस्य मे
प्रादेशान्तरपूर्वशैलशिखरो यत्राचलः पश्चिमः ।
आरूढामुदये सुधामयतनु ! त्वां यावदालोकये
तावल्लोचनशीतदीधितिकले ! ग्रस्ता त्वमस्ताद्रिणा ॥९॥

सुन० (स्वगतम्)०—

आः ! कथमयमुन्मत्त इवानपेक्षितपूर्वापरप्रबन्धमुदाहरति । भवत्वेवं तावत् ।

(प्रकाशम्)

वयस्य ! विचारयेदमस्मद्वचः ।

नीरन्ध्रा राजहंसच्छदपटलपरिक्षेपमुद्राभिराशा
नास्त्याकाशेऽवकाशो दधिमधुरसुधाधामधामप्रकाशैः ।
पुष्प्यत्काशा प्रसन्नोज्ज्वलसकलसरित्सङ्कुला काश्यपीयं
सिद्धान्तं निर्विवादं शरदि धवलिमाद्वैतवेदान्तविद्या ॥१०॥

कुव०—

वयस्य ! विचारयामि ।

कूजद्भिः प्रकटितराजहंसराजी-
दन्ताग्रैर्विघटितवारिवाहमुद्रैः ।
उत्तालप्रचलितसारसैर्मुखैर्मे
दाराणां व्यसनममूर्दिशो हसन्ति ॥११॥

वयस्य ! पश्य दुरात्मनः कुवलयाश्वस्य विधिविपर्यये महान्तोऽपि महिम-परिचययोर्विपरीतं प्रवर्तन्ते । तथा हि,

विलोक्य रविवैरिणः परिभवं सुधाशोः कुले
दिवाकरकुटुम्बिनी कमलिनी करोतु स्मितम् ।
सदैव हृदि सङ्गता कुलगुरोर्ममच्छायया
कथं हसति मामसौ नवविकासिकाशा मही ॥१२॥

सुन० (स्वगतम्)—

दारापहारपरिभवेण निर्विण्णमानसेनमन्यतो विनोदयामि । (प्रकाशम्) शुक्र-विगमादारभ्य शरदवधि गर्भमध्युवास भगवानम्भोजसखः । सम्प्रति तु,

गर्भादभ्रजरामुभारविगमक्षामोदरीणां दिशा-
माविर्भूय मरालमण्डलकलक्रेङ्कारमाक्रन्दता ।
क्षीरप्रस्रवधौतकालिमलवान्स्मादधः स्रंसतो
बालार्केण पयोधरात्करपुटग्राह्यं रसः पीयते ॥१३॥

कुव०—

हा ! कथमवदातावदाने सोमकुले कुलपांशुलं कुवलयाश्वमासाद्य विच्छिन्नं निवापसलिलस्रोतः ! हा देवि ! देववल्लभगन्धर्वकुलकेतनपताके !

त्वामाशासत गौरगात्रि ! गुरवो हारिद्रवासस्विनी-
मुत्सङ्गस्थगिते स्तनन्धयशिशावावर्जयन्ती पयः ।
पूर्वेषामुदकप्रसेकविषयां निःशेषयन्त्या कथां
तन्नाजानत यत् त्वयैव चपले ! पेयो निवापाञ्जलिः ॥१४॥

सुन० (स्वगतम्)—

हन्त ! न शक्यते रमणीयविषयान्तरदर्शनेनास्य चित्तवृत्तिराक्षेप्तुम् । (प्रकाशम्) न युक्तमतः परं चिरायितुमतिपतति प्रेक्षणीयकप्रेक्षासमय इत्येहि धरणिविवरवर्त्मावतरावः ।

कुव०—

सखे ! कथमविज्ञातदारजनविप्लवगतिना वीरचरितविकत्थनेन मया तातो नागपतिरवलोकनीयः ? अथवा, किमशक्यमपगतत्रपस्य वैयात्येन ? (इति विवरप्रवेशं रूपयतः ।)

सुन०—

वयस्य ! अयमसौ मूर्त्तिमानिव त्रिजगदापदुद्धरणसुचरितस्तोमस्तव सोमास्त्र-कौमुदीकदम्बः ।

कुव०—

हा वल्लभे गान्धर्वि !

विषमा ध्वान्तसरणिर्मा भूत्तव विभीषणा ।

अतो मयात्र सोमास्त्रकौमुदी नोपसंहृता ॥१५॥

सुन०—

वयस्य ! युवराज !

ये दानवास्तव शरानलदग्धपूर्वाः

तेषामिमे दनुकुलान्तकभस्मकूटाः ।

नागैर्भयादपसृतैरविलुप्यमाना

नाद्यापि पोरुषशरीरसमी त्यजन्ति ॥१६॥

कुव०—

धन्याः खल्वमी परपरिभवाणामनुपज्ञेन यशसा परं लोकमुपगता अपि जीवन्ति केवलमहमविदितगतिद्वारविप्लवसाक्षी जीवन्नपि म्रिये ।

सुन०—

अयमसौ गिरिगुहाविपुलकन्धरारन्ध्रनिखातचन्द्रास्त्रकिरणदण्डावलम्बितकौमुदी-लितपताकः पातालकेतुकबन्धः कुमारकीर्तिध्वजोभावमवलम्बते ।

कुव०—

हन्त ! माहात्म्यविरुद्धमनेनानुष्ठितं महात्मना ।

अवज्ञया वा दयया प्रसह्य

प्राणानसौ यन्मम नोज्जहार ।

इमामवस्थामुपनीतवतो मे

विधेरमी वा विधुरा विपाकाः ॥१७॥

सुन०—

अयमसौ कनकपुरोपशल्यचत्वरे समुदितः सुराहुरनागनरसमाजः तदिहाभ्यु-

वैतु वयस्योऽयमप्यावुकस्त्वामुपसर्पति । (इति परिक्रामतः ।)

(ततः प्रविशत्यश्वतरः ।)

[अश्वतरः]—

अहो नु खलु भोः ! शृणोतु, श्रुत्वा चावदधातु सकलोऽप्ययं दिव्यादिव्य-जनव्यतिकरः ।

खद्योतचुम्बितगवाक्षवितायमान-
लूतानिभेन किमनेन विलोचनेन ?
आरभ्य मित्रविपदुद्धरणप्रयासं
तुष्टस्य येन सुहृदो वदनं न दृष्टम् ॥१८॥

कुव० (अपसृत्य)—

तात नागपते ! शात्रुजितः कुवलयाश्वोऽभिवादयते ।

अश्व०—

वत्स ! चिरमप्रतिहताभ्युदयः पाहि पृथिवीम् ।

आरब्धपरिसमापितभुवनाभ्यनाट्यसूत्रधार ! त्वम् ।
प्रतिपत्सुधांशुमधुरो बालोऽपि जगन्नमस्योऽसि ॥१९॥

(इति सर्वे यथोचितमुपविशन्ति ।)

(नेपथ्ये)

निर्वर्तितः साङ्ग एष मया पूर्वरङ्गः ।

तथा हि,

प्रत्याहृतमवतारितमारब्धं श्रावितं दिशो बद्धाः ।
शक्रध्वजो निखातो निर्मृष्टः पुष्करो ध्रुवा गीता ॥२०॥

अश्व०—

वत्स ! तव नयनमनोविनोदनाय निबद्धमिदमनेन जनेनाविसंवादि वस्तु अनुभवानुरूपं रूपकम् , तदिहावदधातु कुमारः ।

कुब०—

विशेषेण गुरोरादेशादवहितोऽस्मि ।

(नेपथ्ये)

नान्यो वेद सुरः सुधामधुरतामापीतहालाहलो
मूर्धन्यस्तसुधांशुखण्डमुदितो देवः परं धूर्जटिः ।
एकः सान्तरदारसङ्गमरसं जानाति दाक्षायणी-
विश्लेषानुभवादनन्तरमुमादेहार्धतुष्टः शिवः ॥२१॥

अपि च,

तापं वः शमयेत् तुषारधवलः शुभ्रांशुरेखाविस-
च्छेदेनाङ्कुरितो जगत्कमलिनीकन्दः पशूनां पतिः ।
शाखासन्ततवेदपादपजटे लोकेशि लोकोत्तर-
ब्रह्मस्तम्बविसर्गसर्गनिपुणे वाग्देवि ! तुभ्यं नमः ॥२२॥

(प्रविश्य नान्द्यन्ते) सूत्रधारः —

अयमहमस्मि वारुणः सत्यचेष्टो नाम नटस्तत्रभवतः काद्रवेयस्य काश्यपेः कम्बलावरजस्याश्वतरस्य नागनायकस्य सारस्वतप्रसादनिर्भिन्नवाग्ब्रह्मविवर्तस्य विज्ञानद्रुमनिर्यासमाश्चर्यकरुणावीरभीषणप्रबन्धं मुक्तमदालसं नाम नाटकमभिनयामि ।

(नेपथ्ये)

हा अज्जउत्त ! कस्स हत्थे दिण्णा पच्चहियाण(कं)ठिआ ? ण होइ एसो तावसो, वलामोडिऊण ओहरइ मं कोवि गहिअविअडरूओ दाणओ । परित्ताआह रे ! परित्ताआह ।

[हा आर्यपुत्र ! कस्य हस्ते दत्ता प्रत्यभिज्ञानकण्ठिका ? न भवत्येष तापसो, बलात्कृत्यापहरति मां कोऽपि गृहीतविकटरूपो दानवः । परित्रायत रे ! परित्रायत ।]

सूत्र०—

राज्ञः शत्रुजितो भयान्मुनिवपुर्भूत्वा छलात् कण्ठिका-
विस्रब्धान्निभृतं निनाय नगरादेकाकिनीं दूरतः ।
शून्ये वर्त्मनि तालकेतुहतकः स्वं रूपमातिष्ठते
त्रासादस्य मदालसा कुलवधूस्त्रातारमाक्रोशति ॥२३॥

(नेपथ्ये)

हा अज्जउत्त ! तेल्लोक्कभयभंजणस्स तुह वल्लहो जणो अणाहो विवज्जइ ।
[हा आर्यपुत्र ! त्रैलोक्यभयभञ्जनस्य तव वल्लभो जनोऽनाथो विपद्यते ।]

सूत्र०—

इयमसौ मदालसा दानवेन पातालकेतुनिधननिरूढवैरेण दारुणेन तालकेतुना शीर्षच्छेदं हन्तुमाकृष्य खड्गं, केशग्राहं कृष्यमाणा करेण शोकत्रासोत्पीड-निर्भिन्नकण्ठी कृच्छ्रात् क्रोशत्यार्यपुत्रावदानम् ।

कुव०—

वयस्य ! वयस्य ! सखी ते व्यापाद्यते । धनुर्धनुः ।

सुन०—

अतिक्रान्तं वृत्तमभिनयन्ति नटास्तत्किमावेगेन ?

कुव०—

तत्किमतिक्रान्तचरितमिदम् ? निर्वृतकर्तव्योऽभूद् दानवः ? (इति मूर्च्छति ।)

सुन०—

आश्वसिहि, पश्य नाट्यस्य निर्वहाणान्तं वस्तु ।

सूत्र०—

असौ मदालसाप्राणत्राणहेतोर्नभःपथे यदृच्छया गिरां देवी विधिना सन्निधापिता । (इति निष्क्रान्तः ।)

(गर्भामुखम् ।)

(ततः प्रविशति सरस्वती ।)

सर० —

साधु, साधु, रे वत्सवात्स्यायनवंशवर्धनाः कवयः !
न प्राप्ताः कुशकर्कशैः कठिनतां स्रष्टुः करैरष्टभिः
श्रीभर्तुर्न कदर्थिताः करुणया कोपेन वा धूर्जटेः ।
तेनाद्यापि मयापि वीक्षितचराः सत्यं रसेभ्यः शपे
युष्माभिर्विषयेषु कुतुकादारोपितं मे पदम् ॥२४॥

(अपूर्वं पथि परिक्रम्य)

जीवत, रे ! जीवत, पुत्रकाः ! सुभाषितव्यतिकरेर्ष्याकषायनयनानल-कवलिताननस्य फणिपतेः फणादाहिनः फणंदहा वैदेहाः । आकल्पमुप-कल्पन्तां सज्जनकण्ठाकल्पभावाय वः प्रबन्धशरीराणि । सुखममुष्मिन्ना-युष्मद्भिरुपकल्पिते पथि परिक्रामामि ।

बन्धप्रौढिवशान्मदीयसि यदारोपौचिती निर्मिता
नीतः कर्कशरीतिशार्करतया क्रूरो रसादार्द्रताम् ।
वाग्वैचित्र्यमरीचिकासु विरसे सारस्यमारोपितं
वत्सैर्वत्सकुलाङ्कुरैर्नवनवः पन्था ममोन्मीलितः ॥२५॥

कुव० (आश्वस्य)—

तात नागपते ! को नाम वंशो भगवत्याभिनन्द्य प्रस्तूयते ?

अश्व०—

स एष वाजसनेयिमाध्यन्दिनमूर्धन्यानामखिलविद्यास्थानविश्रमपावनच्छायो वंशः यमधिकृत्य भवच्चरितनिर्वचनवाचोयुक्तिसन्ततेरविच्छेदमिच्छता मया प्रणम्य प्रार्थिता परमानन्दमयस्य वाग्ब्रह्मणोऽधिष्ठातृदेवता ।

अङ्गीकर्तुं निगमजलधेर्गाधमानाय दण्डं
पाणौ कर्तुं स्खलनपतनस्तम्भिनीं यष्टिमेकाम् ।

निर्मातुं च स्थितिगृहमसौ रामभद्रप्रसूतो
वंशस्तम्बो भगवति गिरामीश्वरे ! वर्धनीयः ॥२६॥

(नेपथ्ये)

आः कुलपांशुले ! इयं न भवसि ।

सावज्ञं खलु जितकाशिता प्रमादा-
दार्यं मे निभृतवधेन यो निहत्य ।
नीर्वीर्यं जगदपि मन्यते स पापः
पापे ! त्वामवतु शिरस्तवोद्धरामि ॥२७॥

कुव० —

तात ! प्रियतमाप्राणव्यसनादपि व्यथयन्ति माममी दुरात्मनो दानवस्याधिक्षेपवादाः ।

(पुनर्नेपथ्ये)

अरे हआस ! दुट्ठदाणअ ! कुअलअस्ससिरिणो घरिणो ण वीहामि मरणादो, न उण मरिसेमि अज्जउत्ताहिक्खेववअणं । सुमर सुमर तं दिअहं णिहिणाहविमाणमूसओ चोरो लीलीइ उअक्खितो जाला तुं तूलपिंडोव्व । अवि अ रे ! अणाहणारीवहविअत्थाणपंडिअ ! मा कइवि सो विउज्जउ कित्तिकलत्तेण अज्जउत्तो मे । कति ण अम्हारिसिओ मरंति जीअंति दासीओ ।

[अरे हताश ! दुष्टदानव ! श्रीकुवलयाश्वस्य गृहिणी न बिभेमि मरणात्, न पुनर्मर्षयिष्याम्यार्यपुत्राधिक्षेपवचनम् । स्मर स्मर तं दिवसं निधिनाथविमानमूषकश्चोरो निलीयोपेक्षितो यदा त्वं तूलपिण्ड इव । अपि च रे ! अनाथनारीवधवृक(?)स्थानपण्डित ! मा कदापि स वियुज्यतां कीर्तिकलत्रेणार्यपत्रो मे । कति नास्मादृश्यो म्रियन्ते जीवन्ति-(च)दास्यः ।]

सुन०—

वयस्य ! श्रुता प्रणयधारत्वयोरन्योन्यमहिलासाधारणी प्रकर्षसीमा ।

सर० (श्रुत्वा)—

आः ! कथमखिललोकोत्तरपुरुषसनाथाप्यनाथेव कुलवधूर्विपद्यते ? (निरूप्य, सहर्षम्) साधु वत्स ! विपन्नजनाभ्युपपत्तिधनेन त्वया सनाथो नागवंशः ।

कुवलयाश्वसुनन्दौ—

केन महात्मना नागेनाभ्युपपन्ना वराकी गन्धर्वतनया स्यात् ?

सर०—

पश्यत रे ! पश्यत, यत्कृतमनेन सुकृतसमुद्रेण काद्रवेयेण,

दोःस्तम्भस्तालकेतोरुदयदसिलतावर्धितोत्तुङ्गभावो
नागेनाकृष्य दर्पान्नृपतिकुलवधूमाजिघांसुर्विभुग्नः ।
उत्पातक्षुब्धकुक्षिस्थगितहुतभुजः कन्धरारन्ध्रधावद्-
धूम्यादण्डस्य केतोरिव तुहिनकरग्रासलुब्धः कबन्धः ॥२८॥

कुवलयाश्वसुनन्दौ—

अहो सुगृहीतनाम्नो नागप्रवरस्य पराक्रमप्रकर्षः !

सर०—

अहो ! प्रवृत्तमनयोर्नियुद्धकुशलयोर्नागदानवमुख्ययोरनायुधप्रधनम् ।

अन्योन्येन विभज्य सङ्घटितयोर्दुर्वारयोर्वीरयोः
द्यामुर्वीञ्च पिनष्टि निष्ठुरशिरःसङ्घट्टघोरध्वनिः ।
यन्निष्पेषविदीर्यमाणधरणीत्वक्सन्धिगङ्गामरुद्-
वेगान्दोलितदालिमीफलतुलां पातालमारोहति ॥२९॥

कुवलयाश्वसुनन्दौ—

तात ! बलवदुत्कण्ठते निरुपधिकारुण्यनिधेः परबाधाबाधितस्य सुगृहीतं नाम श्रोतुमियं श्रोत्रवृत्तिः ।

अश्व०—

वत्सौ ! भवन्ति जगति पराक्रम्य परेषामुपकुर्वन्तः । किमत्र चापलेन ?

(नेपथ्ये)

मीलंति मे लोअणा, घुम्मइ मे सीसं, तिरक्करेइ च्चेअ णं विलिओ अंधारो ।

[मीलतो मे लोचने, घूर्णते मे शिरः, तिरस्करोत्येव ननु व्रीडितोऽन्धकारः ।]

सर०—

अरे रे परिवारविद्याः ! नागनिःश्वसितधूमविषाभिभूतामिमां नयत सारस्वतं संसारम् । अयि वत्से मदालसे ! गच्छ त्वमाभिः सह विद्याभिरहमप्यनुपदमागच्छामि ।

(नेपथ्ये)

एसा वच्चामि उअरिहेट्ठलोअगआगअहिंडोलाभमिल्लिआविहिणो खेल्लणपुत्तलिआ मंदभाइणी । भअवइ ! एत्तेओ मे अज्जउत्तवअणचंदचंदिमामहूसवो ।

[एषा व्रजामि उपर्यधोलोकगतागतहिन्दोलभ्रमयितुर्विधेः खेलनपुत्तलिका मन्दभागिनी । भगवति ! एतावानेव मे आर्यपुत्रवदनचन्द्रिकामहोत्सवः ।]

सर०—

आः चपले ! का त्वमस्याममस्तुतचिन्तायाम् ?

कुव० (स्वगतम्)—

हन्त भोः ! हृदयमर्ममूलङ्कषाः प्रमद(ा)शोकसम्भेदविवर्ताः ।

सर०—

सारस्वतं भुवनमारूढा मदालसा । तदितः पश्यामि । (निरूप्य) कथमसौ कनकावदातवपुर्नागो ध्वान्तमलिनेन दानवेन सह घटमानो भुजनिष्पेषघोषेण घूर्णयति रोदसी । अहह !

संरम्भव्यतिषक्तपिङ्गवदनौ विष्टब्धदोःकन्धरौ
श्वेतश्यामलशैलशृङ्गविपुलौ मल्लौ बलाद् भ्राम्यतः ।

प्रस्तार्धार्धसुवर्णशैलकटकावन्योन्यसन्ध्यामुख-
प्रश्लेषव्यतिघट्टिताविव घटाबद्धौ निशावासरौ ॥३०॥

कुवलयाश्वसुनन्दौ—

अपि नाम स्वस्ति स्यादार्तपरित्राणप्रणयिने महाभागाय नागाय ?

सर० (सहर्षम्)—

वत्स ! नागनायक ! प्रतिष्ठापिता त्वया पुत्रवतीनां पदे क(श्यप)सधर्मिणी कद्रूः । दग्धः कालकूरया दंष्ट्रया ते दष्टो नष्टो दानवस्तालकेतुः ।

कुमारौ (सहर्षम्)—

शान्तमखिलभुवनोत्पातेन ।

सर०—

वत्स ! काद्रवेयकुलतिलक ! त्वद्वक्त्रोद्यज्जातवेदोविशुद्धामादत्स्वेनां कण्ठिकां भस्मकूटात् ।

कुव०—

वयस्य, न केवलं तव वयस्या यावदस्यावरणकण्ठिकापि महाभागेन नागेनाभ्युपपन्ना यदात्मसादक्रियत ।

सर०—

वत्स ! भुजगवंशभूषण ! प्रसन्नास्मि तवामुना विक्रमेण । स्वतः प्रकाशतां तव ध्वनिवर्णभेदभिन्नशब्दविवर्तव्यञ्जनीयं स्वराक्षरपरिचेयं रसमयं सारस्वतं ब्रह्म । कथय किमपरं ते प्रियमुपकरोमि ?

(नेपथ्ये)

भगवति । किमितरेण वरेण ?

यदा यदा येन मनोरथेन
ध्यातास्मि वाचामधिदेवते ! त्वाम् ।
तदा तदा तत्परिपूरणाय
पुरो ममाविर्भवितासि मातः ॥३१॥

कुमारौ—

तात ! स्वरसंवादि नागपतेर्वचनम् ।

अश्व०—

संवदत्येकवंश्यानां वचनेषु स्वरः ।

सर०—

वाढम् । (इति निष्क्रान्ता ।)

(गर्भाङ्कः ।)

सुनन्दः —

कथमसौ निर्व्यूढनाटकपरिसमाप्तकुतुको विघटमानः प्रसरति दशदिशो-दिगन्तागतदिव्यपुरुषाणां समाजः ।

एकः स्तौति नटस्य गीतिमपरो नान्दीकरं श्लाघते
नृत्तानामितरः प्रशंसति गुणानाशास्ति नृत्यं परः ।
कश्चिन्निन्दति दानवस्य चरितं दुर्वैशसं वा विधेः
अन्यः कोऽपि मदालसां करुणया दूनो जनो ध्यायति ॥३२॥

कुव०—

तात ! यस्य प्रतिदिशं प्रतिष्ठमानसामाजिकजनतागीयमानबाहुबलस्य नागपतेरपरिचितमूलोद्भेदा सरिदिव पावयति पवित्रचरित्रस्य कीर्त्तिरस्माम् तमेनं नामतो महात्मानमधिगन्तुमिच्छामि ।

अश्व० (वाचमवधीर्य)—

वत्स ! तालकेतुकैतवापहृतकण्ठिकाविरहकलङ्कितकण्ठो न शोभसे, तदेनामलङ्कुरु कण्ठपरिग्रहेणापरां कण्ठिकाम् । (इति कुमारपाणावर्पयति ।)

कुव० (निरूप्य)—

वयस्य ! पश्यसि ।

याता तस्य करात् त्वया तव कराद् गन्धर्वपुत्र्या तया
तस्या वेत्सि करात् स्वयंवरविधौ कण्ठेन मे प्राप्यत ।

एषा सैव मया नृशंसमनसा तस्मै द्विजच्छद्मने
दत्ता श्रेयसि वैशसे च करणं कल्याणिनी कण्ठिका ॥३३॥

तात ! कथमस्यास्तालकेतुभस्मनस्तेन नागपतिनोद्धृत्य स्वीकृतायास्तातकरे पुनरागमनम् ?

अश्व०—

शत्रुजित्प्रियसुहृदस्तस्य नागस्य धर्मतः स्नुषैव भवति वत्सा मदालसेति महतो व्यसनादेनां वधूमपि त्रातवता तेन कीर्तिश्च रक्षता मदेकजीवितेनात्रजने न्यक्षेपि कण्ठिका ।

कुव० (स्वगतम्)—

अपि त्रातवता तेनेति तातवचस्तत्रभवन्तमेनमपि तातं भक्तिवशेन विषयीकरोति । न हि भवत्यसौ जनकः कथ्यते च गौरवोपचारिणा तातपदेन ।

अश्व०—

वत्स ! किं विमृष्यसे ?

अकारणे कारुणिकः पुमानहो
मदालसामभ्युपपन्नवानिति ।
अपैतु ते चेतसि विस्मयो यतो
जनो निजाङ्केन जनीमपेक्षते ॥३४॥

तदलङ्कुरु कण्ठिकया कण्ठम् । (कुवलयाश्वः सलज्जं सुनन्दमीक्षते ।)

सुन०—

आवुक , प्रियवयस्यो वयस्यया मदालसयैव बध्यमानं कण्ठिकादाम कण्ठेन वोढुमिच्छति ।

(अश्वतरो ध्यानं नाटयति ।)

(ततः प्रविशति सरस्वती मदालसा च ।)

मदा०—

भअवइ कहिं णेसि मं ?

[भगवति ! कुत्र नयसि माम् ।]

सर०—

वत्से ! नयामि त्वामितरजनैरसुलभेन सारस्वतप्रसादानुरूपेणाभ्युदयेन वर्धयितुम् ।

मदा०—

केरिसो मह मंदभाइणीए अज्जउत्तवअणणलिणपरिमलवंचेआए(ए)लोअंतरभमणभमरीए अब्भुदओ ?

[कीदृशो मम मन्दभागिन्या आर्यपुत्रवदननलिनपरिमलवञ्चिताया एतावदन्तरभ्रमणभ्रमर्या अभ्युदयः !]

सर०—

अपि योजयामि त्वामिदानीन्तवार्यपुत्रेण !

मदा०—

एत्तिआइं दिअहाइं तेण विणा धरेंती ण तीरिहेमि लज्जिआ अज्जउत्तवअणं पि विलोइउं ।

[एतावन्ति दिनानि तेन विना धरन्ती न शक्नोमि लज्जिता आर्यपुत्रवदनमपि विलोकितुम् ।]

सर०—

वत्स ! तालकेतुदीर्घनिद्रानिदान ! परित्रातमदालसाव्यसनपुण्यकीर्त्ते ! कृतिमन् ! अश्वतर ! इयमसौ त्वया चिन्तिता मदालसा बध्नातु प्रियतमकण्ठे कण्ठिकाम् ।

कुमारौ—

अहो माहात्म्यं तातस्य ! यदात्मनो नाम न पराक्रमप्रबन्धाभिनये निबद्धं न चावयोरनुरुध्यमानयोरपि स्वयमुदीरितम् ।

[अश्वतरः बलादिव मदालसाकरेण कण्ठिकां कुवलयाश्वकण्ठे बध्नाति ।]

सर०—

परिणतमिदानीं गालवोपक्षिप्तबीजस्य प्रबन्धपादपस्य सुधास्वादुना फलेन। वत्स कुवलयाश्व ! किं तव भूयः प्रियमुपकरोमि।

कुव०—

भगवति ! तातनागपतिप्रसादिताया भगवत्याः प्रसादादधिगतनिखिलाभ्युदयोऽस्मि, तथापीदमस्तु,

रसभावगुणाकल्पैराकल्पं जनमनोविनोदाय।
चित्रेतिवृत्तमस्मच्चरितं कवयः प्रबध्नन्तु ॥३५॥

सर०—

भविष्यति फणदहवैदेहवंशवर्धनस्य माध्यन्दिनमूर्धन्यस्य वात्स्यायनस्य पवित्रकीर्त्तिश्रीरामभद्रतपोनिधिनन्दनस्य विद्यानिधेरुपाध्यायपीताम्बरस्य चतुर्णां पुत्राणामेकतमो दर्शनव्रजपरस्य रविप्रतिपेधसिद्धान्तोपदेशगुरुर्गोकुलनाथो नाम।

सोऽयं द्वैपायनमुनिसूक्तामृतसागरात्समुद्धृत्य।
तर्पयिता जनतायाश्चुलकोत्सेकैः श्रवांसि रसैः ॥३६॥

(इति निष्क्रान्ताः सर्वे।)

(इति सप्तमोऽङ्कः समाप्तः।)

An alphabetical index of verses found in the *Muditamadālasanāṭaka*

(Figures in the margin refer to pages)

अकारणे कारुणिकः	१३७
अग्रे चलत्यभिमुखं	५६
अङ्गारपर्णधनुष-	३
अङ्गीकर्तुं निगम-	१३१-२
अथ चकितमुदस्था-	९५
अधिवसति	८२
अधुनापि	१२२
अनल्पं कल्पान्त-	१
अन्तर्दधाति मणि-	९२
अन्तःसन्धिनिविष्ट-	२३
अन्योन्यव्यतिघट्ट-	६४
अन्योन्येन विभज्य	१३३
अपि सागरसीमाया	३६
अमी सोढा गूढ·	४४
अमुना हयवेगेन	२१
अयमविरतनिद्रां	७२
अर्द्धचन्द्रविशिख-	७२
अवज्ञया वा	१२७
अश्रान्तविश्व-	१५
असौ निन्ये वर्षा	१२४
अस्त्रज्वालानिरस्त-	५३

	३३
अहह मिहिरबिम्बं	५३
आक्रन्दत्कुलकन्यका-	११३
आक्रामन्तो	६८
आग्नेयास्त्रं नृपति-	५८
आत्मैव प्रियदर्शने	२३
आथर्वणोपनिषदां	३५
आवद्धः सरसिरुहा-	७३
आमूलाद् भस्मराशी	८४
आयम्य पादमवलम्ब्य	१२८
आरब्धपरिसमापित-	३
आलोकालोक-	२२
आस्कन्धादुलप-	५०-५१
आस्तन्यत्यजन-	६१
उत्तम्भितायत-	२५
उदञ्चिताचुम्बति	१३
उन्नम्य बाहुयुगलं	१२३
एको वेत्ति	१३६
एकः स्तौति	३४
एतस्मिन् सरसि	३४-३५
एतावतापि भुवन-	६९
एषा कज्जल-	५५
एषा दीर्घ-	५५
ऐक्यं गतासु	६३
ऐरावणस्य करटोपतटे	११२
कण्ठपाशपद-	६१
कण्ठान्तर्विवरै-	१२०
कण्ठिकया प्रियलुब्धे	११९
कण्ठिकया हतविघ्नं	८६
कन्यारत्नं हयपरिवृढं	

कल्पाक्षयव्रतति- ४०
कस्यापि कोऽपि ९६
कस्याश्चिदुत्पल- ८८
कारुण्यसम्पुटित- ८१-८२
काष्ठाग्राणि घटन्ते १३
काष्ठान्तसङ्घटित- २०
काष्ठौघघटित- १४
किमध्यास्ते ७
किं नाम विस्मरसि ४६
किं नामात्र २८
कुत्रागत्य मुहुः १२२
कुमारवाणावलि- ६४
कूजद्भिः प्रकटित- १२५
कूटाग्रव्यतिषक्त- ५६
कृच्छ्रेणोप- १११
केनान्येन भयार्त- २८
कैलाससानु- ८२-३
कैञ्जसोपवने ४
कोऽयं यमी २४
कोऽहं को- ११०
कौमुदीपरिणामेन ७२
क्रुद्धं चाटुभि- १११
क्रूरे मयि ९९
क्रोधक्रूराक्षि- ३७
खद्योतचुम्बित- १२८
गण्डस्थलोत्पतद्- १७
गर्भप्रविष्टदनुज- ६५
गर्भादभ्रजरायु- २६
गोगृष्टिमिष्ट- ३३
ग्रहपरिभव- ७५

	१२४
चञ्चूपुटेन	१४
छिअइ दिणलच्छि-	२४
जितं मया	६१
ज्वलति सुलभं	६१
ज्वलति सुशकं	१६
तत्ते परोपकार-	२
तद्बालाया विलपित-	१८
तथ्यं किञ्चन	६८
तन्मर्मशल्यमिव	५
तं गन्धर्वकुलेन्दु-	१२०
त्यक्तप्रसाधन-	१०१
त्यस्यत्यस्मात्	१२६
त्वामाशासत	१२६
तापं वः शमयेत्	४१
दनुकुलतिलकस्य	२
दयया वदनं	३३
दिगन्तविवरान्तर-	५
दूरायताधरपुटेन	८६
दृष्टेर्या भयभावनी	८५
दृष्ट्वा दुश्चरितं	१३३
दोःस्तम्भस्तालकेतो	४
धन्यैरन्यजनै-	१६
धाराः पञ्च	१६
धावन्तः खुरलक्षणेन	१६
धावन्नाविशतीव	७५
धुतकरतलामङ्गे	८४
धूमायते सिम-	६२
धूमोद्गारनिरुद्ध-	१११-११२
न जानीते	१३१
न प्राप्ताः कुशकर्कशैः	

न भजसि रतिं ८८
नयति किमुपरिष्टा- १३
न स्पृशसि ९८
नानाप्रकारविधि- २४
नान्यो वेद १२९
नावां ते पितरौ १०९
निद्रान्त श्लथ- १२५
निमज्योन्मज्जन्तो १६ १७
निरालम्बं क्रामन्नय- २०
निरुद्धरश्मिप्रति- २१
निर्दग्धे सति ८२
निर्ध्वान्तस्वान्त- ६०
निर्मातिस्म ५
निर्याति क्रमशोऽर्क- ८७
निर्वान्त्यः पुन- १०५
निष्टप्तधन्व- १६
नीरन्ध्रा राजहंस- १२५
पक्षच्छदैः कुमुदिनी- १७
पक्ष्मावलीकण्टक- ५७
पद्मा ब्रह्मनिकेतनात् ८४-८५
परपरिभवः स्वान्ते ६
परिणतनिशाकेश- १०४
परिसरसरःकूले ८१
पजन्यास्त्रप्रसूतैः ७१
पश्चाद्धैःप्रेरयन्तो ९०
पश्यामि ध्रुवधाम- ८३
पश्येव प्रसरत्तदीय- ८३
पश्यैता विषमां १८
पातालं यदि ५४
पुरो दरे वस्तु २१
प्रकाशन्ते ध्वान्ते ६७

	९३
प्रकृतिसरलाः	११२
प्रकृते परिवार-	९७
प्रतिदिनमुदयन्ते	३१
प्रतिपदमवस्त्रन्नै-	१०५
प्रतिष्ठाने सर्वा-	३७
प्रतीच्छ तावदर्धेन्दु-	१२८
प्रत्याहृतमवतारित-	९३-९४
प्रथमं निपपात	४०
प्रागेव द्रुमजङ्घ-	९४
प्रान्ताधरस्तबकितेन	४१
प्राप्तास्ते द्रुमजङ्घ-	१०६
प्रियविरहविष(ण)-	४८
प्रिये जने वैरिणि-	१३१
बन्धप्रौढिवशा-	१६
बहिर्मिहिर-	१६
भवतोमसतीं	११६
भवद्भुजावल्लि-	१३
भाभिः सर्वाभि-	१५
भुअणभमण-	८५
भूभृतां शिरसि	६४
भूमौ तुरङ्गममयं	५४
भ्रश्यद्भोगीश-	८२
मग्नार्धो वरुणालयः	१२१
मन्दज्योतिषि लोचने	३७
मन्ये पिण्डित-	४३
मर्त्यलोकमनुप्राप्य	६
माद्यन्त्यास्वाद्य	४९
मामालोक्य सबाष्प-	३५
मित्रव्यसनविहस्ते	

मुग्धो हंसशिशु- ४६
मुस्तास्तम्बानुकारं ३७
मूर्च्छच्चण्डाट्टहास- १०२
मूर्च्छत्पाताल- ६६
यत्पूर्वं मम १२१
यदभजत नवं ५७
यदा यदा येन १३५
यमुनापूरे १७
यस्य वायव्य- ११७
याता तस्य १३६-७
ये दानवास्तत्र १२७
येनातिक्रम- ७०
येनामुनैकपुरुषे ११७
यो भारतस्त्रिपुर- ४
रसभावगुणा- १३६
राज्ञःशत्रु जितो १३०
राहुर्वमन्नित्र ३८
लालयति स्पृशति १६
लोकालोकोपशल्य- २७
वक्षः पीनशिला- ४२
वज्राश्मतोरण- ५६
वत्से किं कुपितासि ६
वत्से येन चिरायुषा १०६
वरमसती मृगतृष्णा १६
वर्णोचितासु ३-४
वायव्यास्त्रसमुत्थितेन ७१
वाहमेवेयदाम २०
विचरत्यसौ ४०
विच्छिन्नाममुनैव २०
विदलदञ्जन- ६६

विद्युत्कडार-	३८
विद्राणत्रिदशवधू-	७०
विलोक्य रविवैरिणः	१२५
विश्राम्यन्त्वधुना	२९
विषमाध्वान्त-	१०७
वृतस्त्वमध्वर्यु -	१०२
वृत्त वार्द्धकिराज-	१५
वृद्धौ मे पितरौ	११४
व्याजादनूरुकर-	१०६
व्योमकेशस्य केशेषु	८६
व्रज सुतनु समाजं	५९
शत्रोर्देवहतस्य	२६
शम्याशूर्प-	२५
शस्त्राग्निर्दिनखण्ड-	६८
श्रोत्रे शत्रुजितस्य	६३
सङ्ग्रामसीम्नि	६७
सन्धाय त्यजतः	८५
सन्धिं निर्भिद्य	८४
सरला करुणा	२७८
सर्पिर्बिन्दु-	२९
सर्वधन्विजन-	१८
सर्वे ते विबुधाः	१०२
सायं सायमये	२
सावज्ञं खलु	१३२
सुरगिरिमेधिं	१५
सुरसिन्धोधारा-	१९
सोमसुहृद्धिश्र-	१४
सोऽयं द्वैपायन-	१३९
संरम्भव्यतिषक्त-	१३५
संसारो हरिणाक्षि	१२५

स्खलितपतितैः १०६
स्तुमो बिमाष्टकं २३
स्थिरमिव हयमेनं २०-२१
स्नेहाम्बुनः ४८
हर्षादुत्तभ्यमानो ६६

CORRIGENDA

Page	११	Line	१२	Read	निर्मोक	For	निमाक
,,	१६	,,	२८	,,	स्तरङ्गैरेकत्वं	,,	स्तरङ्गरेकत्वं
,,	१८	,,	३	,,	-मन्यथा	,,	भन्यथा
,,	१८	,,	४	,,	गौरी	,,	गोरी
,,	२१	,,	१२	,,	११	,,	९
,,	२१	,,	२१	,,	१२	,,	१०
,,	२२	,,	२५	,,	१३	,,	११
,,	२३	,,	८	,,	१४	,,	१२
,,	२३	,,	१५	,,	१५	,,	१३
,,	२३	,,	२३	,,	१६	,,	१४
,,	२४	,,	५	,,	१७	,,	१५
,,	२४	,,	१५	,,	१८	,,	१६
,,	२४	,,	२७	,,	१९	,,	१७
,,	२५	,,	९	,,	२०	,,	१८
,,	२५	,,	२२	,,	२१	,,	१९
,,	२६	,,	५	,,	-वंशा-	,,	-वशा-
,,	२६	,,	८	,,	कीर्त्ति-	,,	कार्त्ति-
,,	२६	,,	८	,,	२२	,,	२०
,,	२७	,,	८	,,	२३	,,	२१
,,	२८	,,	२	,,	२४	,,	२२
,,	२८	,,	१२	,,	यदसौ	,,	यदसो
,,	२८	,,	१३	,,	ब्रह्मोष्ठाष्टक	,,	ब्रह्मोंष्ठष्टक
,,	२८	,,	१५	,,	२५	,,	२३
,,	२८	,,	२८	,,	२६	,,	२४
,,	२९	,,	७	,,	२७	,,	२५

Page	२९	Line	१९	Read	चण्डरश्मि	For	चण्डश्मि
,,	२९	,,	२७	,,	२८	,,	२६
,,	३१	,,	१८	,,	मुश्रो	,,	मुआ
,,	३१	,,	२८	,,	२९	,,	२७
,,	३२	,,	१२	,,	विस्मृतवानस्मि	,,	विस्मृतबानस्मि
,,	३२	,,	१७	,,	दुष्टवत्सकं	,,	दुष्टवत्सक
,,	३३	,,	४	,,	३०	,,	२८
,,	३३	,,	१०	,,	३१	,,	२९
,,	३३	,,	२३	,,	३२	,,	३०
,,	३४	,,	८	,,	३३	,,	३१
,,	३५	,,	२	,,	३४	,,	३२
,,	३५	,,	१३	,,	३५	,,	३३
,,	३५	,,	१८	,,	३६	,,	३४
,,	३५	,,	२२	,,	चक्रवाक	,,	चत्रवाक
,,	३६	,,	१३	,,	३७	,,	३५
,,	३७	,,	१२	,,	३८	,,	३६
,,	३७	,,	१७	,,	३९	,,	३७
,,	३७	,,	२०	,,	४०	,,	३८
,,	३७	,,	२४	,,	४१	,,	३९
,,	३८	,,	७	,,	४२	,,	४०
,,	३८	,,	२३	,,	४३	,,	४१
,,	४३	,,	१५	,,	कस्स	,,	करस
,,	४३	,,	२४	,,	सास्नम्	,,	सास्नम
,,	४४	,,	२४	,,	तस्स	,,	तरस
,,	४७	,,	—	,,	तृतीयोऽङ्कः	,,	तृतीओऽङ्कः
,,	४७	,,	१८	,,	मार्गेण	,,	मागण
,,	४७	,,	१९	,,	पार्श्व	,,	णर्श्व-
,,	५३	,,	९	,,	दोःकाण्ड	,,	दो काण्ड
,,	५३	,,	१७	,,	पुनर्नेपथ्ये	,,	पुननपथ्ये
,,	५३	,,	२८	,,	Gokulanātha	,,	G kulanātha
,,	५४	,,	२५	,,	शस्त्रानल —	,,	शस्त्रानल

Page	६०	Line	१५	Read	वात—	For	वात
,,	६०	,,	२०	,,	भर्तभैरव	,,	भर्तभरव
,,	६०	,,	२१	,,	मधुरं	,,	मधुर
,,	६१	,,	२०	,,	भर्तभैरव	,,	भर्तभैरव
,,	६३	,,	५	,,	सहासम्	,,	सहासम
,,	६८	,,	२	,,	हुताशन	,,	हताशन
,,	७१	,,	२	,,	हुतवहाङ्गार	,,	हतवहाङ्गार
,,	७६	,,	१२	,,	पुनस्त्यक्ष्यामि	,,	पुन त्यक्ष्यामि
,,	७७	,,	१५	,,	विक्षेपो	,,	विक्षेपो
,,	७९	,,	७	,,	रोमाङ्कुरेषच्छयाम	,,	रोमाङ्कुरेपच्छयाम
,,	८१	—		,,	पञ्चमोऽङ्कः	,,	चतुर्थोऽङ्कः
,,	८३	—		,,	,,	,,	,,
,,	८४	,,	२	,,	बल-	,,	वल
,,	८६	,,	१	,,	दहनार्चिष-	,,	दहनार्चिष
,,	८७	—		,,	पञ्चमोऽङ्कः	,,	पञ्चनोऽङ्कः
,,	९०	,,	१३	,,	प्रसर्तुम्	,,	सप्रर्तुम्
,,	९९	,,	२५	,,	कैरवाकरः	,,	करवाकरः
,,	१०६	,,	२२	,,	६	,,	५
,,	१०९	,,	६	,,	७	,,	६
,,	१०९	,,	१८	,,	८	,,	७
,,	११०	,,	५	,,	९	,,	८
,,	१११	,,	७	,,	१०	,,	९
,,	१११	,,	१२	,,	११	,,	१०
,,	११२	,,	२	,,	१२	,,	११
,,	११२	,,	५	,,	१३	,,	१२
,,	११२	,,	१७	,,	१४	,,	१३
,,	११३	,,	१७	,,	१५	,,	१४
,,	११४	,,	८	,,	१६	,,	१५
,,	११६	,,	५	,,	१७	,,	१६
,,	११६	,,	१५	,,	—पृच्छय	,,	—पृच्छय

Page	११७	Line	६	Read	१८	For १७
”	११७	”	१२	”	१९	” १८
”	११९	”	२०	”	२०	” १९
”	१२०	”	·४	”	२१	” २०
”	१२०	”	१०	”	२२	” २१
”	१२५	”	२	”	शैल	” शेल
”	१३८	”	२२	”	पराक्रम-	” पराकम